नचविभक्तौ लिंगविशिष्टग्रहणमिति निषेधेन लिंगविशिष्टपरिभाषाया अत्रैव नियमस्तत्रअनापीत्यमेव नतिवाच्यम् स्त्रीप्रत्ययांत
तस्यकार्यकार्यएवनिषेधपरिभाषामपृत्तेरितिमूलाद्युक्तेः अदन्तत्वाभावान्नदीर्घः

=नहीः सः स्त्रीवितिसकारः३

इयम्। त्यदाद्यत्वम्। टापादश्चेति मः। इमे। इमाः। इमाम्। इमे। इमाः। अनया। हलि लोपः। आभ्याम्। आभिः। अस्यै। अस्याः२। अनयोः। आसाम्। अस्याम्।
आसु। अन्वादेशेत। एनाम्। एने। एनाः। एनया। एनयोः। ऋत्विगादिनाद्ङेः क्विन्। अमागमश्च निपातितः। त्रक्। त्रग्। त्रजौ। त्रग्भ्याम्। त्रक्षु। त्य
दाद्यत्वम्। टापः। स्यात्। त्याः। एवं तत्। यद्। एतद्। वाक्। वाग्। वाचौ। वाचः। वाग्भ्याम्। वाक्षु। अप्प्रत्ययो नित्यं बहुवचनान्तः। अक्ष्णि निदीर्घः। आपः
अपः। अणभि। अपसक्कारः स्याद्वा दोपत्ययपरे। अद्भिः। अद्भ्यः२। अपाम्। अप्सु। दिक्। दिग्। दिशौ। दिशः। दिग्भ्याम्। दिक्षु। त्यदादिषु तिस्रौः
क्विन्विधानादन्यत्रापि कुत्वम्। दृक्। दृग्। दृशौ। दृशः। त्विट्। त्विड्। त्विषौ। त्विषः। त्विड्भ्याम्। त्विट्सु। सहजुषते इति सजूः। सजुषौ। स
जूर्भ्याम्। सजूःसु। सजूष्वत्यासिद्धत्वादुत्वम्। श्रीः। श्रियौ। श्रियः। श्रीर्भ्याम्। श्रीषु। त्यदाद्यत्वम्। टापः। औङः। श्रीवत्वम्।
अम्। अमूः। अमुया। अमूभ्याम्। अमूभिः। अमुष्यै। अमुष्याः२। अमुयोः२। अमूषाम्। अमुष्याम्। अमूषु॥ ॥इतिहलन्ताःस्त्रीलिंगाः॥ ॥

=समजुषोरिति सत्वम्३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=वयुत्पत्तिस्थिति२ =सर्वविधिभ्यो कुण्डिघिर्वणीयानिति३

स्वमोर्लुक्। दत्वमास्वनडुत्। स्वनडुद्। स्वनडुही। चतुरनडुहोरित्याम्। स्वनड्वाहि। पुनस्तद्धतादिवउना। विमलद्यु अहः। अंतर्वर्त्तिनी विभक्तिमाश्रित्य पूर्वपदस्ये
वोत्तरखंडस्यापि पदसंज्ञायां षाष्ठ्याम् उत्तरपदत्वे वा पदादि विधौ प्रतिषेधद्वति प्रत्ययलक्षणेन। विमलदिवौ। विमलदिवि। अपदादिविधौ किमारधिसेवौ।
इह षत्वनिषेधे कर्त्तव्ये पदत्वमस्त्येव। कुत्वे तु नावाः। वारी। वारि। अरुलनत्वान्नुम्। चत्वारि। शकिमाकोकानि। इदम्। इमे। इमानि। अन्वादेशे नपुंसके एन
द्वक्तव्यः। एनत्। एने। एनानि। एनेनाएनयोः। ब्रह्म। ब्रह्मणी। ब्रह्माणि। हे ब्रह्मन्। हे ब्रह्मणी। सुपि। अह्भ्यां। विभाषाङिनृपोः। अह्नी। अह्नी। अह्नानि।
अह्नी। अह्नि नित्यस्य रुः स्या[illegible]पदान्ते। अहोभ्याम्। अहोभिः। इह अहः। अहोभ्या[illegible]मित्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते। अह्नि नित्यावर्त्तयनलो
पाभावे निपात्यद्वितीयेन रुविधेयः। तदन्तस्यो रुत्वात्। दीर्घाण्यहानि यस्मिन्सदीर्घाहाः निदाघः। इह हलङ्यादिलोपे प्रत्ययलक्षणेनासुपीति निषेधादुत्वा
भावे रुः। तस्यासिद्धत्वान्नानलक्षण उपधा[illegible]दीर्घः। संवुद्धौ तु। हे दीर्घाहो। निदाघा। दीर्घाहानः। दंडी। दंडिनी। दंडीनि। स्रग्वी। स्रग्विणी। स्रग्वीणि। वा

+पि२

=इह पूर्वापरग्रंथविरोधस्तु अर्हन्मूहपरिभाषयानेति यथाकथंचिन्नेयः१ =द्वावपि एतदधिकारीयमिति भावः२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्मि। वाग्मिनी। वाग्मीनि। बहुदत्रहाणि। बहुपर्षाणि। बहूर्यभाणि। अस्रजः पदान्तैकुत्वं सृजेः क्विनो विधानात्। विश्वसृजादीनां सृजिदृशोरिति सूत्रेर
ज्जस्ग्रामिति भाष्यप्रयोगात्। यद्वा जश्चेति सूत्रेसृजियजोः पदान्तेषत्वं कुत्वापवादः। सृग्रत्विक्शब्दयोस्तु निपातनादेव कुत्वम्। अस्रक्शब्दस्तु
अस्यतेर्ण्यादिके ऋज्प्रत्यये बोध्यः। अस्रक्। अस्रजौ। अस्रज्भिः। पदन्तस्य तु अस्रग्। अस्राणि। अस्रजा। आस्राः। अस्रग्भ्यामित्यादि। ऊर्क्। ऊ
र्ग्। ऊर्ज्जौ। ऊर्ज्जः। नाम्नां संयोगः। बहूर्जि नुम्प्रतिषेधः। अन्त्यात्पूर्वं बहुम्। बहूर्जि। बहूर्ज्जिः। बहूर्जानि। त्यदादौ। त्यानि। तत्। तानि। यत्। ये
यानि। एतत्। एतानि। अन्वादेशे तु एनत्। वेभिद्यते। क्विपा वेभित्। वेभिदौ। वेभिदः। अल्लोपस्यानिवत्वादकलन्तत्वान्नुम्। अजन्तलक्षणा
त्तु नुम्। त्वविधौ स्थानिवत्वाभावात्। वेभिदिग्रालक्षणकुत्वानि। वेच्छिदि॥ ॥गवाक्शब्दस्य रूपाणि क्लीबे वागतिभेदतः॥ असंध्यवङ्पूर्वरूपेन
क्लनुम्। त्वविधौ स्थानिवत्वाभावात्। वेभिदिग्रालक्षणकुत्वानि। वेच्छिदि॥ ॥गवाक्शब्दस्य रूपाणि क्लीबे वागतिभेदतः॥ असंध्यवङ्पूर्वरूपेन
वाधिकत्वान्नमतम्॥ १॥ त्वमुसुनवषड्द्वादेषड्द्वयुत्तीणि जश्शसोः॥ वत्वाद्विशेषदशकं रूपाणीति विभावय॥ २॥ तथाहि। गामश्नुतीति विग्रहे अ

+एते। ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

= अवःपरेवोऽलितिव्याख्यानात्स्त्रीनपुंसकस्येतिनुम्न ३

त्विगादिनाङ्गिन। गतौनलोपः। अवङ्स्फोटायनस्येत्यवङ्। गवाक। गवाग। सर्वत्रविभाषेतिप्रकृतिभावे। गो अक। गो अग। एवंरूपे। गोक। गोग। एजायांन
स्यकृत्वेनङः। गवाङ्। गो अङ्। गोङ्। अम्पक्षेतान्येवनवा। औङः। श्री। भवत्वादवङ्इत्यलोपः। गोवी। एजायांतु। गवाश्री। गो अश्री। गोश्री। जश्शसोः शिः।
गोः सर्वनामस्थानत्वान्नुम्। गवाञ्चि। गो अञ्चि। गोञ्चि। गतिएजनयोस्त्री। गयेवा। गोवा। गवाश्वा। गो अश्वा। गोश्वा। गवाभ्याम्। गो अभ्याम्। गोग
भ्याम्। गवाङ्ग्राम्। गो अङ्ग्राम्। गोङ्ग्राम्। सुपिङ्गन्तानांपक्षेङ्गोः कुगितिकुक्। गवाङ्क्षु। गवाङ्क्षु। गवास्। नचेह वयोद्वितीयाइतिपक्षेककौ
रस्यविकारेणषस्यामाधिक्यंशंक्यम्। वर्त्मस्यासिद्धत्वात्। कुकपक्षेतुतस्यासिद्धत्वाज्जश्त्वाभावेपक्षेवयोद्वितीयादेशास्त्रीलिङ्गपालिवर्द्धन्त
एवाङ्ग्रमेषांद्विर्वचनानुनासिकविकल्पनात्॥ रूपाणयश्चाक्षिभूतानि५२७ भवन्तीतिमनीषिभिः॥ ७॥ ॥तिर्यक्। तिरश्री। तिर्यश्चि। एजा
यांतुतिर्यङ्। तिर्यश्री। तिर्यश्चि। यकृत्। यकृती। यकृन्ति। पदन्तितिवायकनायकानियक्ना। यकृता। शकृत्। शकृती। शकृन्ति। शकानि। श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७।१।७९ ७।१।८० ७।१।८०

क्रा। शकृता। ददता। ददती। वा नपुंसकस्य। अभ्यस्तात्परोयः शातानदन्तस्य स्त्रीवद्यनुम्वास्या सर्वनामस्थाने। ददन्ति। ददति। तुदता। आ स्त्रीनद्योर्नुमा। अ
वर्णान्तात्परोयः शतुरवयवस्तदन्तस्यागस्यनुम्वास्या स्त्रीनद्योः परतः। तुदन्ती। तुदती। तुदन्ति। भात। भान्ती। भाती। भान्ति। पचत। शपश्चपनो नित्य
म। शपश्चपनोरात्परोयः शतुरवयवस्तदन्तस्य नित्यं नुम्स्यात् स्त्रीनद्योः परतः। पचन्ती। पचन्ति। दीव्यत। दीव्यन्ती। दीव्यन्ति। स्वप। स्वप्। स्वपी। नि
त्यात्यादपि नुमः प्राक् अत्र न्लिति दीर्घः। प्रतिपदोक्तत्वात्। स्वपि। निरवकाशत्वं प्रतिपदोक्तत्वमिति पक्षे तु पक्षे तेन हि रहान्नुमेव। स्वपि। स्व
पा। अपोभिः। स्वप्भ्यां। अर्त्तिहृव्यधीभ्यां नाधनेहसाहत्वमाधनुः। धनुषी। सांते तिदीर्घः। नुम्विसर्जनीयेति षत्वमाधनूंषि। धनुषा। धनु
र्भ्यां। एवं बहुहविराद्यः। पिपठिषते। क्विपि वोरिति दीर्घः। पिपठीः। पिपठिषी। अस्त्रोपस्यस्थानिवत्वाज्जलन्तलक्षणेनुम्। स्वविधौ स्था
निवत्वाभावादजन्तलक्षणोपि न। पिपठिषि। पिपठीभ्यां। इत्यादि। पयः। पयसी। पयांसि। पयसा। पयोभ्यामित्यादि। सुपुम्। सुपुंसी। सुपुंसि। अ

पदमञ्जर्यां विहितः प्रतिपदोक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१/१/३७

दः। विभक्तिकार्यम्। उत्वमत्वे। अम्। अम्नि। शे। षंपुंवत्॥ ॥इति हलन्तानपुंसकलिंगाः॥ ॥चादिनिपातमव्ययम्। चादयो निपाता श्चा
व्ययसंज्ञाः स्युः॥ ॥ स्वर्। अंतर्। पातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। अधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रा
त्रौ। सायं। चिरम्। मनाक्। ईषत्। जोषम्। तूष्णीं। बहिस्। अवस्। समया। निकषा। स्वयम्। वृथा। नक्तम्। नञ्। हेतौ। इद्धा। अद्धा। सामि।
वत्। ब्राह्मणवत्। क्षत्रियवत्। सना। सनेत्। सनात्। उपधा। निस्। अंतरा। अंतरेण। ज्योक्। कांशं। सहसा। विना। नाना। स्वस्ति। स्वधा। अ
लं। वषट्। ओषट्। वोषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। पायसा। मुहुस्। पवा
हुकम्। प्रवाहिका। आर्यहलम्। [redacted] अभीक्ष्णम्। साकम्। सार्द्धम्। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। प्रतान्।
मा। माङ्। आकृतिगणोयम्। वा। वा। ह। अह। एव। एवं। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। रूपत्। कुवित्। नेत्। चेत्। वेणा। कच्चित्। य

= पाठांतरं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+नकिम्।२ + प्रति+कार

त्रानह्।हंत।माकिः।माकिभानकिः।आक्रीमामाङ्।नञ्।यावत्।तावत्।त्वै।द्वै।न्वैरे।ओषट्।वौषट्।स्वाहा।स्वधा।अलम्।वषट्।नमस्तथा।हि।व
लु।किल।अथ।सृष्टम्।मा।आरह्।उपसर्गविभक्तिस्वरूपश्च।अवदत्तम्।अहंयुः।आतिक्षीरा।ओ।आ।इ।ई।उ।ऊ।ए।ऐ।ओ।औ।पश्य।शु
कम्।यथा।कथा।चापाट्।णाट्।अंग।हे।हे।भोः।अये।घा।विषु।एकपदे।पुत।आतः।चादिरणाकृतिगणाः॥ नद्धितश्चासर्वविभक्तिः।यस्मा
त्सर्वविभक्तिर्नोत्पद्यते सतद्धितान्तो व्ययंस्यात्।परिगणनकर्त्तव्यमानामलाद्यः।पाकपाशपः।शास्त्रप्रभृतयः।पाकस्मासान्तिभ्यः।अस्मा।आस्मा
कृत्वोर्थाः।तसिवती।नानञ्।विति।तेनेह नापवतिकल्पमापवतिरूपम्।कृन्मेजन्तः।कृद्योगा।नएजन्तश्चतदन्तमव्ययम्स्यात्।सारम्।सार
म्।जीवतापिवध्ये।कानासुन्कसुनः।एतदन्तमव्ययम्स्यात्।कृत्वा।उदेतोः।विस्पष्टः।अव्ययीभावश्च।अधिहरि।अव्ययादाप्सुपः।प्रत्ययादि
हितस्यापः।सुपश्च लुक्स्यात्।तत्रशालायाम्।अथविहितविशेषणान्नेह।अत्युच्चैस्तो।अव्ययसंज्ञायांयद्यपितदन्तविधिरस्तितथापिगोरा।

+न१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपृग्रहणाद्यर्थमलिंगत्वात्॥ सदृशंत्रिषुलिंगेषुसर्वासुवविभक्तिषु॥ ववनेषु वसर्वेषुधन्नयेतितदव्ययमिति अतिर्लिंगकारकसंख्याभावप
रा॥ २॥ वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः॥ आपंचैवहलन्तानांयथावाचानिशादिशा॥ ३॥ अवगाहः।वगाहः। अपिधानम्।पिधानम्।
॥ ॥ इत्यव्ययानि॥ ॥ स्त्रियांभी अधिकारोयम्।समर्थानामितियावत्। अजाद्यतष्टाप्। अजादीनामकारान्तस्यवगाद्यंयत्स्त्रीत्वंतत्रद्योत्येटाप्
स्यात्। अजाद्युक्तिर्ङीषोङीपश्चबाधनाय। अजा। अतः।वक्ष्यति। अजादिभिः स्त्रीत्वस्यविशेषणान्नेह। एंवाजी। अत्रसमासार्थसमाहारनिष्ठं
स्त्रीत्वम्। अजा।एडका। अश्वा।वडवा। मूषिका। एषुजातिलक्षणोङीषुप्राप्तः। बाला।वत्सा। होढा। मेढा। विलाता। एषुव्यतिपद्यमङ्गतिङी
प्राप्तः। सभार्त्रा जिनशरणपिंडेभ्यः फलात्। संफला। भार्त्रफला। द्वाभ्यांपरितिहस्वः। सदृक्कांडपांतशतैकेभ्यः पुथात्। सत्पुथा। प्राक्पुथा। प
त्यक्पुथा। श्रद्धावामहजातिः। पुंयोगे तुश्रद्धी। अमहत्सर्वाकिमा। महाश्रद्धी। क्रुवा। उद्भिदा। देवविशा। त्र्येष्ठा। कनिष्ठा। मध्यमिति पुम्योगे

+ सर्वा १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=तत्रः किं शतमक्षीर
अतिमक्षीर

४।१।६

पि। कोकिलाजातावपि। मूलानञः। अमूला। अन्येभ्योऽपि। कर्त्री। दंडिनी। उगितश्च। उगिदन्तात्प्रातिपदिकात्स्त्रियांङीप्स्यात्। यवनी। भवन्ती। भवती। शपश्यनोरिति नुम्। उगिदचामिति सूत्रेऽग्रहणं धातोश्चेदुगित्कार्थं भवति तर्ह्यञ्चतेरेवेति नियम्यते। तेन नेह न। उदवाञ्चता। क्विप्। अनिदितामिति नलोपः। पर्णवत्। अवेक्षस्यादेव। प्राची। प्रतीची। वनोरचि। वन्नन्तान्नदन्ताच्च प्रातिपदिकात्स्त्रियांङीप्स्यादश्चान्तादेशः। वन्निति किं। निपक्वनिपवनिपासामान्यग्रहणम्। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्। तेन प्रातिपदिकविशेषणं तदन्तानामपि लभ्यते। सुत्वानमतिक्रान्ता अतिसुत्वरी। अतिधीवरी। शर्वरी। वनो नहश इति वक्तव्यम्। हशन्ताद्विहितो यो वन्नदन्तानदन्तान्नाच्च प्रातिपदिकान्ङीब्भवतीत्यर्थः। आरष्ट अपनयने। वनिप्। विहनोरित्यात्वम्। अवावाह्ली। राजयुवा। वहुजीहोवा। वहुधीवा। वहुधीवरी। यक्षेऽवक्ष्यतोः पादोऽन्यतरस्याम्। पाक्षुरः कृतसमान्तस्तदन्तात्प्रातिपदिकान्ङीब्वास्यात्। द्विपदी। द्विपाटा। वृषि।

४।१।६

+सा

=ङ्मास्थेतीत्व३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिवा च्यायांषादन्ताद्वा स्यात्। द्विपदात्रिकाएकपदा। नषट्रषत्रा दिभ्यः पंवा वतस्त्रः। पंचेत्यत्र नलोपे कृते पिच्छ्ना नाम्नि डिति षट्संज्ञां प्रति नलो
पः सुप्चरेति नलोपस्यासिद्धत्वान्नषट्रषत्रा दिभ्यट्टिनट्टा प्रिनः। प्रन्नन्नान्नङी स्यात्। सीमा। सीमानौ। अनोवहुङीहेः। अन्नन्नाद्वहुङी
हेर्नङी स्यात्। वहुयज्वा। वहुयज्वानौ। डावुभाभ्यामन्यतरस्याम्। तत्रयोपान्ताभ्यां डावाद्यात्। सीमा। सीमासीमानौ। दामा। दामे। दामानौ। नयुंसिदा
मेत्यमरः। वहुयज्वा। वहुयज्वे। वहुयज्वानौ। अन्नउपधालोपिनोन्यतरस्याम्। अन्नन्नाद्वहुङीहेरुपधालोपिनो वाङी स्यात्। पक्षेडापि निषेधो। वहुरा
ज्ञी। वहुराज्ञौ। वहुराजे। वहुराजानौ। प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपः। प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे सत्यप्सुपः परान्वेत्।
सर्विका। कारिका। अतः किमा। नोका। प्रत्ययस्थात्किमा। शक्नोतीति शका। असुपः किमा। वहुपटिजाजकानगरी। कात्किमा। नदी। पूर्वस्य किमा। परस्य
मा भूत्। कटुकातपरः किमा। राका। आपि किमा। कारकः। मामकनरकयोरुपसंख्यानम्। मामिका। नरान्कायतीति नरिका। त्यकेत्यपो श्चादाप्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=यासयोरित्यपहाययत्तयोरेवकुमुदितं २=स्वरूपस्याविवक्षाफलं ३=कृतो १=उणादिभ्यांयकन्वासन्नारूढयोः १
=दक्षिणपश्चात्तरसत्यकन् १ =इष्यशिभ्यांनकन् ३ =इगुपधज्ञीकः २=कोऽणदनिकुलः २=संज्ञायाअतिशायनायाःकन् ३

णात्यिका। इहत्यिका। नयोसयोः। यत्तयोरस्येन्नस्यात्। यका। सका। यकामातका। [illegible]। उपत्यका। अधित्यका। आशीषिवुन श्रीनीवका। भवका। उन्नयपदलोपेनादेवदत्तिका। देवका। क्षिपकादीनां। क्षिपका। ऊवका। कन्यका। वटका। ताका। ज्योतिषि। अन्यत्रतात्रिका। वर्णकातातवे। अन्यत्रवर्णिका। वर्त्तिकाग्रकनौ पाशाम्। उदीवांतवर्त्तिका। अष्टकायितदेवत्या। अष्टिका। न्या। सूनकापुत्रिका। वृंदारकाणां। वेतिवक्तव्यम्। इहवा। अ इतिच्छेदः। कातपूर्वस्य। अकारादेशो। वेत्यर्थः। तेनसूत्रिका। शारेनइवर्णास्यपक्षेऽकारः। अन्यत्रेत्वाधनार्थप्रकारस्येवपक्षेऽकारः। सूतिका। सूनकेत्या दि। उदीवामातः। स्थानेयकपूर्वोयाः। यकपूर्वस्यात्रीपत्यया। ऽकारस्यस्थानेयोऽकारस्तस्यकात्पूर्वस्यैहास्यादापिपरे। केऽणइतिहूचः। आर्यिका। आ र्यका। वटकिका। वटकका। आतः किम्। सोकाश्येभवासोकाश्यिका। यकेतिकिम्। अष्टिका। त्रीपत्ययेकिम्। उभयातीतिउभयाः। अज्ञाता। उभ याः। उभयिका। धात्वन्तयकोक्तिनित्यम्। सुनयिका। सुपाकिका। अत्रिषाजाज्ञाहावाऽसर्वाणामपीत्येयन्लेप्रषष्ठीकंपदम्। एषामतइहास्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्न्तविधिनेवसिद्धेन ज्ञ्वर्णानामयीतिपष्ठ्यर्थम्। भस्त्रा यहणमुपसर्जनार्थम्। अन्यथा तत्तत्रसूत्रेणसिद्धम्। एषा द्वेतयोरुक्तसपूर्वयोर्नेत्वम्। अन्तर्वर्त्ति
नीविभक्तिमाश्रित्यासुपइतिपतिषेधात्। अनेषका। परमेषका। अद्वके। परमद्वके। स्वशब्दयहणमसंज्ञोपसर्जनार्थम्। इहहि आतःस्थाने इत्यनुवृत्तस्वश
ब्दस्यातोविशेषणम्। नतु द्वयोरसंभवात्। नापन्येषामप्यभिधानात्। स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजहः अर्थानारेतुनस्त्री। संज्ञोपसर्जनीभू
तस्तकपत्ययांतत्वाद्वत्युदाहरणम्। एवंवात्मीयायांत्विकापरमत्विकेतिनित्यमवेत्वम्। निर्भस्त्रका। निर्भस्त्रिका। एषका। एषिका। कृतषत्वनिर्देशा
न्नेहविकल्पः। एतिके। एतिकां। अजका। अजिका। ऋका। ऋिका। अऋका। अऋिका। द्वके द्विके। निःस्विका। निःस्वका। अभीषितपुंस्काच्च। एत
स्माद्धितस्यातःस्थानेऽतइद्वास्यात्। गंगका। गंगिका। बहुत्री हेभीषितपुंस्कत्वान्नतोविहितस्यनित्यम्। अज्ञाता आवद्वा आवद्विका। शेषिकेक
पितुविकल्पएव। आद्यावार्याणाम्। पूर्वसूत्रविषये आद्यास्यात्। गंगाका। उक्तपुंस्कात्तु शुभ्रिका। अनुपसर्जनात्। अधिकारोयम्। यनास्तीत्यभि

७।३।४९ ४।१।१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४।१।१५

व्याप्या। अयमेवस्त्रीप्रत्ययेषु तदन्तविधिप्रयोजयति॥ दृष्टा अदृष्टा अदृष्टा अद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तः।षः प्रत्ययस्य प्रत्ययस्यादिः षद्वत्स्यात्। आयनेयीनीयियः फढ्खछघां प्रत्ययादीनां प्रत्ययादिभूतानां फादीनां क्रमादायन्नादेयआदेयाः स्युः। तद्धितान्तत्वात्प्रातिपदिकम्। षित्वसामर्थ्यात्क्ष्णोक्ते पित्रीत्वेषि द्वौ रेतिवश्यमागोङीषु। गार्ग्यायणी। सर्वत्रलोहितादिकतन्तेभ्यः। लोहितादिभ्यः कतशान्तेभ्यो यञन्तेभ्यो नित्यंष्फः स्यात्। लोहित्यायनी। कात्यायनी। कौरव्यमांडूकाभ्यां च। आभ्यांष्फः स्यात्। क्रमेण टापङीषौ पवादः। कुर्वादिभ्योण्यः। कौरव्यायणी। ढक्त्वमांडूकादित्यणमांडूकायणी। आसुरेरुपसंख्यानम्। आसुरायणी। वर्यसिपथमे। पथ्यमवयोवा विनोदन्नात्त्रियांङीष्स्यात्। कुमारी। वयस्यवरमइतिक्रुयम्। वधूटी। विरटी। वधूटविरटशब्दौ यौवनवचनौ। अतः किम्। शिभ्रः। कन्यायाम्। कन्यायाः कनीनवेति निर्देशात्। द्विगोः। अदन्तात्द्विगोङीष्स्यात्। त्रिलोकी। अजादित्वात्त्रिफला। अनीकामेना। अपरिमाणविस्तावितकंवत्यो नतद्धितलुकि। अपरिमाणान्ताद्विस्ताद्यन्ताच्चद्विगोङीष्नस्यात् तद्धितलुकि सति। पंचभिरश्वैः क्रीतापंचाश्वा। आहीयष्कः। अध्यर्द्धेतिलुक्। द्वौ विस्तौ पवतिद्विविस्ता। द्वावितावद्विकंवत्या। परिमाणात्तु द्वाट्कौ। तद्धित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=षोडश हस्तप्रमाणो दंडः १ =पुरुषस्योर्ध्वाधरदिगवस्थितवस्तुमात्रपरिक्षेपकत्वेनोन्मानत्वं २

=४।१।२३

लुकि किमा समासार्थेयं वाश्वी। कांडं तातक्षेत्रे। क्षेत्रेयः कांडं तो द्विगुस्ततो नङी पूर्वद्वितलुकि। द्वे कांडे प्रमाणमस्याः द्विकांडा क्षेत्रभक्तिः। प्रमाणे द्वयसज्दघ्नच्मात्रचः प्रमाणे लो द्विगोर्नित्यमिति लुक्। क्षेत्रे किमा द्विकांडी रज्जुः। पुरुषो त्र प्रमाणे न्यतरस्यामा प्रमाणे यः पुरुषस्तदन्ता द्विगोर्ङीप् वाच्या तद्धित लुकि। द्वौ पुरुषौ प्रमाणमस्याः द्विपुरुषी। द्विपुरुषा वापी। रिखा। ऊधसोऽनङ्। ऊधोनस्य बहुव्रीहेरनङादेशः स्यात्स्त्रियां। इत्यनङि कृते डापङी। पूर्वनिषेधेषु प्राप्तेषु बहुव्रीहेरूधसोङीषू। ऊधोनाद्बहुव्रीहेर्ङीषूस्यात्स्त्रियां। कुंडी श्री। स्त्रियां किमा कुंडी धीधेनुकमाद्बहुव्रीहेः पिना तद्धिधो स्त्रियामित्युपसंख्यानात्। संख्याव्ययादेर्ङीप् ङीषौ पूर्वादः। द्व्यश्री। अत्यश्री। बहुव्रीहेरित्येव। ऊधोतिक्रान्ता अत्यूधाः। दामहायनान्ताच्च। संख्यादेर्बहुव्रीहेर्दामान्ता हायनान्ता च ङीष्स्यात्। दामान्तेङाप्रतिषेधयोः प्राप्तयोर्हायनांतेऽपि प्राप्तेवचनम्। द्विदाम्नी। अव्ययप्रहाणानमुक्तेरुदामावडवेत्यत्रङापूर्वनिषेधावपि प्रक्षिप्तः। द्विहायनीवाला। त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यं। वयोवाचकस्येव हायनस्य ङीषूणत्वं वेष्यते। त्रिहायणी। चतुर्हायणी। वयसोन्यत्र द्विहायना। चतुर्हायना च।

त्रि२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ला। नित्यं संज्ञाछंदसोः। अन्नन्नादहुद्री हेरुपधालोपिनोङीप्। सुराज्ञी नामनगरी। अन्यत्रपर्वणाविकल्प एव वेदे पंवदाम्नी। शतम् ङी। केवलमामकभागधेयपापापर
समानार्यकृतसुमंगलभेषजाश्चाएभ्योनवभ्योनित्यंङीष्यात्संज्ञाछंदसोः। अथोतइदः केवलीर्विशः। मामकीभागधेयी। पाणी। अपरी। समानी। आर्यकृती। सुम
गली। भेषजी। अन्यत्र केवलाइत्यादि। मामकग्रहणंनियमार्थम्। अणनत्वादेवसिद्धेः। तेनलोके संज्ञायांमामिका। अन्नवत्पतिवतोर्नुक्। एतयोर्नुक्स्यात्त्रि
याम्। अन्नेतिङीप्। गर्भिण्यां जीवतभर्तृकायांवपकृतिभागोनिपात्यते। तत्रान्तस्यस्यांगर्भइति विग्रहे अंतः शब्दस्याधिकरणशक्तिप्रधानतया अस्तिसा
मानाधिकरण्याभावादपाप्तोमतुप्निपात्यते। पतिवत्नीत्यत्रतुवत्वंनिपात्यते। अंतर्वत्नी। पतिवत्नी। पत्युसाहरणंतु। अन्तरस्यांशालायांघटः। पतिमती। पृ
थिवी। पत्युर्नोयज्ञसंयोगे। पतिशब्दस्यनकारादेशः स्याद्यज्ञेनसंबंधे। वशिष्ठस्यपत्नी। तत्कर्तृकयज्ञस्यफलभोक्त्रीत्यर्थः। दंपत्योः सहाधिकारता। विभाषासपू
र्वस्य। पतिशब्दांतस्यसपूर्वस्यप्रातिपदिकस्यनोवास्यात्। गृहस्यपतिः। गृहपतिः। गृहपत्नी। अनुपसर्जनस्येतीहोत्तरार्थमनुवृत्तमपिनपत्युविशेषणम् किंतु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=पालिग्रहणाश्रया सिद्धिभाक्:१

एकपत्नी।वीरपत्नी३

तरनात्यातेनबहुव्रीहावपि।दृढपत्नी।दृढपतिः।वृषलपत्नी।वृषलपतिः।अथवृषलस्यपत्नीतिव्यस्तेकृतेसतिवेत।पत्नीवपत्नीत्युपवादात।यद्वा।आवारक्तिवना
त्कर्त्तारिक्विप।अस्मिंश्चपक्षेपत्नियोपत्नियइतीयं ङीविषयेविशेषः।सपत्न्यस्यकिमागवापतिःस्त्री।नित्यंसपत्न्यारिष्टा।एवंविकल्पापवादः।समानस्यसमभावोविनिपात्य
ते।समानःपतिर्यस्याःसासपत्नी।एतत्क्रतोस्त्वाइयंत्रिस्त्रीपुंयोगएवेष्यते।एतत्क्रतोःस्त्रीएतत्क्रतायी।यथायत्क्रतवःएताःएतत्क्रतुरेषा।वृषाकपयग्निकुसितकुसिद
नामुदात्तः।एषामुदात्तएआदेशःस्यान्ङीप्वावृषाकपेःस्त्रीवृषाकपायी।हविष्मद्वृषाकपीत्यमरःवृषाकपायीश्रीगौर्योरितिवा।अग्नायी।कुसितायी।कु
सिदायी।कु
सिदायी।हस्वमध्योनतरीघमध्यः।मनोरोवा।मनुशब्दस्याकारःस्यादुदात्तेकारस्थवाताभ्यांसन्नियोगशिष्टोङीप्वामनोःस्त्रीमनायी।मनावी।मनुः।वर्णादनुदा
त्तोनः।वर्णावर्वीयोनुदात्तांतस्तोपधस्तदन्तादनुपसर्जनात्याप्तिपदिकाद्वाङीप्यात्तकारस्यनकारादेशश्चाएता।एनी।तेहिता।सेहिती।वर्णानातणतिनि
ता न्ता नामितिफिट्सूत्रेणाद्युदात्तः।श्रेणाचशलत्येतिगृह्यम्।त्रीण्येतानियस्याइतिबहुव्रीहिः।अनुदात्तान्ताक्तिम।श्वेता।घृतादीनांवेत्यनोदात्तोयम।अत

४।१।३९
न्तान्तोप

रामः
५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=बहुवदित्यर्थः३

इत्येव। शिति: स्त्री। पिशंगा दुपसंख्यानम्। पिशंगी। पिशंगा। असितपलितयोर्न। असिता। पलिता। छंदसि क्रमेके। असिक्नी। पलिक्नी। अवदात
शादक्तनवर्णवाची किंतु विशुद्धवाची तिनावदातेत्येव। अन्येतोऽङीषातोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्पातिपदिकात्त्रियांङीष्स्यात्।
कल्माषी। सारंगी। लघावंतेद्वयोश्चबहुषोपुरुरिति मध्योदात्तावेतौ। अनुदात्तान्तात्किम्। कृष्णा। कपिला। षिद्गौरादिभ्यश्च। षि द्योगौरा
दिभ्यश्चङीषुस्यात्। नर्त्तकी। गौरी। अनडुही। अनड्वाही। पिपल्यास्त्यश्च। आकृतिगणोयम्। सूर्यतिष्यागस्त्यमत्स्यानांयउपधायां। अगस्त्योपधा
यायस्य लोपः स्यात्स वेद्यः सूर्याघवयवः। मत्स्यस्य ङ्याम्। सूर्या। गस्त्ययोश्छन्दसि वा। तिष्यपुष्ययोर्नक्षत्रात्तिष्यलोपश्चेति वाच्यम्। मत्सी। मातरिषिश्चेति षि
त्वादेवसिद्धे गौरादिषु मातामही। श्राद्धपाठादनित्यं षितांङीष्। दृष्टा। जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककवराइत्यमत्रावपना
कृत्रिमाश्राणास्थोल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु। एकादशभ्यः क्रमाद्धृत्यादिष्वर्थेषुङीष्स्यात्। जानपदी वृत्तिश्चेत्। अन्या

४।१।४२

=वृषस्त्रीवाचकाद्योऽयस्तत्रत्यर्थः३

=शिष्यमाणाध्यायः ४ = मसंगाद्वाक्ये शिष्यमस्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=कुंडीकमंडलौ जाराण्यतिवनीसुतेपुमानितिमेदिनी २ अत्रीकमण्डलुः कुंडइत्यमरः २ =मुख्यार्थस्यनुज्ञातित्वात्सिद्धमितिभावः ३ =गौरणत्वेप्यपदकार्यत्वात्सर्व

तिरितिभावः ३

नुजानपदी। उत्सादित्वादञंतत्वेनङि ङीतिङी। पाशुसक्तः कुंडी अमत्रं वेत्ता कुंडान्या। कुडिदाहे। णो अहलइत्यप्रत्ययः। यक्तु अमत्रे जाजः कुंडइतिमनुष्यजाति लक्षणोङीषभवत्येव। अमत्रेहित्री विषयत्वात्स्यात्तोङीषविधीयते ननु नियम्य ० नो। गो। णी। आवपनं वेत्ता गोरणान्या। स्थली अकृत्रिमा वेत्ता स्थलान्या। भाजी ओरणावेत्ता भाजान्या। नागी स्थलावेत्ता नागान्या। गजवावी नागशरः स्थो त्वगुणायोगादन्यत्रप्रयुक्त उदाहरणम्। सर्पवावी तु दैर्घ्यगुणायोगादन्यत्रप्रयुक्तः प्रयुदाहरणम्। काली वर्णाश्वेता। कालान्या। नीली अनाच्छादनं वेत्ता नीलान्या। नील्या रक्ता शाटी त्यर्थः। नील्या अन्यक्तु इत्यनाअनाच्छादनेपि सर्वत्र किंतु नीलादोषधौ। नीली प्राणिनि वा नीलीगोः संज्ञायां वा नीली। नीला कुशी अयो विकारश्वेता कुशान्या। कामुकी मैथुने छावती वेत्ता कामुकान्या। कवरी केशानां सन्निवेशविशेषश्वेता कवरान्या। वित्रे त्यर्थः। शोणा त्वा वामत्रो णी। शोणा वा तेणवनात। उदनाकुणा वा विनो वाङीषस्यात। मृद्वी। मृदुः उतः किमा श्रविः णोति किमा श्रावुः। वरुसंयोगोपधान्नावरुः यति वाकन्या। पांडुः

४।१।४४ +न ३ =अन्यतरीतिप्राप्तेप्राप्तमेवेतिनियमार्थम् २

=सत्वेनिविशतेयेति पृथक्जातिषु दृश्यते· आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः· संज्ञा जातिक्रिया यादृच्छिकान्येगुणवाचिनइत्यर्थः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+ पद्धती। पद्धतिः = आख्यायामिति पक्षस्य सपूर्वा आख्यायां किम् प्रसृता = अहंशदस्य बहुत्वे ङी। इदीर्घी ह्रीप्राटट्। १८ = पुंयोगाद्धेतोः प्रकृतिनिमित्तारोपेण स्त्रियां वर्त्त

मानानां पुंवद्भावः यन्ती। विषयं पुंयोगाद्धेतोः

४।१।४५

वहादिभ्यश्च वह्री। वहुः। ऋदिका। रात्रिः। रात्री। सर्वतो क्तिन्नर्थाद्द्वियेके। शकटिः। शकटी। अक्तिन्नर्थात्किम्। अजननिः। क्तिन्नन्तात्पाप्येविध्यर्थपदेति शयोगात्पक्षे तौ हि मकाषि हतिषु चेति पक्षावः। पुंयोगादाख्यायामाख्यपुमाख्यपुंयोगात्त्रियां वर्त्ततेततोङीष्स्यात्। गोयस्य स्त्री गोपी। पालकां तान्नालोपालिका। अश्वपालिका। सूर्यादेवतायां वा पक्षे वा यः। सूर्यस्य स्त्री देवता सूर्या। देवतायां किम्। सूरी। कुंती। मानुषी यम। इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक। एषामानुगागमः स्यान्ङीषि परे। इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोगएवेष्यते। तत्रङीषि विभिद्रे आनुगागमभावं विधीयते। इतरेषां वनस्त्रीणामुभयमानुगागमः। हिमारण्ययोर्महत्वे। महद्धिमं हिमानी। आरण्यानी। यवाद्द्वेषे दुष्टो यवोयवानी। यवनाद्स्त्रियामाख्यवमानालिपिर्यवनानी। मातुलोपाध्यायोरानुकवा। मातुलानी। मातुली। उपाध्यायानी। उपाध्यायी। यानुक्त्वयमेवाध्यापिकातत्रवाङीषुवाच्यः। उपाध्यायी। उपाध्याया। आचार्यादणन्तश्च। आचार्यस्य स्त्री आचार्यानी। पुंयोगएवेष्यते। नेह। आचार्या स्वयं व्याख्यात्री। अर्थक्षत्रियाभ्यां वा स्वार्थे।।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=अर्थः स्वामिवैश्ययोरित्यर्थद्वयेऽपि वात्तनादिति भावः १

=कर्तृकरणेत्यत्र बहुलग्रहणाद्भक्तिकाकेत्यस्य कविदघ्नो सुवन्तेनसमासेतरत्रेति पि अदन्तत्वाभावान्नङीषिति भावः २ =अस्वांगं वतत्सर्वपदं वतत्सादिति कर्मधारयः ४ = [illegible]

+दन्तो दात्ता ३

४।१।५०

अर्यायाणी। अर्या। स्वामिनी वैश्या वेत्यर्थः। क्षत्रियाणी। क्षत्रिया। पुंयोगेतु। अर्यी। क्षत्रियी। कथं ब्रह्माणी। ब्रह्माणमानयति जीवयतीति कर्मण्यण्। क्रीतात्करणपूर्वात्। क्रीतान्नादन्तात्करणादेः स्त्रियां ङीष्स्यात्। वस्त्रक्रीती। क्रविन्नाधनक्रीता। कार्ष्ण्यायायाम्। करणादेः किम्। नादन्तात्स्त्रियां ङीष्स्यात् अ त्यत्वेद्योत्ये। अभ्रलिप्तीद्योः। बहुव्रीहेश्चान्तोदात्तात्। बहुव्रीहेः किम्। नादन्तात्स्त्रियां ङीष्। जातिपूर्वादिति वक्तव्यम्। ते मबहुनस्मुकालमुखादिपूर्वान्। ऊ रुभिन्नी। नेहा। बहुकृता। जाता। नान्नादन्तजाता। पाणिगृहीती। भार्यायाम्। पाणिगृहीतान्या। अस्वांगपूर्वपदाद्वा। पूर्वेण नित्ये प्राप्ते विकल्पोयम्। सुरापीती। सुरापीता। अनोदात्तकिम्। वस्त्रच्छन्ना। अनाच्छादनादिति उदात्तनिषेधः। अतएव पूर्वेणापि नङीष्। स्वांगाच्चोपसर्जनादसंयोगोपधात्। असंयोगोपध मुपसर्जनं यत्स्वांगं तदन्नादन्तात्स्त्रियां पदिकाद्वा ङीष्स्यात्। केशान्तिकान्ता अतिकेशी। अतिकेशा। बहुमुखी। बहुमुखा। असंयोगोपधात्तु सुगुल्फा। उपसर्जनान्किम्। शिखा। शोभना शिखा सुशिखा। स्वांगं त्रिधा। अङ्गवन्मूर्तिमत्स्वांगं प्राणिस्थमविकारजम्। सुखेदाङ्गवत्। सुज्ञाना। अमूर्तत्वात्।

+त्ता ३

=स्त्रीवद्व्यपरिमाणमूर्तिः १ =घ्राणनासिकासंचारी वायुः प्राणः २ =एतेन विकल्पोपयं जातिपूर्वादेवेति ज्ञापितम् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=येनांगेन पाणिरूपं वस्तु यथा युतं तेन तत्सदृशेन अंगेन तत्पाणिवद्युतं युक्तं वेत्तदपि पाणिनिदृष्टं स्वांगमित्यर्थः २ = मध्येपवादाः पूर्वान्विधीन्बाधंते नोत्तरानिति ३
= सुरं पूर्वलक्षणेन पाणिस्थलमुपलक्षयेत्पाणिमित्यत्र तात्पर्यग्राहकमिति भावः ॥

सुमुखशाला। अपाणिस्थत्वात् सुशोफ्रा विकाजत्वात्। अतत्स्थं तत्रदृष्टं च सकेशी। सुकेशा वाख्या। अपाणिस्थस्यापि पाणिनिदृष्टत्वात् तेन वेत्त
तथा युतम् सुस्तनी। सुस्तनावा प्रतिमा। पाणिवत्पाणिसदृशे स्थितत्वात्। नासिकोदरोष्ठजघादंतकर्णशृंगाच्चाण्योवाङीष्। आद्ययोर्बहुजल
क्षणो निषेधो बाध्यते। पुरस्तादपवादन्यायात्। ओष्ठादीनां पवर्गानां तु असंयोगोपधादिति बाध्यते। मध्येपवादन्यायात्। महनजलक्षणास्तु प्रति
षेधः परत्वादस्य बाधकः। तुंगनासिकी। तुंगनासिका। इत्यादि। नेह। सहनासिका। अनासिका। अत्र वृत्तिः। अंगात्रकंठेभ्यो वक्तव्यम्। खंगी। ख
गेत्यादि। एतच्चानुक्तसमुच्चयार्थं नकारेणासंग्राह्यमिति केचित्। भाष्याद्यनुक्तत्वादपमाणमिति पामागिकाः। अत्र वार्त्तिकानि पुच्छाच्च। सपु
च्छी। सपुच्छा। कवरमणिविषशारभ्यो नित्यम्। कवरं चित्रं पुच्छं यस्याः साकवरपुच्छी। उपमानात्पक्षाच्च पुच्छाच्च। नित्यमित्येव उल्लूकपक्षी शाला।
उल्लूकपुच्छी सेना। नक्रोडादिबहुवः। क्रोडादेर्बहुवश्च खांगान्ङीष्। कल्याणक्रोडा। अश्वाभमुखः क्रोडा। आकृतिगणोयम्। सुजघना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=फलं तु प्राप्युत्पन्नादौ वोध्यं २ =षट्लिंगानामिति केचिल्लिंगांतररहितमित्यादित्यर्थः ४

४।१।५७ ४।१।५८

सहनञ्विद्यमानपूर्वाच्च। सहेत्यादि त्रिकपूर्वान्ङीष्। सकेशा। अकेशा। विद्यमानं नासिका नासिकावत्संज्ञायाम्। नङीष्यात्। अर्थ एव। गौरमुखा। संज्ञायां किम्। ताम्रमुखी कन्या। दिक्पूर्वपदान्ङीप्। पादिकपूर्वपदात्त्वागात्प्रातिपदिकात्परस्य ङीषो ङीबादेशः स्यात्। षाड्गवी। आद्युदात्तपदमावाहः। वाहन्तात्प्रातिपदिकान्ङीष्यात्। ङीषेवानुवर्त्तते नङीप्। इत्यवाङ्मो इत्योहीवमे। मार्या। शिश्वी। तिभाषायाम्। इति शब्दः प्रकारे भाषायामित्यस्यानंतरं द्रष्टव्यः। तेन छंदस्यपि क्वचित्। मखी। अशिश्वी। आधेनवोधुनयन्नामशिश्वी। जातेरस्त्रीविषयादयोपधात्। जातिवाचिनश्चेत्रियां नियतमयोपधान्तः स्त्रियां ङीष्यात्। आकृतिग्रहणा जातिः। अनुगतसंस्थानयोगीत्यर्थः। तिटी। लिंगानां वनसर्वभाक्। सकृदाख्यातनिर्ग्राह्या। असर्वलिंगत्वे सत्येकस्याख्यक्तौ कथना द्यत्तंतरे कथनं विना विसंग्रहा जातिरतिलक्षणा। नन्तरमावृषली। सत्यन्ता किम्। शुक्ला। सकृत्यादि किम्। देवदत्ता। गोत्रं ववरणे। सह। अपत्यप्रत्ययान्तः शाखाध्येतृवाचिशब्दो जातिकार्यं लभत इत्यर्थः। औपगवी। कठी। व

=कुरोल्पुरः आकृतिर्ग्रहणं यस्या इति ३ =अनुज्ञात ३ +वी १ =दिग्दाक्षारागो रित्याकेत्युपदेशादिव्यंगोत्पर्थः ३

=एकस्यां व्यक्तौ बहुत्वे कथिते तदपत्यतत्सहोदरादेः कथनं विना विसंग्रहत्वात् २
तस्य २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=गानेरित्यनुवृत्तेपुनर्ग्रहणादितिभावः४

हूयी। ब्राह्मणीत्यत्रानुशाङ्गरवादिषाठान्ङीनाङीष्वाध्यते। जातेः किम्। सुराडा। अस्त्रीविषयात्किम्। बलाका। अयोपधात्किम्। क्षत्रिया। योपधप्रतिषे
धे गवयहयमृकयमनुष्यमत्स्यानामप्रतिषेधः। गवयी। हयी। मृकयी। हलन्ताद्धितस्येतियलोपः। मनुषी। मत्स्यस्य ङ्याम्। मत्स्ती। पाककर्णपर्णापुष्प
फलमूलवालोत्तरपदाच्च। पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष्स्यात्। ओदनपाकी। शंकुकर्णी। शालपर्णी। शंखपुष्पी। दासीफ
ली। दर्भमूली। गोवाली। ओषधिविशेषरूढाएते। इतोमनुष्यजातेः ङीष्स्यात्। दाक्षी। योपधादपि। उदमेयस्यापत्यमौदमेयी। मनुष्यातिकि
म्। तित्तिरिः। ऊङुतः। उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ्स्यात्। कुरुः। कुरुनादिभ्योण्यन्तस्य स्त्रियामवन्तीत्यादिनाल
क्। अयोपधात्किम्। अर्चयुर्ब्राह्मणी। अप्राणिजातेश्चाज्वादीनामुपसंख्यानम्। ज्वादिपर्युदासादुवर्णान्तेभ्यएव। अलाबू। कर्कन्धू।
अनयोर्दीर्घान्तत्वेपिनोङ्। धात्वोरितिविभक्त्युदात्तप्रतिषेधऊङः फलम्। प्राणिजातेस्तु। कुरुकवाकुः। ज्वादेस्तु। ज्वुः। हनुः। वाहून्नात्संज्ञा

=इतः किम्-रादू३

=दीर्घोच्चारणंनुपश्लेषेणबहुव्रीहौकबाधनार्थम्-३ नेनवह्म्यवंधूरित्यादि

सिद्धं-क्वधूरितिनुमपुरःक्वधूतिनिर्देशात्सिद्धमितिभाष्यं-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्री०प्र०सु०
सि०कौ०सु०
५५

= भर्तृ:४

= गुणवाचीशब्द

४।१।६८ मान२

यामा। स्त्रियामूङ्। भद्रबाहू:। संज्ञायां किमा। वृत्तबाहू:। पाणौ श्वा पंगू:। श्वश्रूस्योकारा काल्लोपश्चा। वा दूङ्। पुंयोगलक्षणा ष्यङी। षोपवाद:। लिं
गविशिष्टपरिभाषया चादय:। श्वश्रू:। ऊरूत्तरपदादौपम्ये। उपवा विपर्वपदं ऊरूत्तरपदयत्प्रातिपदिकं तस्मादूङ् स्यात्। कदमोरू:। संहितशफलक्ष
णा वामादेश्च। अनौपम्यार्थं सूत्रम्। संहितोरू:। सैव शफोरू:। शफो खुरो तावेव माश्लिष्टत्वादुपचारात्। लक्षणा शब्दार्थ आश्रयो लक्षणोरू:। वामो
रू:। संहितमहाभ्यां वेति वक्तव्यम्। हितेन महसा सहितो ऊरुर्यस्या: सा सहितोरू:। महतेदं इति महो ऊरुर्यस्या: सा महोरू:। यद्वा। विद्यमानवनस्य स
हचारस्य ऊर्वेति शायपप्रतिपादनायप्रयोग:। संज्ञायां कडारमंडल्वो:। संज्ञायां स्त्रियामूङ्। कडारू:। कमंडलू:। संज्ञायां किमा। कडारु:। कमंडलु:। अच्छ
दोर्घववनमाशार्ङ्गरवाद्यर्थं। नाशार्ङ्गरवादेरजोयोऽकारस्तदन्ताच्च जातिवाचिनोऽङी न्यात्। शार्ङ्गरवी विदी। जातेरित्यनुवृत्ते: पुंयोगेऽङीषेव। नन
यो: वृद्धिश्चेति गणसूत्रम्। नानी। यङश्चाप्। यङ: नात्रियां वाप्यात्। व्यङ्ष्यङो: सामान्यग्रहणम्। आवश्यकाधिकारिणाध्यापाद्यजश्चाद

४।१।७०

= रीतिश्रमं ४

४।१।७८

= पुत्रशब्दोऽत्रपद्यनेतत्सामर्थ्यात्प्रातिपदिकत्वाभावोपपत्ति: आवश्यं ज्ञरसेनीति२

२= मंडूकपू सेतिभाव: इदं केयटानुसारेण

रामठ
५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=प्रातिपदिकार्थं विना लिंगादिप्रतीतेरसंभवात् आधिक्ये इत्युक्तं ३

=यस्मिन् प्रातिपदिके उच्चारितेयस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थः ३

+परिमाण ३

४।१।७५ ४।१।७६ ४।१।७७

वाच्यः। पौतिमाष्यः। आवद्यात्। अस्मात्। पुस्यात्। यत्र श्रेतिः। पोपवादः। अवटशरो गार्गादिः। आवद्यात्। तद्धिताः। आर्यवमसमाप्तेरधिकारोयमाद्यन्तिः॥
युवन्शब्दात्तिप्रत्ययः शातमवतद्धितः। लिंगविशिष्टपरिभाषयापि द्वितद्धिताधिकारउक्तार्थः। युवतिः। अनुपसर्जनादित्येव। बहवः युवानो यस्यासावहुयु
वा युवती तितुयौतेः शत्रन्तान्ङीपि बोध्यम्॥ ॥इति स्त्रीप्रत्ययाः॥ ॥प्रातिपदिकार्थलिंगवचनमात्रे प्रथमा। नियतोपस्थितिकः प्रातिपदिकार्थः। मा
त्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिंगमात्रे आद्याधिक्ये संख्यामात्रे च प्रथमास्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। अलिंगानि यत्र लिंगाश्च
प्रातिपदिकार्थमात्रे इत्यस्योदाहरणम्। अनियतलिंगाः स्त्रीलिंगमात्राद्याधिक्यस्यात्। तटः। तटी। तटम्। परिमाणमात्रे। द्रोणो व्रीहिः। द्रोणं रूपयत्यपि मा
[redacted]णं तत्परिच्छिन्न इत्यर्थः। प्रत्ययार्थपरिमाणे प्रकृत्यर्थाभिन्ने संसर्गेण विशेषणम्। प्रत्ययार्थस्य परिच्छेद्यपरिच्छेदकभावेन बहुव्रीहौ विशेषण
मिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इह उक्तार्थत्वाद्विभक्तेस्त्वाप्नोति वचनमात्रे बोधने वा इह प्रथमास्यात्। हे राम। कारके इत्यधिकृत्य कर्तरी

२।३।४७ १।४।२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=अधिशीङ्स्थासां कर्मेति सूत्रात् २

=अवयवद्वारा समुदायस्य षष्ठ्या कर्तुरुद्देश्यं कर्मैवेत्यस्तीति भावः २

१४४४९

षितत्तमं कर्म। कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। कर्तुः किमाप्तुमिष्टतमं भवति। कर्मणा ईप्सिततमाणां कर्तुः। तमुपग्रहणं किमाप्यमाणो रथं भुंक्ते।
कर्मेत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्। अनभिहित इत्यधिकृत्य कर्मणि द्वितीया। अनुक्ते कर्मणि द्वितीया
स्यात्। हरिं भजति। अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे इति पक्षे एव। अभिधानं प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ्। हरिः सेव्यते। कृत्। लक्ष्म्या सेवितः। त
द्धितः। शतेन क्रीतः। शत्यः। समासः। प्राप्तं आनन्दोऽयं प्राप्तानन्दः। क्वचिन्निपातेनाभिधानम्। यथा विषस्योपमं कर्ता विषयं हेतुमसांप्रतमसांप्रतमित्यस्य हि
युज्यते इत्यर्थः। तथा युक्तं वानीप्सितम्। ईप्सिततमवत् क्रिया यया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छन् तृणं स्पृशति। ओदनं भुंजानो विषं भुंक्ते।
अकथितं वा। अपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्यात्। दुह्याद्यर्थवदुक्तं धिषिचिशासिजिमथ्यमुषाम्। कर्मयुक्तं स्यादकथितं तथा स्यान्नी
हृकृष्वहाम्। ॥ दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेव कथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं या
चते वसुधाम्॥

=अविवक्षितं २

=तेन नटस्य प्रत्यक्षस्येत्यादौ नातिप्रसंगः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=नंतस्वरूपाश्रयाअहमपिदुर्दैवोद्यंबोधेइतिनद्राजसूत्रेभाष्ये पर्यायस्यचुदेरपिहिकर्मत्वदर्शनादितिभावः २

=क्रिया३

वतेवसुधाम्। अविनीतंविनयंयाचतेतंदुलानोदनंपचति। गर्गानशतंदंडयति। व्रजमवरुणद्धि। ग्रामंमाणवकंपंथानंपृच्छति। वृक्षमवचिनोतिफलानि। माणवकंधर्मंब्रूते। शतंजयतिदेवदत्तम्। सुधांक्षीरनिधिंमथ्नाति। देवदत्तंशतंमुष्णाति। ग्रामंमजानयतिहरतिकर्षतिवहतिवा। अर्थनिबंधनेयंसंज्ञा। बलिंभिक्षते वसुधाम्। माणवकंधर्मंभाषतेअभिधत्तेवक्तीत्यादि। कारकंकिम्। माणवकस्यपितरंपंथानंपृच्छति। अकर्मकधातुभिर्योगेदेशःकालोभावोगंतव्योचाकर्मसंज्ञकइतिवाच्यम्। कुरून्वसतिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्तासणौ। गत्यादयोनांशब्दकर्मकाणामकर्मकाणांवाणौयःकर्त्तासणौकर्मस्थात्। शत्रुनगमयत्स्वर्गंविदर्भान्वानवेदयत्। आशयत्रामृतंदेवान्वेदमध्यापयद्विधिम्। आसयत्सालिलेपृथ्वीयःसमेश्रीहरिर्गतिः॥ ॥गतीत्यादिकिम्। माणवयत्योदनंदेवदत्तेन। आप्यन्तानाकिम्। गमयतिदेवदत्तोयज्ञदत्तमातमपरःपयुंक्ते। गमयतिदेवदत्तेनयज्ञदत्तंविष्णुमित्रः। नीवहोर्न। नाययतिवाहयतिवाभारंभृत्येन। नियंतृकर्तृकस्यवहेरनिषेधः। वाहयतिरथंवाहान्सूतः। आदिरवा

=भक्षणं४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=गतीतिसूत्रेऽकर्मकग्रहणम्वीजं३

+नर्थ

धर्म२

द्योर्न। आदयति खादयति वा अन्नं वटुना। भक्षेराहिंसार्थस्य न। भक्षयत्यन्नं वटुना। अहिंसार्थस्य किम्। भक्षयति वली वर्द्धनस्य म। जल्पति प्रभृतीनामुपसंख्यानम्। जल्पयति भाषयति पुत्रं देवदत्तः। दृशेश्च। दर्शयति हरिर्भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु द्विशेषार्थानामित्यनेन ज्ञाप्यते तेन नमरति जिघ्रत्यादीनाम्। माययति। आपयति देवदत्तेन। शरीरयति देवदत्तेन। धातवर्थसंपादितकर्मकत्वेनाकर्मकत्वात्प्राप्तिः येषां देशकालादि भिन्नकर्मसंभवति तेऽकर्मकाः। नत्वविवक्षितकर्मणोपि तिनमासमासयति देवदत्तमित्यादौ कर्मत्वं भवति देवदत्तेन पाचयतीत्यादौ तु न। हृक्रोरन्यतरस्याम्। हृक्रोरणौ कर्त्तावा कर्म स्यात्। हारयति कारयति वा भृत्यं भृत्यवा कटम्। अभिवादिदृशोरात्मनेपदेवेति वाच्यम्। अभिवादयते देवदत्तं देवदत्तो वा भृत्यं भृत्यवा। अधिशीङ्स्थासां कर्म। अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिशेते। अधितिष्ठति। अध्यास्ते वा वैकुंठं हरिः। अभिनिविशश्च। अभिनिविशते इत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गम्। परिक्रयणे सम्प्रदानमिति सूत्रारम्भे कुत्वाऽन्य

(१४४५३)

रामः
५७

=वरसंदेशवचनेबुद्धिः३ =सन्मार्गविषयकागृहवानित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=मशकार्थेधूमवत्

=वनेरन्यर्थस्यप्रतिषेधोवक्तव्यइतिवार्त्तिकम्·अर्थशब्दोनिवृत्तिपरः२ =इत्यर्थेषमिनिविष्टानामितिसमर्थसूत्रस्थभा= इदमपिवार्त्तिकम् १ व्यप्रयोगेत्रमानम्

+दिशु२

९।४।४८

तरस्यांग्रहणमनुवर्त्तयतिविभाषाअयणात्क्वचिन्नापेभिनिवेशः।उपान्वध्याङ्समः।उपादिपूर्वस्यवसतेराधारःकर्मस्यात।उपवसति।अनुवसति।
अधिवसति।आवसतिवावैकुंठंहरिः।अभ्यन्तरार्थस्यतुनावनेरुपवसति।उभसर्वतसोःकार्याधिगुपर्यात्रिषु।द्वितीयाम्रेडितांतेषुततोन्यत्रापिदृश्यते॥
उभयतःकृष्णंगोपाः।सर्वतःकृष्णम्।धिक्कृष्णाभक्तम्।उपर्युपरिलोकंहरिः।अध्यधिलोकम्।अधोधोलोकम्।अभितःपरितःसमयानिकषाहाप्र
तियोगेपि।अभितःकृष्णम्।परितःकृष्णम्।ग्रामंसमया।निकषा।हाकृष्णाभक्तम्।तस्यशोचतेत्यर्थः।बुभुक्षितंनप्रतिभातिकिंचित्।अंतरांतरेणयुक्ते।
आभ्यांयोगेद्वितीयास्यात्।अंतरात्वांमांहरिः।अंतरेणहरिंनसुखम्।कर्मप्रवचनीयाइत्यधिकृत्याअनुर्लक्षणे।लक्षणोद्योत्येऽनुरुक्तसंज्ञःस्यात।गत्यु
पसर्गसंज्ञापवादः।कर्मप्रवचनीययुक्तेद्वितीया।एतेनयोगेद्वितीयास्यात।जपमनुप्रावर्षत्।हेतुभूतजपोपलक्षितवर्षणमित्यर्थः।पराप्रिहेतोअनेन
तृतीयावाध्यतेलक्षणोत्थंभूतेत्यादिवासिद्धेपुनःसंज्ञाविधानसामर्थ्यात्।तृतीयार्थेआस्मिन्द्योत्येअनुरुक्तसंज्ञःस्यात।नदीमन्ववसितासेना॥

९।४।८५

=तवसमसमर्थेत्यर्थः२ =हरिंविनाइत्यर्थः३ =साहित्ये१ =ज्ञानजनकज्ञानविषयत्वं३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=कविवत्कार प्राप्तइत्यर्थः२ =व्यापकत्वं३

नद्यामहसंवद्धेत्यर्थः।विन्नवंधनेक्तः।हीने।हीनेद्योत्येऽनुःप्रावृत।अनहरिमुगः।हरेर्हीनाइत्यर्थः।उपोधिकेवा।अधिकेहीनेवद्योत्येउपेत्ययंपा क्तंइत्यः
स्यात।अधिकेसप्तमीवक्ष्यते।हीनेउपहरिमुगः।लक्षणोत्थंभूताख्यानभागवीप्सासुपतिपर्यनवः।एषर्थेषुविषयभूतेषुपत्यादयउक्तसंज्ञाःस्युःलक्ष
णोदृक्षपतिपरिअनुवाविद्योततेविद्युत।इत्यभूताख्यान।भक्तोविष्णुपतिपरिअनुवा।भागोलक्ष्मी।हरिपतिपरिअनुवा।हरेर्भागइत्यर्थः।वीप्सायांवृ
क्षं वृक्षंप्रतिपरिअनुवाभिवति।अत्रोपसर्गत्वाभावान्नषत्वम।एवंकिमापरिषिंवति।अभिरभागोभागवर्जेलक्षणेवभिरुक्तसंज्ञःस्यात।हरिमभि
वर्त्तते।भक्तोहरिमभि।देवंदवमभिसिंवति।अभागेकिम।यदत्रममाभिष्यात्तद्दीयतामम।अधिपरीअनर्थकौउक्तसंज्ञौस्तः।कुतोध्यागच्छति।कुतःपर्या
गच्छति।गतिसंज्ञावाधातुर्गतावितिनिघातोनामुःएजायांम।सुभिक्तम।सुक्तत्तम।अनुपसर्गत्वान्नषः।एजायांकिम।सुषिक्तंकितवात्रक्षिपोयम।
अतिरतिक्रमणेवा।अतिक्रमणेएजायांवातिःकर्मप्रवचनीयसंज्ञःस्यात।अतिदेवानकृष्णः।अपिःपदार्थसंभावनाऽन्वयसमुच्चयगर्हासमुच्चयेषु।एषु

=उपसर्गप्रादुर्भावस्तिर्यगतिषत्वं३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=कर्त्तृदौर्लभ्याद्भवनक्रियादौर्लभ्यं तद्दौर्लभ्यं द्योतयन्नपिशब्दोभवनक्रियावाचिनास्पादित्यनेनसंबध्यतइत्यर्थः १

=उत्कटकोटिकाशंका १=भवनक्रियासंभावनायांभवनविषयत्वादाहसंभावनायाश्चेत्यर्थः १=सर्पिर्वयवीबिंदुरवयवः २

=बिंदुः १

द्योतेष्वपिरुक्तसंज्ञःस्यात्।सर्पिषोपिस्यात्।संभावनायांलिङ्।तस्याएवविषयभूतेभवनेकर्त्तृदौर्लभ्यप्रयुक्तंदौर्लभ्यंद्योतयन्नपिश
ब्दःस्यादित्यनेनसंबध्यते।सर्पिषइतिषष्ठीतुअपिशब्दबलेनगम्यमानस्यबिंदोरवयवावयविभावसंबन्धे।इयमेवह्यपिशब्दस्य
पदार्थद्योतकतानाम।द्वितीयातुनेहप्रवर्त्तते।सर्पिषोबिंदुनायोगोनत्वपिनेत्युक्तत्वात्।अनुपसर्गत्वान्नषः।अपिरुक्तयाद्विरुक्त
संभावनंशक्तुत्वर्थमाविष्कर्त्तुमत्युक्तिः।अपिरुक्तहि।अन्वसर्गःकामचारानुज्ञा।धिग्देवदत्तअपिरुक्तयाद्वलमागहीं।अपिसिंच
अपिरुक्तहि।समुच्चये।कालाध्वनोरत्यन्तसंयोगे।इहद्वितीयास्यात्।मासंकल्याणी।मासमधीते।मासंगुडधानाः।क्रोशंकुटि
लानदी।क्रोशमधीते।क्रोशंगिरिः।अत्यन्तसंयोगेकिं।मासस्यद्विरधीते।क्रोशस्यैकदेशेपर्वतः॥स्वतन्त्रःकर्त्ता।क्रियायां

कर्तृप्रत्ययसमभिव्याहारेप्रधानभूतधात्वर्थाश्रयत्वे १=

=गुणक्रियाद्वयेरभावेनचतेनमासंभोजनाभावः २

=बुद्धिस्थगावदवयवसंबंधरूपाप्राप्तिर्द्वितीयार्थः २

=असंभावार्थस्यसंभावनमत्युक्तिर्वीरवानात् १

=इच्छायाघटनिः ३=बिंदुरेतिलम्पयुक्तंसेरोलम्पद्योतकं तेवेत्यर्थः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=कारकाधिकारात्करणाल्युडंतकरणेतिमहासंज्ञयाचसाधकत्वेलब्धेसाधकयहणमेवसाधकतमार्थमविष्यतीतिप्रश्नः उत्तरमिहप्रकरणेदारुसामर्थ्यगम्यप्रकर्षेणाश्रीयतेसूत्रिज्ञापनार्थंतेन
गंगायाःपरंपरयाघोषाधारत्वेपिअधिकरणसंज्ञाभवत्येवेति गौणमुख्यन्यायस्तत्रप्रवर्त्तते अस्त्यर्थात्तिलादिति दिक् अन्यथा तिलेषुतैलंदधिघृतमित्यादौ सर्वावयवव्याप्ताधारत्वंसंभवत्येवेतित्रैवसात्
= फलंगच्छते फलव्यापारद्वारोर्ध्वतुगच्छत्वात्॥ = कर्त्तोत्पत्तुकूलफलोत्पत्तयव्यवहितप्राग्वर्त्तिव्यापारआश्रयः

स्वातंत्र्येण विवक्षितोर्थः कर्त्ता स्यात्॥ साधकतमं करणं॥ क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। तमप्यग्रहणं किम्
गंगायां घोषः। कर्त्तृकरणयोस्तृतीया। अनभिहिते कर्त्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली। प्रकृत्यादि
भ्य उपसंख्यानम्। प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनेति। विषमेणेति। द्विष्टेन धान्यं क्रीणाति। सुखेना
दुःखेन वा यातीत्यादि। दिवः कर्म च। दिवः साधकतमं कर्म संज्ञं स्यात्। अक्षैः शान्वादीव्यति। अपवर्गे तृतीया
। अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। अह्नाक्रोशेन वानुवाको धीतः। फलप्राप्ति
किम्मासमधीतो नायातः। सहयुक्तेप्रधाने। सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सह गतः पिता। एवं साकं सा

= युक्तग्रहणाद्विशेषानादरेणार्थयोगे सत्यपि तदर्थकमतस्वक्तिक्रियायोगं विनापि भवतीन्यायसिद्धेर्थे लिंगमप्युक्तं द्रष्टव्यं इति

=पुत्रेण सहाप्रधानत्वं सहशब्दकरणे तत्रयुक्तर्त्तृत्वादिवसिद्धेरिति तस्य व्यापारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

= आक्षिनायुणक्रिये ५ इत्यत्रितयजनकलेसतिव्यापारानियतं हेतुत्वं हेतुत्वशक्तिरन्तरीयार्थइति

= लेशतोपिदत्तीनसामर्थ्यहीनत्वं २ अवयवधर्मस्यसमुदायेआरोपाच्छरीरेव्यवहारः २

= अंगशब्दोऽर्थआद्यज्ञानः २ = अंगग्रहणप्रयोजनप्रश्नः २

२।३।२०

ङ्गसंयोगेपि। विनापितद्योगंतृतीयास्यात्। कृद्योगे तिनिर्देशात्। येनाङ्गेन विकारः। येनाङ्गेन विकृतेनाङ्गिनो विकारोलक्ष्यतेततस्तृतीयास्यात्। अक्ष्णाकाणः। अक्षिसंबंधिकाणत्वविशिष्टमित्यर्थः। अङ्गिविकारः किं। अक्षिकाणमस्य। इत्थंभूतलक्षणे। कंचित्प्रकारं

२।३।२१

प्राप्तस्यलक्षणेतृतीयास्यात्। जटाभिस्तापसः। जटाद्याप्यतासत्वविशिष्टइत्यर्थः। संज्ञोन्यतरस्याकर्मणि। संज्ञर्वस्यजानातेः कर्मणितृतीयास्याद्वा। पित्राषितरंवासंजानीते। स्तोहित्वर्थेतृतीयास्यात्। द्व्यादिसाधारणनिर्व्यापारसाधारणश्चहेतुलक्षणकरणत्वन्तु क्रियामात्रविषयंव्यापारनियतञ्च। दंडेनघटः। पुष्पेनदृष्टोहरिः। फलमपीहहेतुः। अध्ययनेनवसति। गम्यमानापिक्रियाविभक्तेः प्रयोजिका। अलंश्रमेण। श्रमेणसाध्यंनास्तीत्यर्थः। इहसाधनक्रियांप्रतिश्रमःकरणम्। शतेनशतेनवत्सान्यायपतिपयः। शतेनपरिक्रीतेत्यर्थः। अशिष्टव्यवहारेदाणःप्रयोगेचतुर्थीतृतीया। दास्याः संयच्छतेकामुकः। धर्मेतुभार्यायेसंयच्छति। कर्मणा

= संक्रीणीचाराः १

= पुष्पेनगौरवरणीत्यादि ३ = दासीसंप्रदानकरतिफलकंदानमितिबोधः १

= कैयटानुसारेणेत्यस्यसिद्धान्तहरादानकलातृतीयाप्रातार्थं चतुर्थ्यपिभवतीति ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=अभिलषतिकर्त्रपेक्षयाधरल्पदाभिलषतिकर्मतत्कर्तृकरूपर्थः यत्किंचिद्विषयकधीत्वनुकूलव्यापाराश्रयोभिलषतिकर्त्ताहरिर्भक्तिमभिलषतीतिप्रत्ययात्॥४

=कर्मरहितया क्रिययेत्यर्थः॥ अन्वर्थसंज्ञावलेनाह॥ दाधातवर्थसेत्यर्थः॥ इदं क्रियामात्रस्योपलक्षणं॥

=दानार्थकयज्ञधातुविषयकमिदंप्रयोगानुसारेण॥२

१४।३२ यज्ञेः२ २।३।१३

यममभिप्रैतिसंप्रदानमादानस्यकर्मणायमभिप्रैतिसंप्रदानसंज्ञःस्यात्। चतुर्थीसंप्रदाने। विप्रायगांददाति। अनभिहितेइ
त्येवदानीयोविप्रः। क्रिययायमभिप्रैतिसोपिसंप्रदानम्। पत्येशेते। कर्मणाःकरणसंज्ञासंप्रदानस्यचकर्मसंज्ञा। पशुनारुद्रय
जते। पशुंरुद्रायददातीत्यर्थः। १४।३३ रुच्यर्थानांप्रीयमाणः। रुच्यर्थानांधातूनांप्रयोगेप्रीयमाणोर्थःसंप्रदानंस्यात्। हरयेरोचतेभक्तिः
। अन्यकर्तृकोभिलाषोरुचिः। हरिनिष्ठप्रीतेर्भक्तिःकर्त्री। प्रीयमाणः किम्। देवदत्तायरोचतेमोदकःपथि। १४।३४ श्लाघ्हुङ्स्थाशपांज्ञी
प्स्यमानः। एषांप्रयोगेवोढ्यथितुमिष्णःसंप्रदानंस्यात्। गोपीस्मरात्कृष्णायश्लाघतेहुतेतिष्ठतेशपतेवाज्ञीप्स्यमानेः किं देवदत्ता
यश्लाघतेपथिधारेरुत्तमर्णः। १४।३५ धारयतेःप्रयोगेउत्तमर्णउक्तसंज्ञःस्यात्। भक्ताय धारयतिमोक्षंहरिः। उत्तमर्णः किं देवदत्ताय
शतंधारयतिग्रामे। स्पृहेरीप्सितः। स्पृहयतेःप्रयोगेइष्टःसंप्रदानंस्यात्। पुष्पेभ्यःस्पृहयति। ईप्सितःकिं पुष्पेभ्योवनेस्पृहयति। ई
१४।३६

=अवश्यपरेयप्रतिगृहीतामोक्षस्याप्यवश्यपरेयतेनसमवायसंबंधावच्छिन्नप्रीत्यनुकूलव्यापारार्थकारणाश्रयोगेसमवायसंबंधेनप्रीत्याश्रयःसंप्रदानमित्यर्थः॥५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=फलाश्रत्वेनविवक्षायामितर्थः२ =अत्रनकोपजन्याईर्ष्याकर्तृत्वंपुरुषदर्शनतन्येतिभावः२

क्षितमात्रेइयंसंज्ञा।प्रकर्षविवक्षायांपरत्वात्कर्मसंज्ञा।पुष्पाणिस्पृहयति।क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपः।क्रुधाद्यर्थानांप्रयो
गेयंप्रतिकोपःसउक्तसंज्ञःस्यात्।हरयेक्रुध्यति।द्रुह्यति।ईर्ष्यति।असूयति।यंप्रतिकोपःकिम्।भार्यामीर्ष्यति।मैनामन्योऽद्र
क्षीदिति।क्रोधोप्रर्षः।द्रोहोपकारः।ईर्ष्याक्षमा।असूयागुणेषुदोषाविष्करणम्।द्रोहस्योपिकोपप्रभवाएवगृह्यन्तेतो
विशेषणंसामान्येनयंप्रतिकोपइति।क्रुधद्रुहोरुपसृष्टयोःकर्म।सोपसर्गयोरनयोर्यंप्रतिकोपस्तत्कारकंकर्मसंज्ञंस्या
त्।क्रूरमभिक्रुध्यति।अभिद्रुह्यति।राधीक्ष्योर्यस्यविप्रश्नः।एतयोःकारकंसंप्रदानंस्यात् यदीयोविविधःप्रश्नःक्रियते।
कृष्णंराधयति।ईक्षतेवा।पृष्टोगर्गःशुभाशुभंपर्यालोचयतीत्यर्थः।प्रत्याङ्भ्यांश्रुवःपूर्वकर्त्ता।आभ्यांपरस्यश्रृणोतेर्यो
गेपूर्वस्यप्रवर्त्तनरूपव्यवहारस्यकर्त्तासंप्रदानंस्यात्।विद्यार्थिनेप्रतिशृणोति।आशृणोतिवा।विप्रेणमह्यंदेहीतिप्रव

=क्रियाः =वैयाकरणानिकायेएवमस्तदर्थकत्वेप्रसिद्धः४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=संपत्तिरिणभूतशाकुनिकः४ =ओघामोदेवेतिवदति२ =उपकार्योपकारकभावःसंबंधः३
=पाणिनेःपठति२

र्नितः प्रतिजानीतइत्यर्थः। अनुप्रतिगृणाश्च। आभ्यांगृणातेःकारकंपूर्वव्यापारस्यकर्तृभूतमुक्तसंज्ञंस्यात्। होत्रेअनुगृणाति प्रतिगृणाति। होताप्रथमंशंसतिनमध्वर्युःप्रोत्साहयतीत्यर्थः। परिक्रियतेसंप्रदानमन्यतरस्याम्। नियतकालंभृत्यास्वीकरणंपरिक्रयणं। तस्मिन्साधकतमंकारकंसंप्रदानसंज्ञंवास्यात्। द्वातनक्रीतायवापरिक्रीतः। तादर्थ्येचतुर्थीवाभावे। मुक्तयेहरिंभजति। ऋषिसंपद्यमानेच। भक्तिर्ज्ञानायकल्पते। संपद्यतेजायतइत्यर्थः। उत्पातेनज्ञापितेचवातायकपिलाविद्युत्। क्रियायोगेचब्राह्मणायहितं। क्रियार्थोपपदस्यचकर्मणिस्थानिनः। क्रियार्थाक्रियाउपपदंयस्यतस्यस्थानिनोऽप्रयुज्यमानस्यतुमुनःकर्मणिचतुर्थीस्यात्। फलेभ्योयातिफलाय्यहर्तुमित्यर्थः। नमस्कुर्मोनृसिंहायनृसिंहमनुकूलयितुमित्यर्थः। एवंस्वयंभुवेनमस्कृत्येत्यादावपितुमर्थाद्भावेवचनोत्। भाववचनाद्धेतिसूत्रेणविहितो

=पाणिनीयभाष्यसूचकोभूतविकारउत्पातः४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=उपपदविभक्तीनां संबंधस्तु सेर्थः १ विशिष्यार्थोक्तेः २

भ२

यस्तदन्ताच्चतुर्थी स्यात्। यागायजाति। यजुंयाती त्यर्थः। नमःस्वस्तिस्वाहास्वधालंवषट्योगाच्च। एभिर्योगे चतुर्थी स्यात्। हरयेनमः।
उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्। प्रजाभ्यःस्वस्ति। अग्नयेस्वाहा। पितृभ्यःस्वधा। अलमिति पर्याप्त्यर्थग्र
हणम्। तेनदैत्येभ्योहरिरलं प्रभुःसमर्थःशक्त इत्यादि। षष्ठ्यादियोगे षष्ठ्यपि साधुः। तस्मैप्रभवति सस्यांग्रामणीरिति निर्देशात्। ते
नप्रभुर्बुभूषुर्भुवनत्रयस्य यइति सिद्धम्। वषडिन्द्राय। चकारः पुनर्विधानार्थः। तेनाशीर्विवक्षायां परामपि चतुर्थी चाशिषीति
षष्ठी वाधित्वा चतुर्थ्येव भवति। स्वस्तिगोभ्योभूयात्। मन्यकर्मणि अनादरे विभाषाऽप्राणिषु। प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा
स्यात्तिरस्कारे। नत्वा तृणं मन्ये। तृणायवा। अनादरे निर्देशात्तानादिकयोगेन। नत्वा तृणं मन्वे। अप्राणित्वित्यपनीयनोकाकालभुक
शृगालवर्जे इति वक्तव्यम्। तेननत्वानावमन्नमन्ये इत्यत्राप्राणित्वेपि चतुर्थी। नत्वाशुनेमन्ये इत्यत्रप्राणित्वेपि भवत्येव। गत्यर्थक

=तिरस्कारद्योतकं यत्तमेतिमाख्यानात्युपाख्यानाच्चतुर्थीन-तृणतुल्यमपिनमन्ये इत्यर्थः २ ननुयकानिर्देशोनाख्यानात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=संज्ञाप्रः २

=अध्वन्यर्थग्रहणं कर्त्तव्यं २ =आर्थिनप्रतिवेशो वक्तव्यइतिवार्त्तिकादिति भावः २ =कार्यपरिस्पंदः १ =शब्दप्रयोगसमकालिकांतव्यापाराजन्यफला

अवश्यसर्थः २

उत्पथं संत्यज्येत्यर्थः २

२।३।१२

र्मणि द्वितीया चतुर्थी चेष्टयामनध्वनि। अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायां। ग्रामं ग्रामाय वा गच्छति। चेष्टा यां किं। मनसा रिंवुज्जति। अनध्वनीति किं। पंथानं गच्छति। [illegible] विशिष्टेऽध्वन्येव वा यत्र [illegible]। यदा तूत्पथात्पंथा एवाक्रमितुमिष्यते तदा तु चतुर्थी भवत्येव। उत्पथेन पथे पंथानं वा गच्छति। द्वितीया ग्रहणात्प्रयोगे षष्ठी वा। धितुम्। ग्रामं गन्ता। ग्रामाय वा गन्ता।

१।४।२४ १।४।२५

ध्रुवमपायेऽपादानम्। अपायो विश्लेषस्तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्। अपादाने पञ्चमी। ग्रामादायाति। धावतोऽश्वात्पतति। कारकं किं। वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं। पापाज्जुगुप्सते। विरमति। धर्मात्प्रमाद्यति। भीत्रार्थानां भयहेतुः। भयार्थानां त्राणार्थानां च योगे भयहेतुरपादानं स्यात्। चौराद्बिभेति। चौरात्त्रायते। भयहेतुः किं। अरण्ये बिभेति त्रायते वा। पराजेरसोढः। पराजेः प्रयोगेऽसह्योर्थोपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्य

१।४।२६

=विभागजनकव्यापाराश्रयत्वं विभागाश्रयत्वं ४ क्रियाविशिष्टस्याप्यध्वनस्तत्प्रकृतधात्वर्थान्तर्गतप्रभावेणात्रधावनस्याविवक्षितत्वाद्ध्रुवत्वं बोध्यं ३

=अपाये ह्युदासीनं बलवायाद्दिर्वाचलं ध्रुवमेवार्तदावेशान्नदपादानमुच्यते ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

= व्यवहितदेशाप्तिः २

= अन्यदेशसंयोगानुकूलव्यापाराभावानुकूलोव्यापारोवारयतेरर्थः। तत्रान्यदेशसंयोगाश्रयत्वेनवक्तेरीप्सितत्वं संयोगानुकूलव्यापाराश्रयत्वेनमारणवकस्येप्सितत्वम्॰ अग्नेर्मारणवकंवारयति॰

र्थः। असोढः किं। शत्रून्पराजयते। अभिभवतीत्यर्थः। वारणार्थानामीप्सितः। प्रवृत्तिविघातोवारणम्। वारणार्थानांप्रयोगेईप्सितोर्थोपारा
नंस्यात्। यवेभ्योगांवारयति। ईप्सितः किं। यवेभ्योगांवारयतिक्षेत्रे। अंतर्द्धौयेनादर्शनंनिह्नुते। व्यवधानेसतियत्कर्तृकस्यात्मनोदर्शनंस्याभा
वमिह्नुतितद्पादानंस्यात्। मातुर्निलीयतेकृष्णः। अंतर्द्धौकिम्। चोरान्नदिदृक्षते। इह्नुतिग्रहणंकिं। अदर्शने छायासंसंसत्यपिदर्शी
नेयथास्यात्। आख्यातोपयोगे। नियमपूर्वकविद्याग्रहणकारेवक्ता पाठकस्तज्ज्ञः स्यात्। उपाध्यायादधीते। उपयोगेकिं। नटस्यगाथांश्रृ
णोति। जनिकर्तुःप्रकृतिः। जायमानस्यहेतुरपादानंस्यात्। ब्रह्मणःप्रजाःप्रजायन्ते। भुवःप्रभवः। भवनमभूः। भूकर्तुःप्रभवस्तथा।
हिमवतोगंगाप्रभवति। तत्रप्रकाशतइत्यर्थः। ल्यब्लोपेकर्मण्यधिकरणेच। प्रासादात्प्रेक्षते। आसनात्प्रेक्षते। प्रोद्माल्यासनेउपवि
श्यप्रेक्षतइत्यर्थः। श्वशुराज्जिहेति। श्वश्रुरंवीक्ष्येत्यर्थः। गम्यमानापिक्रियाकारकविभक्तीनां निमित्तं। कस्मात्त्वनद्याः। यतश्चा

= प्रकृतिरुपादानकारणं ब्रह्मचमायाशवलंजगदुपादानकारणमितिवेदांतसिद्धांतः ३ = स्यवंतशब्दाद्दानेतत्कृत्वर्थस्य २ = प्रथमप्रकाशाधिकरणमपादानमित्यर्थः प्रभवोजलमूलेसौ
= विशिष्यतद्वाचकशब्दानुपपत्तावीत्यर्थः॰ + जन्महेतोपराक्रमे ज्ञानस

= ब्रह्मचर्यादिः ४ अथमेवार्थीधारः २

= दैववशात्र

सा २

द्रुतिविश्वः ३
चारिमस्थाने॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

= भेरवानन्यार्थः ३ = पंचम्यंतार्थेनार्थद्वारायुक्तात् २ = तद्युक्तादित्यपेक्षते २ = शब्दग्रहणादिति भावः ३

धकालनिर्माणं तत्र पंचमी। तद्युक्ताद्ध्वनः प्रथमासप्तम्यौ। कालात्सप्तमी च वक्तव्या वनाद्ग्रामो योजनं योजनेवा। कार्त्तिक्या
आग्रहायणी मासे। अन्यारादितरर्त्ताद्दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। एतैर्योगे पञ्चमी स्यात्। अन्यद्दूरार्थग्रहणम्
। इतरग्रहणं प्रपंचार्थं। अन्यो भिन्नदूरो वाक्षेपात्। आराद्दूरात्। अंतेदूरात्। पूर्वेग्रामात्। दिशि दृष्टः शब्दो दिक्शब्द
स्तेन संप्रतिदेशकालवृत्तिनायोगे पि पंचमी। चैत्रात्पूर्वः फाल्गुनः। अवयववाचिनायोगे तु। तस्य परमाम्रेडितं मिति निर्दे
शात्। पूर्वं कायस्य। अंशूत्तरपदस्य दिक्शब्दत्वे पि षष्ठ्यतस्यर्थ इति षष्ठी वाक्षिप्तुं पृथग्ग्रहणं। प्राक्प्रत्यग्वाग्रामात्। आ
च। दक्षिणा ग्रामात्। आहि दक्षिणा ह्यग्रामात्। अपादाने पञ्चमी। तिसृभ्यो कार्त्तिक्याप्रभृती। तिभाष्यप्रयोगात्प्रभृतियोगे
पंचमी। भवात्प्रभृति आरभ्य वासेव्योहरिः। अपपरिवहिरिति समासविधानात्ज्ञापकात्वहियोगे पंचमी। ग्रामाद्बहिः। अप

= तस्य भूयसा प्राप्तस्य यत्र प्रीतिस्तदेदमास्मिन्नितत्वं ३ = प्रभृत्यर्थयोगे ऽपूर्वार्थः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४८८ १४८९

परीवर्ज्जने। एतौवर्ज्जनेकर्मप्रवचनीयौस्तः। आङ्मर्यादावचने। आङ्मर्यादायामुक्तसंज्ञःस्यात्। वचनग्रहणादभिविधावपि।
पंचम्यपाङ्परिभिः। एतैःकर्मप्रवचनीयैर्योगेपञ्चमीस्यात्। अपहरेःपरिहरेःसंसारः। परिस्त्रवर्ज्जने। लक्षणादौतुहरिंप
रि। आमुक्तेःसंसारः। आसकलाद्ब्रह्म। प्रतिःप्रतिनिधिप्रतिदानयोः। एतयोरर्थयोःप्रतिसंज्ञःस्यात्। प्रतिनिधिप्रति
दानेचयस्मात्। अत्रकर्मप्रवचनीयैर्योगेपंचमीस्यात्। प्रद्युम्नःकृष्णात्प्रति। तिलेभ्यःप्रतियच्छतिमाषान्। अकर्त्तर्यृणे
पंचमी। कर्त्तरिवर्जितेयदृणंहेतुभूतंततःपंचमी। ज्ञाताद्ऋणः। अकर्त्तरिकिं। ज्ञातेनवंचितः। विभाषागुणेस्त्रियां। गुणेहेतावस्त्री
लिंगेपंचमीवास्यात्। जाड्याज्जाड्येनवाबद्धः। गुणेकिं। धनेनकुलं। अस्त्रियांकिं। बुद्ध्यामुक्तः। विभाषेतियोगविभागा
द्गुणेस्त्रियांचक्वचित्। धूमादग्निमान्। नास्तिघटोनुपलब्धेः। पृथग्विनानानाभिस्तृतीयान्यतरस्याम्। एभिर्योगेपं

२१३१३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गणनंकर्त्तव्यं।अव्याप्तिव्याप्तिपरिहाराय।त्रतसोंतरप्रभपो।चरदजातीयरो।कल्पपदेशीयरो।रूपप्याशपो।घाल्पति
ल्पप्यनो।वहूषु।वहुत्रे।वहुतः।दर्शनीयतरा।दर्शनीयतमा।घरूपेतिवक्ष्यमाणोह्रस्वःपरत्वात्पुवद्भावंवाधते।यद्वितरा
।यद्वितमा।पटुचरी।पटुजातीया।दर्शनीयकल्पा।दर्शनीयदेशीया।दर्शनीयरूपा।दर्शनीयपाशा।वहुपा।प्रत्यास्तावकी
दकतिः।आजाभ्योहितेअजथ्या।त्रासिवहुल्पार्थस्पुंवद्भावोवक्तव्यः।वहीभ्योदेहिवहुत्रः।अल्पत्रः।त्वतलोर्गुणव
चनस्य।शुक्लायाभावःशुक्लत्वं।शुक्लता।गुणवचनस्यकिं।कन्याभावःकन्यात्वं।शरदःकृतार्थतेत्यादौतुसामान्येन
पुंसकं।भस्याढेतद्धिते।हस्तिनीनांसमूहोहस्तिकं।अढेकिं।रोहिणेयः।स्त्रीभ्योढगितिक्षेत्रगृह्यते।अग्नेर्ढगितिढ

=व्याख्यानमत्रमूलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंतु पुंवद्देव। अग्नायी देवतास्य स्थालीपाकस्याग्नेयः। सपत्नी शब्दस्त्रिधा। शत्रुपर्यायात्सपत्नशब्दाच्छाङ्खवादित्वान्ङीप्नेकः। समानः
पतिर्यस्याइति विग्रहे विवाहनिबंधनं पतिशब्दमाश्रित्यनित्यस्त्रीलिंगो द्वितीयः। स्वामिपर्यायपतिशब्देनभाषितपुरस्कारात्तृतीयः।
आद्ययोः शिवाद्यणः। सपत्न्याअपत्यंसापत्नः। तृतीयात्तु लिंगविशिष्टपरिभाषयापत्युत्तरपदलक्षणो णेरेव। नत्वणः। शिवादौ
रूढयोर्ग्रहणात्। सापत्नः। कच्छसोश्च। भवत्याश्छात्रीभावत्काः। भवदीयाः। एतद्वार्त्तिकमेकतद्धिते चेति सूत्रे चनकर्त्तव्यं। सर्वनाम्नो
वृत्तिमात्रइति भाष्यकारेष्वागतार्थत्वात्। सर्वमयः। सर्वकाम्यति। सर्विकाभार्यायस्यसर्वकभार्यः। सर्वप्रियः। पूर्वस्यैवेदं। भस्येषादे
ति लिंगात्। तेनाकचि एकत्रोषवत्तोचना। सर्विकाः। सर्वीः। कुक्कुट्यादीनामंडादिषु। कुक्कुट्याअंडंकुक्कुटांडं। मृग्याः पद्मृगपद्मा
मृगक्षीरं। काकशावः। क्यङ्यानिनोश्च। एतयोः परतः पुंवत्। स्नोवाचरतिस्तायते। श्वेपतौवाचरतिश्वेपतीयते। स्वभिन्नांकाचिद्दूरीनी

=अन्यथाएषाहाएनयोःकात्पूर्वसप्आपिविधीयमानमित्तनिर्विषयंस्यादितिभावः२ =वृत्तिघटकानेकभागमध्येकिंचिदपेक्षयापूर्वस्यैवतद्यर्थः अतएवतदितरेषादौपरस्यन

इत्यादि३

पुंवत्३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यांमन्यते दर्शनीयमानिनी। दर्शनीयां स्त्रियंमन्यते दर्शनीयमानी चैत्रः। नकोपधायाः। कोपधायाः स्त्रियां न पुंवत्। रसिकाभार्यः। पाचि
काभार्यः। मद्रिकायते मद्रिकामानिनी। कोपधप्रतिषेधे तद्धितवुण्ग्रहणं। नेह। पाकाभार्यायस्य पाकभार्यः। संज्ञापूरणेष्वश्च। अन
योर्न पुंवत्। दत्ताभार्यः। दत्तामानिनी। दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोयमिति भाषितपुंस्कत्वमस्ति। पंचमीभार्यः। पंचमी
पाद्या। वृद्धिनिमित्तस्य चतद्धितस्यारक्तविकारे। वृद्धिशब्देन विहितायावृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदंतात्स्त्रीन
पुंवत्। स्त्रौघ्नीभार्यः। माथुरीयते। माथुरीमानिनी। वृद्धिनिमित्तस्य किं। मध्यमभार्यः। तद्धितस्य किं। कांडलावभार्यः। वृद्धिवाचि
नकिं। तावद्भार्यः। रक्तेतु। काषायीकंथायस्य सकाषायकंथः। विकारेतु। हैमीमुद्रिकायस्य हैममुद्रिकः। वृद्धिशब्देन वृद्धिप्रति
फलोपधानाभावाद्दि पुंवत्। वैयाकरणभार्यः। सोवश्वभार्यः। स्वांगाच्चेतः। स्वांगाद्यईकारस्तदन्तात्स्त्रीन पुंवत्। सुकेशीभार्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वांगात्किं। पटुभार्यः। ईतः किं। अकेशभार्यः। अमानिनी। तिवक्तव्यं। सुकेशामानी। सुकेशामानिनी। जातेश्च। जातेः परोयः प्रत्ययस्तदंत
नपुंवत्। शूद्राभार्यः। ब्राह्मणीभार्यः। सौत्रस्यैवायं निषेधः। तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भस्याढ इति भवत्येव। संख्य
यावयासन्नादूराधिकसंख्यासंख्येये। संख्यायार्थया संख्यया व्ययादयः समस्यन्ते सबहुव्रीहिः। दशानां समीपं सन्नितउपद
शाः। नवएकादशावेत्यर्थः। बहुव्रीहौ संख्येये इति वक्ष्यमाणोऽच्। ति विंशतेर्डिति। विंशतेर्भस्य तिवादस्य लोपः स्याड्डिति। आसन्ने
विंशाः। विंशतेरासन्नादित्यर्थः। अदूरत्रिंशाः। अधिकचत्वारिंशाः। द्वौवात्रयोवा द्वित्राः। द्वित्राद्वत्तादद्वाद्वित्रशाः। विंशतिरित्य
र्थः। दिङ्नामान्यंतराले। दिशोनामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणास्याः पूर्वस्याश्च दिशोन्तरालं दक्षिणपूर्वा। नामग्रहणा
द्योगिकानां। ऐंद्र्याश्च कौबेर्याश्चान्तरालं। तत्र तेनेदमिति सरूपे। सप्तम्यन्ते ग्रहणविषये सरूपे प्रदेहतीयातच प्रहरण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयेऽदंयुद्धमित्यर्थे समसेतेकर्मव्यतिहारे। इतिशब्दाद्यंविषयविशेषोलभ्यते। अन्येषामपिदृश्यते। दीर्घइत्यनुवर्त्तते। इतिकर्मव्यतिहारबहुव्रीहौपूर्वपदान्तस्यदीर्घः। इच्छमासातोवक्ष्यते। तिष्ठद्गुप्रभृतिषिद्ध्यत्ययपाठाद्व्ययीभावत्वमव्ययत्वंचाकेशेषुकेशेषुगृहीत्वेदंयुद्धंप्रवृत्तंकेशाकेशि। दंडैश्चदंडैश्चप्रहृत्यदंयुद्धं प्रवृत्तंदंडादंडि। मुष्टीमुष्टि। ओर्गुणः। उरणितस्पभस्यगुणस्तद्धिते। अवादेशः। बाहूबाहवि। ओरादिति वक्तव्येगुणाकृतसंज्ञापूर्वको विधिरनित्यइतिज्ञापयितुं। तेनस्वायंभुवइत्यादिसिद्धं। सहपेतिकिं। हलेनमुशलेन। तेनसहेतितुल्ययोगे। तुल्ययोगेवर्त्तमानंसहपदंतृतीयान्तेनप्राग्वत्। वोपसर्जनस्य। बहुव्रीहौ वय वस्यसहस्यसःस्याद्वा। पुत्रेणसहसपुत्रः। सहपुत्रोवागतः। तुल्ययोगवचनंकिमर्थं। सकर्मकः। सलोमकः। प्रकृत्यादिषु। सहशब्दःप्रकृत्यादिषु। खलिराद्दैसहपुत्रायसहामात्याय। अगोवत्सह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेषिनिव कृत्यं। सगवेसवत्सायसहलाय। बहुव्रीहौसंख्येयेऽजबहुगणात्। संख्येयेयोबहुव्रीहिस्तस्माद्दुष्पात्। उपदन्ताः। अवहुगणात्किं। उ
पवहवः। उपगणाः। अत्रस्वरेविशेषः। संख्यायास्तत्पुरुषसंबाच्यः। निर्गतानिस्त्रिंशानि। निस्त्रिंशानिवर्षाणिचेत्रस्य। निर्गतस्त्रिंशतोंगुलिभ्यो
निस्त्रिंशः खड्गः। बहुव्रीहौसंख्यायाःस्वांगात्षच्। षण्णयेनषष्ठी। स्वांगवाचिसंख्यमक्ष्यंताद्बहुव्रीहेःषच्स्यात्। दीर्घसक्थिनीयस्यसदी
र्घसक्थः। जलजाक्षी। स्वांगात्किं। दीर्घसक्थिशाकटं। स्थूलाक्षादेणुयष्टिः। अक्ष्णोदर्शनादित्यच्। अंगुलेर्दारुणि। अंगुल्यंताद्बहुव्री
हेःषच्स्याद्दारुणपर्थे। पंचांगुलयोयस्यतत्पंचांगुलंदारु। अंगुलीसहावयवंधान्यादिविक्षेपकाष्ठमित्युच्यते। बहुव्रीहेःकिं। द्व्यंगुलीप्र
माणमस्याद्व्यंगुलाद्यष्टिः। नद्वितीयेतितत्पुरुषेतत्पुरुषस्यांगुलेरित्यच्। दारुणिकं। पंचांगुलिहस्तः। द्वित्रिभ्यांषमूर्द्धः। आभ्यांमू
र्द्धःषःस्याद्बहुव्रीहौ। द्विमूर्द्धः। त्रिमूर्द्धः। नेनुनक्षत्रेअबहुव्रीहौ। मृगोनेतायासांरात्रीणांतामृगनेत्रा रात्रयः। पुष्यनेत्राः। अंतर्बहिर्भ्यांच
लोम्नः। आभ्यांलोम्नोऽप्याद्बहुव्रीहौ। अंतर्लोमः। बहिर्लोमः। अन्नाद्यतिकायासंज्ञायांनसंख्यास्थूलात्। नासिकांताद्बहुव्रीहेरच्स्यान्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=अगकारांतात्पूर्वपदादित्यर्थः

सिकाग्रश्चनसंप्राप्नोति नतुस्थूलपूर्वात्। पूर्वपदात्संज्ञायामगः। पूर्वपदस्थान्निमित्तात्परस्यनस्यणःस्यात्संज्ञायांनतुगकारव्यवधाने। कुरिवनासिकाअस्यकुणसः। खरणसः। अगः किं। भगवामयनम्गयनम्। अण्गयनादिभ्यइतिनिपातनात्साधुत्वाभावमाश्रित्यअगइतिप्रत्याख्यातंभाष्ये। अस्थूलात्किं। स्थूलनासिकः। खुरखराभ्यांवानस। खुरणः। खरणः। पक्षेअजापीष्यते। खुरणसः। खरणसः। उपसर्गाच्च। पादेर्योनासिकाग्रादूर्ध्वंतादृङ्ङ्वीहेरचूनासिकायानसादेशश्चा असंज्ञार्थंवचनं। उन्नतानासिकाअस्यउन्नसः। उपसर्गादनोसर्वइतिसूत्रं। तद्वृत्तिकाभाष्यकारआह। उपसर्गादुलसउपसर्गस्थान्निमित्तात्परस्यनसोनस्यणःस्याद्वुलं। प्रणसः। वेर्गोवक्तव्यः। विगतानासिकायस्यविग्रः। खश्च। विखः। कथंतर्हिविनसाहत्वंबाधवेतिभट्टिः। विगतयानासिकयाउपलक्षितेतिव्याख्येयं। सुप्रातःसुश्वःसुदिवःसुरिक्तःचतुष्पाणीपदाजापदोपदाः। एतेवङ्वीहयोऽव्युत्पन्नानिपातंते। शोभनंप्रातरस्यसुप्रातः। शोभनंश्वोस्यसुश्वः। शो

=पदन्निनिनसादेशाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भनंदिवाअस्यसमुद्दिवः।शारेरिवकुक्षिरस्यशारिकुक्षः।चतस्रोऽश्रयोयस्यचतुरश्रः।एणपाइवपादाअस्यएणीपदः।अजपदः।प्रोष्ठोगौः।तस्येवपादाअस्य
प्रोष्ठपदः।नञ्दुःसुभ्योहलिसक्थ्योरन्यतरस्यां।अचूपात्।अहलः।अहलिः।असक्थः।असक्थिः।एवंदुःसुभ्यां।शान्तोरितिपाठांतरं।अशान्तः।
अशान्तिः।नित्यमसि-सुजामेधयोः।नञ्दुःसुभ्यदूत्येवा।अप्रजाः।दुःप्रजाः।सुप्रजाः।अमेधाः।दुर्मेधाः।सुमेधाः।धर्मादिनिच्केवलात्।केवलंमूर्खपदात्
रोयोधर्मश्चादस्तदन्ताद्बहुव्रीहेरनिच्स्यात्।कल्याणधर्मा।केवलात्किं।परमःस्वोधर्मोयस्येतित्रिपदेबहुव्रीहौमाभूत्।स्वशब्दोहिस्वकेवलं
पूर्वपदंकिंतुमध्यमलादापेक्षिकं।संदिग्धसाध्यधर्मेत्यादौतुकर्मधारयपूर्वपदोबहुव्रीहिः।एवंतुपरमस्वधर्मेत्यपिसाध्वेव।निष्ठनिधर्मा
अनुहिनिधर्मेत्यादिवत्।पूर्वपदंतुबहुव्रीहिणाक्षिप्यते।जंभाश्चहरितत्तृणमेभ्यः।जंभेतिछतसमासांतंनिपात्यते।जंभोभक्षोदंतेच।
शोभनोजंभोस्यसुजंभा।हरितजंभा।तृणंभक्ष्यंयस्यतृणमिवदंतायस्येतिवातृणजंभा।एवंसोमजंभा।स्वादिभ्यःकिं।पतितजंभः।रक्षिरोगोलुब्ध

आनिजंतंव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

= उभयादेशाविकल्पेनेति भ्रान्तिः २

योगे। दक्षिणोऽर्मव्रणमस्य दक्षिणोर्मिमगः। व्याधेनक्षतव्रणइत्यर्थः। इच्चर्मव्यतिहारे। कर्मव्यतिहारयोर्बहुव्रीहिस्तस्मादिच्समासांतः केशाकेशि। मुशलामुशलि। द्विदंडादिभ्यश्च। तादर्थ्येचतुर्थ्यर्थेषा। एषामिडर्थमिच्प्रत्ययः स्यात्। द्वौ दंडौ यस्मिन्व्यतिरणे द्विदंडि। द्विमुशलि। उभाहस्ति। उभयाहस्ति। प्रसंभ्यांजानुनोर्ज्ञः। आभ्यांपरयोर्जानुनोर्ज्ञोरादेशः स्याद्बहुव्रीहौ। प्रगतजानुनी प्रसृतप्रज्ञुः। संज्ञुः। ऊर्ध्वौ द्विभाषा। ऊर्ध्वज्ञुः। ऊर्ध्वजानुः। धनुषश्च। धनुरन्तस्यबहुव्रीहेरनङादेशः स्यात्। चापेऽधन्वा। वामजायां। वातधन्वा। वातधनुः। जायायानिङ्। जायांतस्यबहुव्रीहेर्निङादेशः स्यात्। लोपोव्योर्वलि। वकारयकारयोर्लोपः स्याद्वलि। पुंवद्भावः। युवतिर्जायायस्ययुवजानिः। गंधस्येदुत्पूतिसुसुरभिभ्यः। एभ्योगंधस्येकारोंतादेशः स्यात्। उ दुर्गंधिः। पूतिगंधिः। सुगंधिः। सुरभिगंधिः। गंधस्येत्किं। एकांतएकदेशइव। अविभागेजलंरूपमाणइत्यर्थः। सुगंधिपुष्पं। सलिलंच। सुगंधिर्वायुः। नेहशोभनागंधोद्व्यारूपस्यसुगंधआपणिकः। अल्पाख्यायां। सूपस्यगंधोलेशोय

= एवंचगुणवाचिनएवयहणंनतुद्रव्यवाचिनइतिफलितोर्थः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मिंस्तत्सूपगंधिभोजनं। घृतगंधि। गंधोगंधकआमोदेलेशेसंबंधगर्वयोरिति विश्वः। उपमानाच्च। पद्मस्येवगंधोस्यपद्मगंधिः। पादस्यलो
पोऽहस्त्यादिभ्यः। हस्त्यादिवर्जितादुपमानात्परस्यपादस्यलोपोवहुव्रीहौ। स्थानिद्वारेणार्थसमासांतः। व्याघ्रस्येवपादावस्यव्याघ्रपाद्
। अहस्त्यादिभ्यः किं। हस्तिपादः। कुंभपदीषुच। कुंभपद्यादिषुपादस्यलोपोऽनिपूर्वनिपातपतेस्त्रियां। पादःपत्। कुंभपदी।।
स्त्रियांकिं। कुंभपादः। संख्यासुपूर्वस्य। पादस्यलोपःस्यात्समासांतोवहुव्रीहौ। द्विपात्। सुपात्। वयसिदंतस्यदन्त। संख्यासुपूर्वस्यदंत
स्यदत्इत्यादेशःस्याद्वयसि। द्विदन्। चतुर्दन्। षड्दंता अस्यषोडन्। सुदन्। सुदती। वयसिकिं। द्विदंतःकरी। सुदन्तः। स्त्रियांसंज्ञायां। दं
तस्यदत्स्यात्समासांतोवहुव्रीहौ। अयोदती। फालदती। संज्ञायांकिं। समदती। विभाषाऋणावारोकाभ्यां। दंतस्यदत्वहुव्रीहौ।
ऋणावदन्। ऋणावदंतः। अरोकदन्। अरोकदंतः। अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च। एभ्योदंतस्यदत्वा। कुड्मलाग्रदन्। कुड्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाग्रहंतः। ककुदस्यावस्थायांलोपः। अजातककुत्। पूर्णककुत्। त्रिककुत्पर्वतो। त्रीणिककुदानिअस्यत्रिककुत्। संज्ञेषापर्वत
विशेषस्य। त्रिककुदोन्यः। उद्विभाकाकुदस्यालोपः। उत्काकुत्। विकाकुत्। काकुदं तालु। पूर्णाद्विभाषा। पूर्णकाकुत्। पूर्णा
काकुदः। सुहृद्दुर्हृदौमित्रामित्रयोः। सुदुर्भ्यां हृदयस्य हृद्भावोनिपात्यते। सुहृन्मित्रं। दुर्हृदमित्रः। अन्यत्रसुहृदयः। दुर्हृदयः। उ
रस्यमनसिभ्यःकप्। मूढोरस्कः। प्रियसर्पिष्कः। द्विपुमाननड्वान्पयोनोर्लक्ष्मीरितिस्कवचनांतानिपठ्यंते। द्विवृकवचनांतेभ्य
स्कत्रोषाद्विभाषेतिविकल्पेनकप्। द्विपुमान्। द्विपुंस्कः। अर्थान्नत्रः। अनर्थकं। नत्रः किं। अपार्थकं। अपार्थो। इनःस्त्रियां
। वृकुदंडिकानगरी। अनिनस्मन्ग्रहणान्पर्वतात्वानर्थकेनापितदंतविधिप्रयोजयंति। वृकवाग्मिका। स्त्रियांकिं। वृकुद
ंडी। वृकुदंडिकोग्रामः। शेषाद्विभाषा। अनुक्तसमासांताच्छेषाधिकारस्याद्वुबहेःकबास्यात्। महायशस्कः। महायशाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुक्तेत्पादिकिं। व्याघ्रपात्। सुगंधिः। प्रियपथः। शेषाधिकारस्थाकिं। उपवस्त्वः। उत्तरपूर्वी। सपुत्रः। तंत्रादिनाशेषशब्दोर्थद्वयपरः। आपो
न्पतस्या। कपिआवंतस्य हस्तोवास्यात्। बहुमालाकः। बहुमालकः। कवभावे। बहुमालः। नसंज्ञायां। शेषादिति प्राप्तः कप्रस्यात्संज्ञा
यां। विश्वेदेवाअस्य विश्वदेवः। ईयसस्य। ईयसन्तोत्तरपदान्नकप्। बहुवः श्रेयांसास्य बहुश्रेयान्। गोस्त्रियोरिति ह्रस्वेप्राप्ते। ईयसोव
हुव्रीहेर्नेतिवाच्यं। बहूनः श्रेयस्योस्य बहुश्रेयसी। बहुव्रीहेः किं। अतिश्रेयसिः। वंदितेभ्रातुः। पूजार्थेयोभ्रात्रशब्दस्तदन्तान्नकप्स्यात्।
प्रशस्तोभ्रातास्य प्रभ्रातः। सुभ्राता। नपूजनादिति निषेधस्तत्बहुव्रीहौसक्थ्यक्ष्णोरित्यतः प्रागेवेतिवक्ष्यते। वंदिते किं। मूर्खभ्रा
त्रकः। नाडीतंत्र्योः स्वांगे। स्वांगेयोनाडीतंत्रीशब्दौतदंतात्कप्स्यात्। बहुनाडिकायः। बहुतंत्रीग्रीवा। तंत्रीधमनी। स्त्रीपुंसयोस्तत्वा
भावाद्ह्रस्वोन। स्वांगेकिं। बहुनाडीकः स्तंभः। बहुतंत्रीकावीणा। विश्ववाणिश्च। कवभावोत्रनिपात्यते। पपूर्वाद्ध्यतेर्लुंदा पवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णीतंतुवायशालाका। निर्गतप्रवाणीअस्यनिष्प्रवाणीःपटः।समाप्तप्रवाणःनवइत्यर्थः।सप्तमी विशेषणेबहुव्रीहौ।सप्तम्यंतंविशेषणं
चबहुव्रीहौपूर्वपदयोर्नपं।कंठेकालःअनश्वद्वापकाद्वाधिकरणपदोबहुव्रीहिः।चित्रगुः।सर्वनामसंख्ययोरुपसंख्यानं।सर्वश्चे
तः।द्विशुक्लः।मिथोनयोःसमासेसंख्यापूर्वं।शरदपरविप्रतिषेधात्।द्व्यन्यःसंख्यायाःअल्पीयस्याः।द्वित्राः।द्वंद्वेपि।शरदश्।वा
प्रियसाग्रुडप्रियः।प्रियगुडः।गडादेःपरासप्तमी।गडुकंठः।क्वचिन्न।बहेगडुः।निष्ठा।निष्ठांतंबहुव्रीहौपूर्वस्यात्।कृतकृत्यः।जाति
कालसुखादिभ्यःपरानिष्ठावाच्या।सारंगजग्ध्री।मासजाता।सुखजाता।प्रायिकंचेदं।कृतकृत्यः।पीतोदकः।वाहिताग्न्यादिषु
।आहिताग्निः।अग्न्याहितः।आकृतिगणोयं।प्रहरणार्थेभ्यःपरेनिष्ठासप्तम्यौ।अस्युद्यतः।दंडपाणिः।क्वचिन्न।विटतासि
॥ ॥इतिबहुव्रीहिः॥ ॥चार्थेद्वंद्वः।अनेकंसुबंतंचार्थेवर्तमानंवासमस्यतेसद्वंद्वः।समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=एकधर्मावच्छिन्ने= =अनुद्देशपतं=

र्थः। परस्परनिरपेक्षसानेकस्यएकस्मिन्नन्वयः समुच्चयः। अन्यतस्यानुषंगिकत्वेनान्वयोन्वाचयः। मिलितानामन्वयइतरेतरयोगः॥
समूहःसमाहारः। तत्रेश्वरंगुरुंचभजस्वेतिसमुच्चये। भिक्षामटगांचानयेत्यन्वाचये वनसमासोऽसामर्थ्यात्। धवखदिरौ। संज्ञा
परिभाषं। अनेकोक्तेः होत्पोत्तृनेष्टृद्गातारः। द्वयोर्द्वयोर्द्वंद्वंकृत्वापुनर्द्वंद्वेतु। होतापोतानेष्टोद्गातारः। राजदंतादिषुपरं। एषुपू
र्वयोगार्हंपरंस्यात्। दंतानांराजाराजदंतः। धर्मादिष्वनियमः। अर्थधर्मौ। धर्मार्थौ। जंपती। दंपती। जायापती। जायाशब्दस्य
जभावोदंभावश्चनिपात्यते। आकृतिगणोयं। द्वन्द्वेघि। द्वंद्वेघिसंज्ञंपूर्वंस्यात्। हरिश्चहरश्चहरिहरौ। अनेकशाखावेकत्रनियमो
ऽनियमश्चेष्टः। हरिगुरुहरगुरुहरिहरगुरवः। अजाद्यदन्तं। इंद्रंद्वंद्वेपूर्वंस्यात्। ईशकृष्णौ। वहुचनियमः। अश्वरथेन्द्राः। इंद्राश्वर
थाः। घ्यंतादजाद्यदंतंविपतिषेधेनाइंद्राग्नी। अल्पाच्तरं। शिवकेशवौ। ऋतुनक्षत्राणांप्रानुपूर्वेण। हेमंतशिशिरवसंताः। कृत्ति

समाहरणा

=इदंप्रकरणामनित्यंसमुदायाद्वृत्ति निर्देशात्=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारो हिरण्ये। समाहारणं किं। ग्रीष्मवसंतौ। लघ्वक्षरपूर्वं कुशकाशं। अभ्यर्हितं च। तापसपर्वतौ। वर्णानामानुपूर्वेण। बालवृद्धक्षत्रि
यविट्शूद्राः। भ्रातुर्जायसः। युधिष्ठिरार्जुनौ। द्वंद्वश्चापि विशेषणं। सेनांगानां। एषां द्वंद्वस्य वत्स्यात्। पाणिपादं। मार्दंगिकपाणविकं। र
थिकाश्वारोहं। समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणं। पाण्यंगादीनां समाहारस्य वयं यथा स्यात्। अनुवादे चरणानां। च
रणानां द्वंद्वस्य वत्स्यति। द्वंद्वोपपन्नासे। स्थेशभासपीरसः। तिवक्त्रवं। उद्गात्रध्वर्युकठकालापं। प्रत्यष्ठात्रध्वर्युकठकौथुमं। अध्वर्युक्रतुरनपुंसकं। यजुर्वे
दे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिंगानां द्वंद्वस्य वत्स्यात्। अर्कश्वमेधं। अध्वर्युक्रतुः किं। इषुवज्रौ। सामवेदे विहितो। अन
पुंसकं किं। राजसूयवाजपेयौ। अर्द्धर्चाः। अध्ययनतोऽविप्रकृष्टकालानां। अध्ययनेन प्रत्यासन्नाः आख्यायेषां तेषां द्वंद्वस्य वत्स्यात्
। पदक्रमकं। जातिरप्राणिनां। प्राणिवर्जजातिवाचिनां द्वंद्वस्य वत्स्यात्। धानाशष्कुलि। प्राणिनां तु विद्वद्भूद्राः। द्वंद्वजातीनामेवाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हा।रूपरसे।गमनाकुंचने।जातिषाधान्यस्वायमेकवद्भावः।इत्यविशेषविवक्षायांतु।वदरामलकानि।विशिष्टलिंगोजनपदोग्रामः।ग्राम
वर्जनदेशवाचिनांभिन्नलिंगानांसमाहारेद्वंद्वःस्यात्।उध्यश्चेरावतीचउध्येरावति।गंगाचशोणश्चगंगाशोणौ।कुरवश्चकुरुक्षेत्रंचकु
रुकुरुक्षेत्रे।भिन्नलिंगानांकिं।गंगायमुने।मद्रकेकयाः।अयामःकिं।जांववंनगरं।शाल्वकिनौग्रामः।जांववशाल्वकिन्नौ।क्षुद्रजंतवः
।एषांसमाहारेद्वंद्वःस्यात्।यूकालिक्षं।आनकुलाःक्षुद्रजंतवः।येषांचविरोधःशाश्वतिकः।एषांषाग्वत।अहिनकुलं।गोव्याघ्रं।काको
लूकमित्यादौपरत्वाद्विभाषांवृक्षमृगेतिषाप्रेवकारेणावाध्यते।शूद्राणामनिरवसितानां।अवहिष्कृतानांशूद्राणांषाग्वत।तक्षायस्
कारं।पात्राहिष्कृतानांतुचंडालमृतपाः।गवाश्वप्रभृतीनि।यथोच्चारितानिसाधूनि।गवाश्वं।दासीदासमित्यादि।विभाषावृक्षमृ
गतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापरावरोत्तराणां।वृक्षादीनांसप्तानांद्वंद्वःअश्ववडवेत्यादिद्वंद्वत्रयंचवाषाग्वत।वृक्षादौवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरूप पर्याय योस्तुल्यत्वोपपत्तेः पर्यायवादत्वात्प्रायेणेति भावः ।

शेषाणामेवग्रहणं। प्लक्षन्यग्रोधः। प्लक्षन्यग्रोधाः। रुरुपृषताः। कुद्रकाकाः। कुद्रकाद्याः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। एकवकाः। एकवकाः। अवउवं। अश्ववउवौ। पूर्वापरं। पूर्वापरे। अधरोत्तरं। अधरोत्तरे। फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां वृक्षप्रभृतिरेव द्वंद्वस्कवदिति वाच्यं। वदरामलकानि च वदरामलकं। जातिरप्राणिनामित्येकवद्भावः। नेह। वदरामलके। रथिकाश्वारोहौ। प्लक्षन्यग्रोधावित्यादि। विभाषेतिसूत्रे ये प्राणिनस्तेषां ग्रहणं जातिरप्राणिनामिति नित्यप्राप्ते विकल्पार्थमा। पञ्चग्रहणं हस्त्यश्वादिषु सेनांगत्वान्नित्यप्राप्ते मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वंद्वः। अन्येरुक्तसहचरैरुत्तरयोगस्येति नियमार्थं मृगशकुनिग्रहणं। एवं पूर्वापरमधरोत्तरमित्यपि। अश्ववउवग्रहणं तु पक्षे नपुंसकत्वार्थं। अन्यथा परत्वात्पूर्ववदश्ववउवाविति स्यात्। विप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिषिद्धं चानधिकरणवाचि। विरुद्धार्थानां द्रव्यवाचिनां द्वंद्वैकवद्भवति। शीतोष्णं। वैकल्पिकः समाहारे द्वंद्वश्चार्थद्वंनिसूत्रेणाप्राप्तः
सविरुद्धानां यदि भवति तर्हि अद्रव्यवाचिनामेव तिनियमार्थमिदं। तेन द्रव्यवाचिनामितरेतरयोग एव। शीतोष्णेऽद्रकेरुत्तः। विप्रतिषिद्धं किं
नंदकपांचजन्यं। इहपाक्षिकः समाहारद्वंद्वो भवत्येव। नदधिपयआदीनि। एतानि नैकवत्स्युः। दधिपयसी। इध्मावीरुधौ। निपातनाद्वीचिः।
अक्षामे। वाङ्मनसे। अधिकरणेतावत्वेच। द्रव्यसंख्यावगमे एकवद्देवेति नियमो न स्यात्। दशदंतोष्ठाः। विभाषासमीपे। अधिकरणे तावत्व
स्यसामीप्येन परिच्छेदे समाहारस्य वेत्येवं नियमो वास्यात्। उपदशं। दंतोष्ठं। उपदशाः। दंतोष्ठाः। आनङ्तोद्वन्द्वे। विद्यायोनिसंबंधवाचिना
मदन्तानां द्वंद्वे आनङ् स्यादुत्तरपदे परे। होतापोतारौ। होत्रपोत्रनेष्टोद्गातारः। मातापितरौ। पुत्रेन्यतरस्यामित्यतो मंडूकप्लुत्या पुत्रइत्यनुव
र्त्तते। पितापुत्रौ। देवताद्वन्द्वेच। इतोत्तरपदे परे आनङ्। मित्रावरुणौ। वायुशब्दप्रयोगे प्रतिषेधः। अग्निवायू। वाय्वग्नी। पुनर्द्वंद्वग्रहणं प्रसिद्धसा

सूत्रो ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+स्वपरिग्रहा

हचर्यं। तेनब्रह्मप्रजापतीत्यादौनानङ्। एतद्धिनैकहविर्भागित्वेनऋतं। नापिलोके प्रसिद्धमाहुचर्यं। इन्द्राग्नेःसोमवरुणयोः। देवताद्वंद्वेइत्येव। अग्नेरुक्तःसोमसोमाः। अग्नेःपरेषामेषांसस्पर्धःस्यात्समासे। अग्निछुन्। अग्निछोमः। अग्नीषोमौ। अग्नीवरुणौ। इद्वन्द्वौ। वद्धिमनुत्तरपदे अग्नेरिदादेशो देवताद्वंद्वे। अग्नामरुतौ देवतास्यआग्निमारुतंकर्म। अग्नीवरुणौ। देवतास्यआग्निवारुणं। देवताद्वंद्वेचेत्युभयपदवद्धिः। अलोकिकेवाक्येआनङ्मीलंचवाधित्वाइलक्ष्यंकिं। आग्नेन्द्रः। नेनुस्परस्मेत्युत्तरपदवद्धिप्रतिषेधः। विहोत्रा। आग्नावैष्णवं। दिवोद्यावा। देवताद्वंद्वेउत्तरपदे। द्यावाभूमी। द्यावाक्षामा। दिवस्पृथिव्यौ। दिवइत्येव। चा द्यावा। आदेशोऽकारोऽचारणसकारस्परुत्वंमाभूदितदर्थो द्यौश्चपृथिवीचदिवस्पृथिव्यौ। द्यावापृथिव्यौ। छंदसिदाण्डिविधिः। द्यावापृथिव्यौ। दिवस्पृथिव्योरन्तरिक्षे त्यत्रपदस्कारविसर्गपठनं। उषसोषसः। उषनृशंसस्योषासादेशो देवताद्वंद्वे। उषासासूर्यं। मातरपितरावुदीचां। उदीचांकिं। मातापि

=पितुर्दशगुणंमातागौरवेणातिरिच्यते इत्युक्तेर्मातुरथाऽतत्वात् पूर्वनिपातः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरौ।हृद्दाच्चुदपहांतात्समाहारे।चवर्गान्ताद्दृषहांताच्चहृद्दाद्दच्चस्यात्समाहारे।वाक्त्वचं।त्वक्त्वजं।शमीदृषदं।वाक्त्विषं।छत्रो
पानहं।समाहारेकिं।पाकदृशारदौ॥ ॥इतिद्वन्द्वः॥ ॥अथैकशेषः।सरूपाणां।रामौ।रामाः।विरूपाणामपिसमानार्थानां।वृक्ष
दंडश्चकुटिलदंडश्चवक्रदंडौ।कुटिलदंडौ।वृद्धोयूनातज्जैर्णश्चेदेवविशेषः।यूनासहोक्तौगोत्रंशिष्यतेगोत्रयुवप्रत्ययमात्रकृतंचेत
योःकृतंवैरूप्यंस्यात्।गार्ग्यश्चगार्ग्यायणश्चगार्ग्यौ।वृद्धःकिं।गर्गगार्ग्यायणौ।यूनाकिं।गर्गगार्ग्यौ।तज्जैर्णश्चेदेवकिं।भागवि
त्तिभागवित्तिकौ।कृत्लंकिं।गार्ग्यवात्स्यायनौ।स्त्रीपुंवच्च।यूनासहोक्तौवृद्धास्त्री।शिष्यते।तत्रपुंवत्।गार्गीचगार्ग्यायणी
चगर्गाः।अस्त्रियामित्यनुवर्त्तमानेयत्रत्रोश्चेतिलक।दाक्षीचदाक्षायणश्चदाक्षी।पुमांस्त्रिया।स्त्रियांसहोक्तौपुमान्शिष्य
तेतज्जैर्णएवविशेषश्चेत्।हंसीचहंसश्चहंसौ।भ्रातृपुत्रौस्वसृदुहितृभ्यां।भ्रातास्वसाचभ्रातरौ।पुत्रश्चदुहिताचपुत्रौ।न

=कुत्सायोगेदृष्टमाश्रित्यमानितदुपसर्जनमात्रकृतंवैरूप्यं३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=अस्य गुरुगमस्यैवैकवद्भावद्योतनार्थेनैनान्यसूत्राणामाहारदृढ्विषयेनप्रवृत्तिः २

पुंसकमनपुंसकेनैकवच्चाऽपान्यतरस्यां। अक्लीवेनसहोक्तौ क्लीवंशिष्यतेतच्चवाएकवत्स्यात्तच्चसमानएवविशेषश्चेत। शुक्लःपटः। शुक्लापटी। शुक्लंवस्त्रं। तदिदंशुक्लं। नानीमानिशुक्लानि। पितामात्रा। मात्रासहोक्तौ पितावाशिष्यते। माताचपिता चपितरौ। मातापितरौ। श्वशुरश्वश्वा। श्वश्वासहोक्तौ श्वशुरोवाशिष्यते। श्वशुरौ। श्वश्रूश्वशुरौ। त्वदादीनिसर्वैर्नित्यं। सर्वैःसहोक्तौ त्वदादीनिनित्यंशिष्यन्ते। सचदेवदत्तश्चते। त्वदादीनांत्रिणःसहोक्तौ यत्परंतच्छिष्यते। सचयश्चयौ। पूर्वशेषापिदृष्यतइतिभाष्यं। सचयश्चतौ। त्वदादितःशेषेपुंनपुंसकतोलिंगवचनानि। साचदेवदत्तश्चतौ। तच्चदेवदत्ताचयज्ञदत्ताचतानि। पुंन्नपुंसकयोरुक्तपरत्वान्नपुंसकंशिष्यते। तच्चदेवदत्तश्चते। अहन्नहत्तत्पुरुषविशेषणानामितिवक्तव्यं। कुक्कुटमयूर्यौविमौ। मयूरीकुक्कुटाविमौ। तच्चसाचअर्द्धपिप्पल्यौतेग्राम्यपशुसंघेष्वतरुणेषुस्त्री। एषुसहविवक्षायांस्त्रीशिष्यते। पुमान्

=स्त्रीशेषेपीतिभावः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थिर्येत्यस्यापवादः। गावइमाः। ग्राम्येतिकिं। रुरवइमे। पशुग्रहणंकिं। ब्राह्मणाः। संघेषुकिं। एतौगावौ। अत्तरुणेषुकिं। वत्साइमे। अनेक
सौफेस्थितिवाच्य। अश्वाइमे। इहसर्वत्रएकशेषेकृतेऽनेकाभावाद्द्वन्द्वोनातेनशिरसीशिरांसीत्यादौसमासस्योत्पत्तौहान्तःप्राप्तेगत्वा
देकवद्भावश्चपंथानौ। पंथानइत्यादौसमासांतेन॥ ॥इत्येकशेषः॥ ॥कृत्तद्धितसमासैकशेषसनाद्यन्ताधातुरूपाःपंचकृत्तयः। प
रार्थाभिधानंवृत्तिः। वृत्त्यर्थावबोधकंवाक्यंविग्रहः। सद्विधा। लौकिकोलौकिकश्च। परिनिष्ठितत्वात्साधुर्लौकिकः। प्रयोगानर्हो
ऽसाधुर्लौकिकः। यथाराज्ञःपुरुषः। राजन्अस्यपुरुषसुइति। अविग्रहोनित्यसमासः। अस्वपदविग्रहोवा। समासश्चतुर्द्धेतिपा
योवादः। अव्ययीभावतत्पुरुषबहुव्रीहिद्वंद्वाधिकारवर्हिर्भूतानामपिसहसुपेतिविधानात्। पूर्वपदार्थप्रधानोव्ययीभावः। उत्तर
पदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानोबहुव्रीहिः। उभयपदार्थप्रधानोद्वंद्वइत्यपिप्राचांप्रवादः। प्रायोभिप्रायः। सूपपतिउन्मत्त

=समस्यमानयावत्पदाघटितत्वं ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गंगामित्यादावव्ययीभावेऽतिमालादौ तत्पुरुषे द्विचाइत्यादिबहुव्रीहौ दन्तो मित्यादिद्वन्द्वे चाभावात्। तत्पुरुषविशेषः कर्मधारयस्तत
द्विशेषो द्विगुः। अनेकपदलक्षणो बहुव्रीहीरेव। तत्पुरुषस्य क्वचिदेवमुक्तं। किंच। सुपांसुपा तिङां तिङा॥ सु
वंतेन तिङ्गेयः समासः षड्विधो बुधैः॥ सुपा राजपुरुषः। तिङा पर्यभूषत्। नाम्ना कुंभकारः। धातुना कटप्रूः। अजस्रं। तिङां तिङा। पि
वतखादता। तिङां सुपा। कृंतविचस्करोतियस्यां क्रियायां सा कृंतविचस्करणा। रहीडादयोन्यपदार्थे इति मयूरव्यंसकादौ पाठात्
समासः॥ ॥इति सर्वसमासदोषः॥ ॥अकपूः क्लूपयामानसे। अजनहृदे इति छेदः। अगा। घ्नन्तस्य समासस्यापत्ययोन्तावयं
वः स्यादस्येयाधूरसदनस्य। अर्द्धर्चः। अन्तश्चबहुश्चावध्येतर्थेव। नेर। अन्तक्षाम। बहुकसूक्तं। विल्लोः पूः विल्लपुरं। स्त्रीवत्वं
लोकात्। विमलापसरः। घ्नंतस्य समासस्य भोपदेन। अपद इति कृतसमासांतस्यानुकरणं। न च्छ्रेर्प्रथमा। एभ्योपस्य इत्यस्यात्। द्विगता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपोस्मिन्निति द्वीपं। अंतरीपं। प्रतीपं। समीपं। समापोदेवयजनमिति तुसमाआपोस्मिन्निति वोध्यं। कृतसमासांतयुक्तान्नेह। स्वप्। स्वपी। अ
वर्णांताद्। प्रेपं। परेपं। प्रापं। परापं। ऊस्नोर्द्वे। अनोः परस्यापस्यकृत्स्याद्वे। अनूपोदेशः। राजधुरा। अक्षेतु। अक्षधूः। दृढधूरक्षः। सखिपथो
रम्यपथोदेशः। अच्युतपञ्चपूर्वात्सामलोम्नः। एतत्पूर्वात्सामलोमातात्समासादच्स्यात्। प्रतिसामं। अनुसामं। अवसामं। प्रतिलोमं। अनुलो
+ संख्या४ मं। अवलोमं। कृत्स्नोदक्यांतु पूर्वीयाभूमेरजिष्यते। कृत्स्नभूमः। उदग्भूमः। पांडुभूमः। द्विभूमः। त्रिभूमः। प्रासादः। संख्यायानदीगोदावरीभा
च। पंचनदं। सप्तगोदावरं। अजितियोगविभागादन्यत्रापि। पद्मनाभः। अक्ष्णोदर्शनात्। अचक्षुःपर्यायादक्ष्णोऽच्स्यात्समासांतः। गवाम
क्षीवगवाक्षः। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुत्क्षीमवाग्धनुसाक्षिभ्रुवदारगवोर्वष्ठीवपष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजस
निःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्गयजुषजातोक्षमहोक्षवृक्षहोक्षपञ्चनगोष्ठश्वाः। एतेपंचविंशतिरजंतानिपात्यंते। आद्यास्त्रयोवह

=अजितिविधेयपूर्वनिर्देशादितिभावः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वौ। द्वौ। अविद्यमानानि चत्वार्यस्याचतुरः। विचतुरः। सुचतुरः। उपाभ्यां चतुरोऽतिष्ठते। त्रिचतुराः। चतुर्णां समीपे उपचतुराः। ततश्चकारस्य द्वौ द्वौ। स्त्री
पुंसौ। धेन्वनडुहौ। अक्षामे। वा ध्वनसे। अक्षिणी च भ्रुवौ च। क्षिभ्रुवं। दारगवं। अरुच्चाष्ठीवं तौ च ऊर्वष्ठीवं। निपातनाद्द्वौ लो
पः। पदष्ठीवं। निपातनात्पदन्नादेशस्य पद्भावः। नक्तं च दिवा च नक्तंदिवं। रात्रौ च दिवा च रात्रिंदिवं। रात्रेर्मान्तत्वं निपात्यते। अहनि च दिवा च अह
र्दिवं। वीप्सायां द्वंद्वो निपात्यते। अहन्यहनीत्यर्थः। सरजसमिति साकल्ये अव्ययीभावः। बहुव्रीहेस्तु। सरजः पंकजं। निश्चितं श्रेयो निश्रेयसं
तत्पुरुषस्त्वानेह। निश्रेयान्पुरुषः पुरुषस्यायुः पुरुषायुषं। ततो द्विगुः। द्व्यायुषं। त्र्यायुषं। ततो द्वंद्वः। त्र्यन्यायुषं। तत्र त्रयः कर्मधारयाः।
जातोक्षः। मृतोक्षः। दृष्टोक्षः। अनः समीपमुपध्मानं। टिलोपाभावः संप्रसारणं च निपात्यते। गोष्ठश्वागोष्ठश्वः। [illegible] वर्चसः। अत्य
स्यात्। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्चसं। राजवर्चसं। अवसमधेरतमसः। अवतमसम्। संतमसं। अधयतीत्ये

=पल्यामासभोक्तीनरीयंवर्चः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धांपचाद्यचा। अंधंतमोंधतमसं। श्वसोवसीयःश्रेयसः। वसुशब्दप्रशस्तवाची। ततःईयसुनिवसीयः। श्वसशब्दउत्तरपदार्थप्रशंसामात्रो। विषय
माह। मयूरव्यंसकादित्वात्समासः। श्वोवसीयें। श्वश्रेयसंतेभूयात्। अन्यवतप्राद्रुहसः। अनुरहसं। अवरहसं। तप्ररहसं। एतेरहसःसप्तमीस्था
त्। उरसिघत्युरसं। विभक्त्यर्थेव्ययीभावः। अनुगवमायामे। एतन्निपातनेदीर्घत्वे। अनुगवंयानं। यस्याचायामइतिसमासः। द्विस्तावात्रि
स्तावावेदिः। अव्युत्पत्यश्चिलोपस्समासश्चनिपातनते। यावतीपकृतोवेदिःततो द्विगुणात्रिगुणावाअश्वमेधादौतत्रेदन्निपातनं। वे
दिरितिकिं। द्विस्तावती त्रिस्तावतीरज्जुः। उपसर्गादध्वनः। प्रगताध्वानंप्राध्वोरथः। नपूजनात्। पूजनार्थात्परेभ्यःसमासांतानस्युः। सु
राजा। अतिराजा। स्वतिभ्यामेव। नेह। परमराजः। पूजनात्किं। गामतिक्रांतोतिगवः। बहुव्रीहौसक्थ्यक्ष्णोरित्यतःप्रागेवायंनिषेधः। ने
ह। सुसक्थ्यः। स्वक्ष्णः। किमःक्षेपे। क्षेपेयः किमस्त्रारहस्ततःपरंयत्तदन्तात्समासांतानस्युः। कुत्सितोराजाकिंराजा। किंसखा। किंगौः।

=प्राग्बहुव्रीहियहणंकर्त्तव्यमितिभाष्योक्तेः२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षेपेकिं। किंगजः। किंसखः। किंगवः। नञ्तत्पुरुषात्। समासांतोन। अराजा। अमरवा। तत्पुरुषात्किं। अधुरंशाकटं। पथोविभाषा। न
ऋष्टवीत्पथोवासमासांतः। अपथ्य। अपथ्याः। तत्पुषादित्येव। अपथोदेशः। अपथंवर्त्तते॥ ॥इतिसमासांताः॥ ॥अलुगुत्तरपदे। अ
लुगधिकारःप्रागानडः। उत्तरपदाधिकारस्त्वापादपरिसमाप्तेः। पंचम्यास्तोकादिभ्यः। एभ्यःपंचम्याअलुक्स्यादुत्तरपदे। स्तोकान्मुक्त
। एवमंतिकार्थदूरार्थकृच्छ्रेभ्यः। उत्तरपदेकिं। निष्क्रांतःस्तोकान्निस्तोकः। ब्राह्मणाच्छंसिनउपसंख्यानं। ब्राह्मणविहितानिशा
स्त्राण्युपचारात्ब्राह्मणानि। तानिशंसन्ती। तिब्राह्मणाच्छंसी। ऋत्विग्विशेषः। द्वितीयार्थेपंचम्युपसंख्यानादेव। ओजःसहोभ
ग्रमसस्तृतीयायाः। ओजसाकृतमित्यादि। ओजसउपसंख्यानं। ओजसाकृतं। ओजसेनकृतमित्यर्थः। पुंसानुजोजनुषाधइ
तिच। यस्यात्रजःपुमान्स्त्रीपुंसानुजः। जनुषांधोजातांधः। मनसःसंज्ञायां। मनसागुप्ता। आज्ञायिनिच। मनसइत्येव। मनसाआज्ञा

= केचित्तु ब्राह्मणाद्दाहत्यशंसन्ती तिल्यपोपात्पंचमीमातु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुंशीलमस्यमनसाज्ञायी। आत्मनश्च। आत्मनस्तृतीयायाअलुक्सान्तात्परस्यण इतिवक्तव्यं। पूरणप्रत्ययांतेउत्तरपदेइत्यर्थः। आ
त्मनापंचमः। जनार्दनस्त्वात्मचतुर्थ्यस्येतिबहुव्रीहिर्विधिः। पूरणेकिं। आत्मकृतावैयाकरणाख्यायाचतुर्थ्यः। आत्मनइत्येव
। आत्मनेपदं। आत्मनेभाषा। तादर्थ्येचतुर्थी। चतुर्थीतियोगविभागात्समासः। परस्यच। परस्मैपदं। परस्मैभाषा। हलदंतात्सप्त
म्याःसंज्ञायां। हलंतादंताच्चसप्तम्याअलुक्संज्ञायां। लचिसारः। गवियुधिभ्यांस्थिरः। आम्पाथिरस्यसस्यषःस्यात्। गविष्ठि
रः। अत्रगवीतिवचनादेवालुक्। युधिष्ठिरः। अरण्येतिलकः। अत्रसंज्ञायामितिसप्तमीसमासः। हृद्भ्यांच। हृदिस्पृक्। हृदि
स्पृक्। कारनाम्निचप्राचांहलादौ। प्राचांदेशेयत्कारनामतत्रहलादावुत्तरपदेहलदंतात्सप्तम्याअलुक्। मुकुटेकार्षापणं।
दृषदिमाषकः। पूर्वेणसिद्धेनियमार्थं। कारनाम्न्येव। प्राचामेव। हलादावेवेति। कारनाम्निकिं। जम्पाहितपशुः। कारास्प

=राजग्राह्योभागःकरःसस्यकारः१

=अलुगिवेशीपकालकमीःसप्तमीतिभाष्यम्३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पैतद्द्वयस्पनाम।षाचांकिं।यूथपशुः।हलादौकिं।अविकटोरणः।हलदंताकिं।नद्यांदोहः।नदीदोहः।मध्यादुरौ।मध्येगुरुः।अंता
च्च।अंतेगुरुः।अमूर्द्धमस्तकात्त्वागादकामे।कंठेकालः।उरसिलोमा।अमूर्द्धमस्तकात्किं।मूर्द्धशिखः।मस्तकशिखः।अका
मेकिं।मुखेकामोस्पंमुखकामः।वधेचविभाषा।हलदंतात्सपूर्वाद्वलुक्।हस्तेवधः।हस्तबन्धः।हस्तेतिकिं।गुप्तिवधः।तत
पुरुषेकृतिबहुलं।रात्रंवरमः।कर्णेजपः।कृत्तिन्।कुरुचरः।षाट्द्वयरकालदिवांजे।प्रावृषिजः।शरदिजः।कालेजः।दिवि
जः।पूर्वेसायंप्रपंचः।विभाषावर्षक्षरशरवरात्।एभ्यःसपूर्वाद्वलुंजे।वर्षेजः।वर्षजः।क्षरेजः।क्षरजः।शरेजः।शरजः।
वरेजः।वरजः।घकालतनेषुकालनाम्नः।सपूर्वाद्विभाषालुक्स्यात्।घ।पूर्वाह्णेतरे।पूर्वाह्णतरे।पूर्वाह्णेतमे।पूर्वाह्णतम
।काल।पूर्वाह्णेकाले।पूर्वाह्णकाले।तन।पूर्वाह्णेतने।पूर्वाह्णतने।शायंवासवासिघकालात्।रात्रेशायः।रात्रशायः।ग्रामेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=आसमंतात्खरेकुंडे तिष्ठन्तीति३

सः। ग्रामवासः। ग्रामेवासी। ग्रामवासी। अपोयो। नियन्मनुष्य। अभुयो निरुत्पत्तिर्यस्य सो अभुयोनिः। अभुभवोऽभ्रमः। अभुमंतावा
उपभागो। नेन्नसिद्धवक्षाणिषु च। इन्नन्तादिषु सप्तम्या अलुक्न। स्थ स्थिलशायी। सांकाश्यसिद्धः। चक्रवर्ती। स्थेचभाषाया
। सप्तम्या अलुग्न। समस्थः। भाषायां किं। कृष्णो स्पारखरेष्ठः। षष्ठ्या आक्रोशे। चौरस्य कुलं। आक्रोशे किं। ब्राह्मणकुलं।।
वाक्दिक्पश्वोर्युक्तिदंडहरेषु। वाचोयुक्तिः। दिशोदंडः। पश्वपतोहरः। आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेतिच। अ
मुष्यापत्यमामुष्यायणः। नदादिलात्फक्। अमुष्यपुत्रस्य भावजामुष्यपुत्रिका। मनोज्ञादिलाद्ध्ञ्। एवमामुष्यकुलिका
देवानांप्रियइतिचमूर्खे। अन्यत्रदेवप्रियः। शेषपृषोदरांगूलेषु शुनः। शुनःशेफः। शुनःपुच्छः। शुनोलांगूलः। दिवश्चदासे
। दिवोदासः। पुत्रेन्यतरस्यां। षष्ठ्याः पुत्रे परे अलुक्सादृनिंदायां। दास्याः पुत्रः। दासीपुत्रः। निंदायां किं। ब्राह्मणीपुत्रः। अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संबंध- स्प४

तो विद्या योनिसंबंधेभ्यः। विद्यायोनिसंबंधवाचिनऋदंतात्षष्ठ्याअलुक्। होतुरंतेवासी। होतुःपुत्रः। पितुरंतेवासी। पितुःपुत्रः। विद्यायोनिसंबंधेभ्यस्तत्पूर्वोत्तरपदयहणं। नेह। होतृधनं। पितृगृहं। विभाषाखस्पत्योः। ऋदन्तात्षष्ठ्याअलुग्वास्यात्स्वस्पत्योः परयोः। मातुःपितुर्भ्यामन्यतरस्यां। आभ्यांस्वसुःसस्पत्योर्वास्यात्समासे। मातुःष्वसा। मातुःस्वसा। पितुःष्वसा। पितुःस्वसा। लुक्पक्षेतु। मातृपितृभ्यांस्वसा। अभ्यांपरस्वसुःस्वस्रःस्यात्समासे। मातृष्वसा। पितृष्वसा। असमासे। मातुःस्वसा। पितुःस्वसा॥ ॥इत्यलुक्समासः॥ ॥धरूपकल्पचेलद्रुवगोत्रमतहतेषुङीनेकाचोह्रस्वः। भाषितपुंस्काद्योङीनदन्तस्यानेकाचो ह्रस्वःस्यात्धरूपकल्पप्रत्ययेषुपरेषुचेलडादिषुचोत्तरपदेषु। ब्राह्मणितरा। ब्राह्मणितमा। ब्राह्मणिरूपा। ब्राह्मणिकल्पा। ब्राह्मणिचेली। ब्राह्मणिद्रुवा। ब्राह्मणिगोत्रेत्यादि। वृत्रःपचाद्याचैवस्यादेशायुणयोरभावोपिनिपात्यते। चेलादीनिवृत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयेकुत्सनवाचीनिन्तेःकुत्सितानिकुत्सनैरितिसमासः।ग्रः किंदन्तातरा।भाषितपुंस्काकिंआमलकीतरा।कुवलीतरा।न
द्याःशेषस्यान्यतरस्यां।अङ्गतनद्याःघनेकाचश्चघादिषुह्रस्वोवास्यात्।ब्रह्मबंधुतरा।ब्रह्मबंधुतरा।स्त्रीतरा।स्त्रितरा।क्ष
न्नद्यान।लक्ष्मीतरा।उगितश्च।उगितःपरायानदीतदस्पंघादिषुह्रस्वोवास्यात्।विदुषितरा।ह्रस्वाभावपक्षेतसिलादिषि
तिपुंवत्।विदुत्तरा।दृत्यादिषुनु।विदुषीतरेत्यपुरा।हृतंतन्निर्मूलं।हृदयस्यहृच्छब्दस्यवयदरालासेषु।हृदयलिखतीतिहृल्लेखः
।हृदयस्यप्रियेहृद्या।हृदयस्यसंदेहादेम्।हृल्लासः।लेखेत्परांतस्यग्रहणं।घञ्जितुहृदयलेखः।लेखेयहरामेवज्ञापकं।उ
त्तरपदाधिकारेतद्धितविधिर्नास्तीति।वाशोकष्यन्त्ररोगेषु।हृच्छोकः।हृदयशोकः।सोहार्दं।सोहृद्यं।हृद्रोगः।हृदयरो
गः।हृदयशब्दपर्यायोहृच्छब्दोप्यस्ति।तेनसिद्धेप्रपंचार्थमिदं।पादस्यपदाज्यातिगोपहतेषु।एषूत्तरपदेषुपादस्यपदइत्य

=ज्ञापकवर्णनपरंभाष्यमत्रमानं३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त२

दंतआदेशः स्यात्। पादाभ्यामजतीति पदाजिः। पदातिः। अजपतिभ्यां पादेचेति णप्रत्ययः। अजेर्व्यभावो निपातनात्। पदगः। पदो
पहतः। पद्यत्यर्थे। पादस्य पत्स्यादतदर्थे पतिपरे। पादौ विध्यन्तीति पद्याः शर्कराः। अतदर्थे किं। पादार्थमुदकं पाद्यं। एके चरता
वुपसंख्यानं। पादाभ्यां चरतीति पदिकः। पर्पादित्यात्छन्। हिमकाषिहतिषु च। पद्भिन्नः। पत्काषी। पद्गतिः। अचः ञ्णौ। अचः पादस्य
पत्स्याच्छपरे। गायत्रीं पच्छः शंसति। पादपादमित्यर्थः। अचः किं। पादवाः काशी पलंददाति। वाघो षमित्रश्चादेषु। पादस्य पत्। प
द्घोषः। पादघोषः। पन्मिश्रः। पादमिश्रः। पच्छब्दः। पादशब्दः। निष्के चेति वाच्यं। पन्निष्कः। उदकस्योदः संज्ञायां। उदमेघः। उत्तरप
दस्य पतिवाच्यं। ह्रीरोदः। पेषंवासवाहनधिषु च। उदपेषपिनष्टि। उदवासः। उदवाहनः। उदधिर्घटः। समुद्रे नुपूर्वेण सिद्धं। एकहृ
लादौ पूरयितव्ये न पतरस्या। उदकुंभः। उदककुंभः। एके तिकिं। उदकस्थाली। पूरयितव्ये किं। उदकपर्वतः। मथोदनसक्तुबिंदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वज्रभारहारवीवधगाहेषुचाउरमंथः।उदकमंथः।उदौदनः।उदकौदनः।इकोह्रस्वोऽयोगालवस्य।इगंतस्याद्यंतस्यह्रस्वोवास्यादुत्तरप
दे।ग्रामणीपुत्रः।ग्रामणिपुत्रः।इकः किं।रमापतिः।अद्य इतिकिं।गौरीपतिः।गालवग्रहणंपूजार्थं।अन्यतरस्यामित्यनुवृत्तेः।इ
यङुवङ्भाविनामव्ययानांचनेतिवाच्यं।श्रीमदः।भ्रूभंगः।भ्रुकुटीभावः।अभ्रुकुंसादीनामितिवक्तव्यं।भ्रुकुसः।भ्रुकुटिः।भ्रूकुसे
ः।भ्रूकुटिः।अकारोनेनविधीयतइतिव्याख्यातरं।भ्रुकुसः।भ्रुकुटिः।भ्रुवाकुंसोभाषणंशोभावायस्यसः।स्त्रीवेषधारीनर्तकः।।
भ्रुवःकुटिःकौटिल्यं।एकतद्धितेच।एकशब्दस्यह्रस्वःस्यात्तद्धितेउत्तरपदेच।एकस्याआगतंएकरूपम।एकक्षीरं।ग्या
पोःसंज्ञाछंदसोर्बहुलं।रेवतिपुत्रः।अजक्षीरं।लेच।लपत्यपेग्यापोर्वाह्रस्वः।अजलवारो।हिलिलवा।षष्ठ्यःसंप्रसारणपुत्रपत्यो
स्तत्पुरुषे।षष्ठ्यंतस्यपूर्वपदस्यसंप्रसारणंस्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे।संप्रसारणस्यासंप्रसारणस्यदीर्घःस्यादुत्तरपदेपरे।

= हलइत्यनेनतुनात्रदीर्घः संप्रसारणात्पूर्वस्यह्रस्वः संप्रसारणनिमित्तनिरूपितोगावयवत्वाभावात्
प्रत्यासत्याहृदीर्घावयवस्यैवतत्रग्रहणादतएवनिरस्तमित्यादेनसा॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौमुदगंधीपुत्रः। कौमुदगंधीपतिः। व्यवस्थितविभाषयाह्रस्वोन। स्त्रीप्रत्ययेचानुपसर्जनेनेतिनदादिनियमप्रतिषेधात्। परमकारीषगं
धीपुत्रः। उपसर्जनेतुनदादिनियमान्नेह। अतिकारीषगंध्यपुत्रः। बहुनिवहुव्रीहौ। बंधुनाद्देउत्तरपदे ष्ठः संप्रसारणं स्यात्बहु
व्रीहौ। कारीषगंध्यावंधुरस्येतिकारीषगन्धीबन्धुः। वेतिकिं। कारीषगंध्यायाबन्धुः कारीषगंध्यावन्धुः। स्त्रीवनिर्देशात्कृत्रा
ह्रस्वरूपापेक्षया। मातृमातृकमातृषुवा। कारीषगंधीमातृः। कारीषगंध्यामातृः। कारीषगंधीमातृकः। कारीषगंध्या
मातृकः। कारीषगंधीमाता। कारीषगंध्यामाता। अस्मादेवनिपातनान्मातृशब्दस्यमातजादेशः कृत्रिकल्पश्च। बहुव्री
हावेवेदं। नेह। कारीषगंध्यायाःमाता। कारीषगंध्यामाता। चित्वसामर्थ्यात्त्रिस्वरोबहुव्रीहिस्वरंबाधते। इष्टकेषीकामालां
नांचितनूलभारिषु। इष्टकादीनांतदन्तानांचपूर्वपदानांचितादिषुक्रमादुत्तरपदेषुह्रस्वःस्यात्। इष्टकचितं। पक्वेष्टकचितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इषीकतूलं। मुंजेषीकतूलं। मालभारी। उत्पलमालभारी। कारेसत्यागदस्य। मुम्भ्यात्। सत्यंकारः। अगदंकारः। अरक्तोष्ठेतिव
क्तव्यं। अरक्तंकारः। धेनोर्भव्यायां। धेनुभव्या। लोकसहरणे। लोकंपरणः। परणादिमलविभुजादिभ्यः। इत्यनभ्यासः। अन
भ्यासेमित्यः। इरतः परिहर्तव्यइत्यर्थः। भ्राष्ट्रागप्रोरिधे। भ्राष्ट्रमिंधः। अग्निमिंधः। गिलेगिलस्य। तिमिंगिलः। अगिलस्यकिं। गि
लगिलः। गिलगिलेच। तिमिंगिलगिलः। उल्लभंड्योःकरणे। उल्लंकरणं। भंडंकरणं। रात्रेःकृतिविभाषा। रात्रिंकरः। रात्रिंचरः। रा
त्रिमटः। रात्र्यटः। अरिवर्यमिदंसत्रे। रिवितितु अरुर्द्विषदिति नित्यमेववक्ष्यते। रात्रिमन्यः। सहस्यसःसंज्ञायां। उत्तरपदे। सपला
ष्ठी। संज्ञायां किं। सहयुद्धा। यथाताधिकेच। अनयोरर्थयोः सहस्यसःस्यादुत्तरपदे। समुहूर्त्तंडोतिषमधीते। सद्रोणखारी॥
द्वितीयेचानुपरागे। अनुमेये द्वितीये सहस्यसःस्यात्। सराक्षसी कानिशा। राक्षसी साक्षाद्नुपलभ्यमानानिशायामनुमीयते॥

= પૂર્વવિધ્યતિલેખેનેતિભાવઃ ३ = ચાત્રેઃકૃતોલંસમવાન્તદંતવિધિઃ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानस्य छंदस्यमूर्धप्रभृत्युदर्केषु। समानस्य सः स्यादुत्तरपदेनमूर्द्धादिषु। अनुभ्रातासगर्भः। अनुसखासयूथ्यः। योनेः सनुत्यः। त
त्रभवइत्यर्थे सगर्भसयूथसनुताद्यत्। अमूर्द्धादिषु किं। समानमूर्द्धा। समानप्रभृतयः। समानोदर्कः। समानस्येति योगो विभज्यते
तेन सपक्षः साधर्म्ये सजातीयइत्यादिसिद्धमतिकाशिका। अथवा सदृशादृ सदृशवचनोऽस्ति। सदृशा सख्या ससखीति यथा
तेनायमस्य पदविग्रहो बहुव्रीहिः समानः पक्षो यस्य सः। ज्ञातिर्जनपदरात्रिनामिनामगोत्ररूपस्थानवर्णवयोवचनबंधुपुरा
णेषु। ज्ञातिसदृशमुत्तरपदेषु समानस्य सः स्यात्। सज्ञातिः। सजनपदः। सरात्रिः। चरणे ब्रह्मचारिणि। ब्रह्मचारिणि पुत्तरपदे समानस्य सः स्या
च्चरणे समानत्वे नगम्यमाने। चरणः शाखा। ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी। समानः सः सब्रह्मचारी
। तीर्थे ये। तीर्थउत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्। सतीर्थ्यः। एकगुरुकः। समानतीर्थे वसतीति यत्प्रत्ययः। विभाषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृशे। यारोपत्यये विवक्षितेदृत्येवा सोदर्यः। समानोदर्यः। दृग्दृशावतुषु। सदृक्। सदृशः। दृक्षे चेति वक्तव्यं। सदृक्षः। वतुरुत्तरार्थः। इदं किमोरीश्की। इदृशावतुषु। इदमईश्किमः कीस्यात्। ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतूदाहरणं वक्ष्यते। दृक्षे च। ईदृक्षः। कीदृक्षः। आ सर्वनाम्नः। सर्वनाम्न आकारः स्यात् दृग्दृशावतुषु दृक्षे च। तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घमत्वोत्वे। अमूदृशः। अमूदृक्। अमूदृक्षः। समासे गुलेः संगः। अंगुलिशब्दात् संगस्य सस्य मूर्द्धन्यः स्यात् समासे। अंगुलिषंगः। समासे किं। अंगुलेः संगः। भीरोः स्थानं। भीरुशब्दात् स्थानस्य सस्य मूर्द्धन्यः स्यात् समासे। भीरुष्ठानं। असमासे तु भीरोः स्थानं। ज्योतिरायुषः स्तोमः। आभ्यां स्तोमस्य सस्य मूर्द्धन्यः समासे। ज्योतिष्टोमः। आयुष्टोमः। समासे किं। ज्योतिषः स्तोमः। सुषामादिषु च। तस्य षत्वं मूर्द्धन्यः। शोभनं साम यस्य स सुषामा। सुषंधिः। एतिसंज्ञायामगात्। सस्य मूर्द्धन्यः। हरिषेणः। एति किं। हरिसेनः। संज्ञायां किं। पृथुसेनः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अगकारात्किं। विष्वक्सेनः। इरकोरित्येव। सर्वसेनः। नक्षत्राद्वा। एतिसंज्ञायामगकारान्मूर्द्धन्योवा। रोहिणीषेणः। रोहिणीसेनः। अगकारात्किं। शातभिषक्सेनः। आकृतिगणोयं। अषष्ठ्यन्तीयास्वस्वानास्वदुगाद्यीराद्यास्थास्थितोत्सुकोतिकारकरागछेषु। अन्यशब्दस्यदुगागमःस्यादाद्यीरादिषुपरेषु। अन्यदाद्यीः। अन्यदाद्या। अन्यदास्या। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदृतिः। अन्यदागः। अषष्ठ्यात्किं। अन्यस्यान्येनवाद्यीरन्याद्यीः। कारकेछेचनायान्निषेधः। अन्यस्यकारकोन्यत्कारकः। अन्यस्यायमन्यदीयः। गतादेराकृतिगणात्वाच्छः। अर्थेविभाषा। अन्यदर्थः। अन्यार्थः। कोः कत्तत्पुरुषेचि। अजादावुत्तरपदे। कुत्सितोश्वः कदश्वः। कदन्नं। तत्पुरुषेकिं। कुत्सिताराजा। त्रीच। कुत्सितास्त्रयः कत्त्रयः। रथवदयाश्च। कदुष्णः। कदहः। तत्रोचजाते। कत्तरणं। कापथ्यक्षयोः। कापथं। कासः। अक्षत्रादेनतत्पुरुषः। अक्षिन्नादेनबहुव्रीहिवा। ईषदर्थेईषज्जा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=शाद्यतत्वसाक्षात्कारवन्तो योगिनः३

लंकाजलं। अजाद्यपि परत्वात्कादेशः। काम्लः। विभाषापुरुषे। कापुरुषः। कुपुरुषः। अपाप्तविभाषेयं। ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यं। कवंचोष्णे। उष्णशब्दे उत्तरपदे कवंकाचवास्यात्। कवोष्णं। कोष्णं। कदुष्णं। एषोदरादीनि यथोपदिष्टं। एषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि। एषतउदरं एषोदरं। तलोपः। वारिवाहकोवलाहकः। पूर्वपदस्य वः। उत्तरपदादेश्च लत्वं॥ भवेद्गौणगमाद्गुणः सिंहोवरीविपर्ययात्॥ गृद्धोत्मावर्णविकृतेर्दरीनाशात्एषोदरं॥ दिक्पूर्वादेभ्यस्तीरस्य तारभावावा। दक्षिणातारं। दक्षिणतीरं। उत्तरतारं। उत्तरतीरं। कुतोदान्नानाशब्दभ्यो ध्येषु लमुत्तरपदादेषु लत्वं च। दुःखेन दण्यते दूडाद्याः। दुःखेन नाश्यते दूणाद्याः। दुःखेन दभ्यते दूडभः। खलत्रिभ्यः। दंभेर्नलोपो निपात्यते। दुःखेन ध्यायतीति दूद्याः। जातश्रोत्रिकः। ब्रुवतोस्यासीदिति ब्रुवसी। ब्रुवच्छब्दस्य वआदेशः। सदेरधिकरणे उट्। आकृतिगणोयं। संहितायां। अधिकारोयं। कर्णलक्षणस्याऽविष्णुपञ्चमाणामिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।कर्णाद्वा द्वे परे लक्षणावाचकसदीर्घः। द्विगुणाकर्णः। लक्षणास्पकिं। द्योभनकर्णः। अविष्णदीनां किं। विष्णकर्णः। अष्णकर्णः। पं
चकर्णः। मणिकर्णः। मिल्लकर्णः। छिल्लकर्णः। छिड्डकर्णः। स्कूवकर्णः। स्वस्तिककर्णः। नहि कृतिरपि व्यधिरुचिसक्तिनिषु
क्तो। क्विबंतेष्वेतेषु पूर्वस्य दीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्मावित्। नीरुक्। अभीरुक्। अतीवट्। परीतत्। क्वा विति किं। परिणा
हनं। विभाषा पुरुषहृत्यतामंहकप्रकृत्या विभाषानुवर्त्तते। साचव्यवस्थिता। तेन गतिकारकयोरेव। नेह। पटुरुक्। तिग्मरुक्। वर्ण
र्थोः संज्ञायां कोटरकिंशुलुकादीनां। कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात्संज्ञायां। वनं पुरगामिश्रकासिध्र
कासारिकाकोटराद्येभ्यः। वनन्नाद्स्योत्तरपदस्थेभ्यस्त्वगात्वनत्वन्येभ्यः। दूरकोटरांतापचदीर्घविधौ कोटराद्योवोध्याः
।तेषांहृतदीर्घाणां गात्वविधौ निर्देशो नियमार्थः। अग्रेद्वाद्स्यतुविध्यर्थः। पुरगावणं। मिश्रकावणं। सिध्रकावणं। सारिकाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णं। कोदरावणं। एम्पस्वेतिकिं। असिपत्रवनं। वनस्याग्रेअग्रेवणं। राजदंतादिषु निपातनात्सप्तम्या अलुक्। प्रातिपदिकार्थ
मात्रेप्रथमा। किंशलुकागिरिः। वल्ले। वल्लपत्ययेपरेदीर्घः स्यात्संज्ञायां। कृषीवलः। मतोवहूचोऽनजिरादीनां। अमरावती। अन
जिरादीनांकिं। अजिरवती। बहूचःकिं। बुद्धिमती। संज्ञायामित्येव। नेह। वल्लयवती। शरादीनांच। शरावती। इकोवहेऽपीलोः। इगन
स्पदीर्घः स्याद्वहे। ऋषीवहं। कपीवहं। इकःकिं। पिंडवहं। अपीलोःकिं। पीलुवहं। अपील्वादीनामितिवक्तव्यं। दारुवहं। उपसर्गे
स्यघञ्प्रमनुष्यबहुलं। उपसर्गस्यबहुलंदीर्घः स्याद्घञ्नेपरेननुमनुष्ये। परिपाकः। परीपाकः। अमनुष्ये किं। निषादः। इकःकात्रे।
दृगंतस्योपसर्गस्यदीर्घः कात्रे। वीकात्राः। नीकात्राः। इकः किं। प्रकाशः। अष्टनःसंज्ञायां। उत्तरपदेदीर्घः। अष्टापदं। संज्ञायां किं।
अष्टपुत्रः। चितेःकपि। एकचितीकः। नरेसंज्ञायां। विश्वानरः। मित्रेचर्षौ। विश्वामित्रः। सत्रयोः किं। विश्वमित्रोमाणवकः। शु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोदंतदंष्ट्राकर्णकुंदवराहपुच्छपदेषु दीर्घो वाच्यः। श्वादंतइत्यादि। प्रनिरंतःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ए
भ्यो वनस्पराणत्वस्यात्। पवणम्। कार्ष्यवणं। इक्षुणात्परत्वात्वस्यात्वं। विभाषौषधिवनस्पतिभ्यः। वनस्पराणःस्याह्न। दूर्वावणं। दूर्वावनं।
शिरीषवणं। शिरीषवनं। ह्रस्वनृभ्यश्चाभेद। नेह। देवरास्वनं। इरिकाश्विभ्यःप्रतिषेधो वक्तव्यः। इरिकावनं। मिरिकावनं। वाहनमा
हितात्। आरोप्यतेयदुह्यतेतद्वाहनस्यान्निमित्तात्परस्यवाहननकारस्यणत्वस्यात्। इक्षुवाहणं। आहितात्किं। इन्द्रवाहनं। इन्द्र
स्वामिकवाहनमित्यर्थः। वहतेर्ल्युटि ऋहिरिहेवसूत्रेनिपातनात्। पानंदेशे। पूर्वपदस्यान्निमित्तात्परस्यपानस्यनस्यणत्वस्याद्देशे
गम्ये। क्षीरपानंयेषांतेक्षीरपाणाः। उशीनराः। सुरापाणाःप्राच्याः। पीयतइतिपानंकर्मणिल्युट्। वाभावेकरणादयोः। पानस्येत्यत्र। क्षी
रपाणा। क्षीरपानं। गिरिनद्यादीनांवा। गिरिणदी। गिरिनदी। चक्रणितंवा। चक्रनितम्वा। प्रातिपदिकांतनुम्विभक्तिषुच। पूर्वपदस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्निमित्तात्परस्पस्थुस्थितस्पनस्पणोवास्यात्। प्रातिपदिकांते। माषवापिणो। नुमि। व्रीहिवापाणि। विभक्तौ। माषवापेण। पक्षेमा
षवापिना बित्यादि। उत्तरपदंयत्प्रातिपदिकंतदन्तस्यैवरागत्वं। नेहगर्गीणांभगिनी। अतएवनुग्रहणकृतं। अंगस्यनुविधानात्त
द्भक्तोहिनुम्। नतत्तरपदस्य। किंच। प्रहिरावन्निसादोहिवेर्नुमोणत्वार्थमपिनुम्ग्रहणं। प्रेन्वनमित्सादोनुसुम्ना हित्वान्न। युवादेर्न
। रम्पयूना। परिपक्वानि। एकाजुत्तरपदेणः। नित्यमित्युक्तम्। वत्रहरणो। हरिंमानयतीतिहरिमाणी। नुमिक्षीरपाणि। विभक्तौ। क्षी
रपेण। रम्यविणा। कुमतिच। कवर्गवत्युत्तरपदेणवत्। हरिकामिणो। हरिकामाणि। हरिकामेण। पदव्यवायेपि। पदेनव्यवधानेण
त्वंनस्यात्। माषकुंभवापेन। चतुरंगयोगेन। अतद्धितइतिवाच्यं। आर्द्रगोमयेण। शुष्कगोमयेण। कुरुकवुरूणिजातिः। अत्रसु
राणिपात्यते। कुरुंवुरुधान्याकं। स्त्रीत्वमतत्र। जातिः किं। कुतुंवुरूणिकुत्सितानितिन्दुकीफलानीत्यर्थः। अपरस्परः क्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सानत्से। सुरिनपात्यते। अपरस्परः सार्थीगच्छंति। सततमविच्छेदेनगच्छंतीत्यर्थः। क्रियेतिकिं। अपरपरागच्छंति। अपरेचपरेचसह देवगच्छंति। गोष्पदंसेवितासेवितप्रमाणेषु। सुद्सस्पषत्वंचनिपात्यते। गावःपद्यंतेलिन्देशेसगोभिःसेवितोगोष्पदः। असेवितेअगोष्पदान्परराणपानि। प्रमाणे। गोष्पदमात्रक्षेत्रं। सेवीतिकिं। गोःपदंगोपदं। आस्पदं प्रतिष्ठायां। आत्मपापनावस्थानेसुद्निपातपते। प्रतिकिं। आपदादापदं। आश्चर्यमनित्ये। अद्भुतेसुद्। आश्चर्यंयदिस्मुंजीति। अनित्येकिं। आश्चर्यंकर्मशोभनं। वर्चस्केवस्करः। कुत्सितंवर्चोविर्चष्कमन्नमलंतास्मिन्सुद्। अवकीर्यतद्स्वस्करः। वर्चस्केकिं। अवकरः। अपस्करोरथांगं। अपकरोन्यः। विकिरःशकुनोवा। पक्षेविकिरः। वावचननेवसुद्विकल्पेसिद्धेविकिरग्रहणंतस्यापिशकुनेरन्यत्रप्रयोगोमाभूदितिवृत्तिः। तन्न। भाष्यविरोधात्। प्रतिष्कश्चश्वकश्चः। कश्चागतिशासनयोरित्यस्यपतिपूर्वस्यपचाद्यचिसुरिनपात्यतेषत्वंच। सहायःपुरोयायी

विकिरग्रहणमिति। किंविकिरशकुनोविकरोवेतितन्मतेसूत्रपाठः। तस्यापिविकिरशब्दस्यापिभाष्यतिनत्रहिशकुनोविकरोवेतिवाक्यमस्तिविकरशब्दशकुनोवेसुअस्मानेशकुनोनसूत्रमजानीयेसन्यशब्दार्थोनित्यमवविकरःस्यात्। किंशकुनेरस्यापिकल्पयोगात्। शकुनोवोभयत्रानुसमेवेसाधिकरणकल्पस्येवप्रतीतेरतुकोनवावचननेनशकुनिरूपसमाधिकरणशब्दस्यप्रतिकिंचुनिपातनाविकरइत्यतेद्ध कु

विकिरशब्दस्यशकुनोविकरोवादसाधारणरूपत्वेनतेनैवसिद्धेः॥ ॥ ॥

विकिरशब्दस्यविकल्पइत्येवभाष्यविरुद्धमस्तु॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वापुतिष्कवाइत्युच्यते। कशेः किं। प्रतिगतः कशां प्रतिकशोष्वः। यद्यपि कशेरेवकशा तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्र
तेर्ग्रहणार्थं। तेनधात्वंतरोपसर्गान्न। प्रकरावहरिश्चंद्रावृषी। हरिश्चंद्रग्रहणममंत्रार्थं। ऋषी किं। प्रकरोवादेशः। हरिश्चंद्रोमा
णवकः। मस्करमस्करिणोवेणुपरिव्राजकयोः। मकरशब्दोव्युत्पन्नस्तस्यसुडिनिश्चानिपात्यते। वेशिवतिकिं। मकरोग्राहः। मक
रःसमुद्रः। कांतीराजस्कंदेनगरे। ईषत्तीरमस्यतिकांतीरंनामनगरं। अजस्येव कंदमस्येसजस्तुरंनामनगरं। नगरेकिं। कांती
रं। अजतुरं। कारस्करोवृक्षः। कारंकरोतीतिकारस्करोवृक्षः। अन्यत्र कारकरः। केचित्तुकाकादिचितिपठंतिनसूत्रेषु। पारस्करप्रभृ
तीनिचसंज्ञायां। एतानिसुडंतानिनिपात्यंतेनाम्नि। पारस्करः। किष्किंधा। तद्धृतोः करपत्योश्चारदेवतयोः सुडंतलोपश्च। तात्पूर्वं
चर्वेनटकारोपिवोध्यः। तद्धृतोर्दकारतकारौलुप्येतेकरपत्योस्तुसुडंचारदेवतयोरितिसमुदायोपाधिः। तस्करः। बृहस्पतिः। पाय

तत्रोपश्चेसजातकारस्यपूर्वेनत्वेनवकारेवोध्यः. तत्रोपश्चेसजातअवदकारस्यपूर्वेनतकारः

६३

नमाराकरणदिभ्यगृहीत्वा निमाचः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=प्रायः पापं विनिर्दिष्टं शिनिस्तस्य विशोधनं॥

=प्रत्ययविधायकशास्त्रे षष्ठ्यो दृष्टान्तः॥

समर्थत्वाद्वा सकृत्पर्यायः सकृत्वेन अर्थप्रतिपादकत्वं तच्च परिनिष्ठितत्वेन॥ ॥

सचित्तिचित्तयोः। प्रायश्चित्तिः। प्रायश्चित्तं। वनस्पतिरित्यादि। आकृतिगणोयं॥ ॥इतिसमासाश्रयाविधयः॥ ॥समर्थानां प्रथमा
द्वा॥ इदं पत्रयमधिक्रियते। प्राग्दिव्वा इति यावत्। सामर्थ्यपरिनिष्ठितत्वं। कृतसंधिकार्यत्वमितियावत्। प्राग्दीव्यतोण्। तेनदीव्यती
त्यतः प्राग्गणधिक्रियते। अश्वपत्यादिभ्यश्च। एभ्योण्स्यात्प्राग्दीव्यतीयेष्वर्थेषु यावच्च्यमाणाण्पस्यापवादः। तद्धितेष्वचामादेः॥
जितिणितिचतद्धितेपरेष्वचामादेरचोवृद्धिः स्यात्। कितिच। कितितद्धितेचतथा। अश्वपतेरपत्यादि आश्वपतं। गाणपतं। गाण
पत्यो मंत्र इति तु षामादिकमेव। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः। दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणो
पवादः। दैत्यः। अदितेरादित्यस्य वा आदित्यः। प्राजापत्यः। यमाच्चेतिकाशिकायां। याम्यः। पथिमात्रौ। पार्थिवा। पार्थिवी। दैवा
यत्रत्रौ। दैव्यं दैवं। वर्षाष्ठिलोपेयच्च। वार्ष्यः। ईकक्। वार्षिकः। ष्ण्यान्नोकारः। अश्वत्थामः। पृषोदरादित्वात्सस्यतः। भवार्थेतु

=हलोयमांयमीतिलोपः२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लुग्वाच्यः। अश्वत्थामा। लोम्नोपत्येषुवहुषु। गोहृदीत्रोपवादः। उडुलोमाः। उडुलोमान्। वहुषुकिं। ओडुलोमिः। गोरजादिप्रसंगेयत्। गव्यं। अ
जादिषसंगेकिं। गोभ्योहेतुभ्यआगतगोरूप्यं। गोमयं। उत्सादिभ्योञ्। औत्सः। अग्निकलिभ्यांढक्कञ्। आग्नेरपत्यादि आग्नेयं। काले
यं॥ ॥इत्यपत्यादिविकारांतार्थसाधारणोप्रत्ययाः॥ ॥स्त्रीपुंसाभ्यांनञ्स्नञौभवनात्। धान्यानांभवनइत्यतःप्रागर्थेषुस्त्रीपुंसाभ्यांवुञ्स्न
ञौस्तः। स्त्रैणः। पौंस्नः। वत्यर्थेन। स्त्रीपुंवच्चेतिज्ञापकात्। स्त्रीवत्। पुंवत्। द्विगोर्लुगनपत्ये। द्विगोर्निमित्तंयत्तद्धितोञ्जादिरनपत्यार्थःप्रागर्
हीव्यतीयस्तस्यलुक्स्यात्। पंचसुकपालेषुसंस्कृतःपंचकपालःपुरोडाशः। द्विगुनिमित्तस्येतिकिं। पंचकपालस्येदंखंडं पांचकपालं। अ
जादिकिं। पंचगर्गरूप्यं। अनपत्येकिं। द्वयोर्मित्रयोरपत्यंद्वैमित्रिः। गोत्रेऽलुगचि। अजादौ। प्राग्दीव्यतीयेविवक्षितेगोत्रप्रत्ययस्यालुक्। ग
र्गाणांछात्राः। इद्वाक्रूः। आपत्यस्यचतद्धितेनाति। हलःपरस्यापत्यप्रत्ययकारस्यलोपःस्यात्तद्धितेपरेनत्वाकारे। गार्गीयाः। प्राग्दीव्यतीकिं। गर्गे
ये

क्रमाङ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्योहितंगर्गीयं। अचिकिं। गर्गेभ्य आगतं गर्गरूपं। यूनिलुक। प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षितेयुवप्रत्ययस्य लुक्स्यात्। ग्लुचुक
स्यगोत्रापत्यं ग्लुचुकायनिः। वक्ष्यमाणः फिञ्। ततो यून्यण। ग्लौचुकायनः। अणो लुकि वृद्धेर्लाभावाच्छोन। पैलादिभ्यश्च। एभ्यो युवप्र
त्ययस्य लुक्स्यात्। पीला यावेत्यण। तस्मादणो द्व्यचइति फिञ्। तस्य लुक्। पैलः पिता पुत्रश्च। तद्राजाश्चाणः। द्व्यञ्मगधेत्यणन्ताद्गोत्रा
दाद्यणो द्व्यचइति फिञो लुक्। आंगः पिता पुत्रश्च। इञ्यन्ताच्च। गात्रेयइञ्तदन्ताद्युवप्रत्ययस्य लुक्स्यात्तच्चेद्गोत्रं प्राचां भवति। पन्ना
गारस्यापत्यं। अतइञ्। यञिञोश्चेति फक्। पान्नागारिः पिता पुत्रश्च। प्राचांकिं। दाक्षिः पिता दाक्षायणः पुत्रः। नतोल्वलिभ्यः। तौ
ल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुक्न स्यात्। पूर्वेणाप्राप्तः तुल्वलः। ततइञि फक्। तौल्वलिः पिता। तौल्वलायनः पुत्रः। फक्फि
ञोरन्यतरस्यां। यूनिलुगिति नित्ये लुक्प्राप्ते विकल्पार्थं सूत्रं। कात्यायनस्य छात्राः। क्रौतीयाः। कात्यायनीयाः। यस्कस्यापत्यं यास्कः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=अपत्यार्थः असतियोगविभागे अदंतवाह्यः दिष्टकृतिसंबद्धस्यैवापत्यार्थस्योपयोगात् उपग्वादिप्रकृतिसंबद्धः शेषस्य ३

शिवादयः। तस्यापत्यं युवा यास्कायनिः। अरणो द्वाचरतिफिञ्। तस्य छात्राः यास्कीयाः। यास्कायनीयाः। तस्यापत्यं। षष्ठ्यंतात् कृतसंधेः समर्थादपत्येर्थे उक्तावद्यमाणाश्च प्रत्ययाः स्युः। उपगोरपत्यमौपगवः। आदिवृद्धिरंत्योपधावृद्धी बाधते॥ तस्येदमित्यपत्येपि बाधनार्थं कृतं भवेत्॥ उत्सर्गः दो षस्वासौ वृद्धान्यस्य प्रयोजनं॥ ॥ भानोरपत्यं भानवः। कृतसंधेः किं। सौत्यिति। अकृतमूहपरिभाषयासावुत्यिति भाभृत। समर्थपरिभाषयानेह। वस्त्रमुपगोरपत्यं चैत्रस्य। उपमात्किं। अपत्यवाचकात्षष्ठ्यर्थमाभृत। वाग्रहणात् वाक्यमपि। दैवयज्ञी। तिसूत्रादन्यतरस्याग्रहणानुवृत्तेः समासोपि। उपग्वपत्यं। जातित्वान्ङी। ष। औपगवी। आम्बपतः। दैत्यः। औत्सः। स्त्रेणः। पौरुः। अपत्यं पौत्रप्रभृति गोत्रं। अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। जीवति तु वंशे पुत्रे वा। वंशे पुत्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यान्न गोत्रसंज्ञं। भ्रातरि च जीवति। ज्येष्ठे भ्रातरि जीवति कनीयान् चतुर्थादिर्युवा स्यात्। वान्य

=उत्पादकप्रबंधो वंशः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मिन्सपिंडेस्थविरतरेजीवति। भ्रातुरन्यस्मिन्सपिंडेस्थविरतरेजीवतिपौत्रप्रभृतेरपत्यंजीवदेवयुवसंज्ञं। एकंजीवतिग्रहणमपत्यस्यवि
शेषणं॥ द्वितीयंसपिंडस्यातरन्निर्देशउभयोरुत्कर्षार्थः। स्थानेनवयसाचोत्कृष्टेपितृव्येमातामहेभ्रातरिवाजीवति। गार्ग्यस्यापत्यंगा
र्ग्यायणः। गार्ग्योवा। स्थवीतिकिं। स्थानवयोन्यूनेगार्ग्यएवाजीवतिकिं। मृतेभ्रातोवागार्ग्यएव। वृद्धस्यचपूजायामितिवाच्यं। गोत्रस्ये
वृद्धसंज्ञाप्राचां। गोत्रस्ययुवसंज्ञापूजायांगम्यमानायां। तत्रभवान्गार्ग्यायणः। पूजेतिकिं। गार्ग्यः। यूनश्चकुत्सायांगोत्रसंज्ञेतिवा
च्यं। गार्ग्यीजाल्मः। कुत्सेतिकिं। गार्ग्यायणः। एकोगोत्रे। गोत्रेएकएवापत्यप्रत्ययःस्यात्। उपगोर्गोत्रापत्यमौपगवः। गार्ग्यः। नाडायन
ः॥ गोत्रेष्वेकोनसंख्यानांप्रत्ययानांपरंपरा॥ यद्वास्वद्यूनसंख्यभ्योनिष्पत्तिःप्रसज्यते॥१॥ अपत्यंपितुरेवस्यात्तनःप्राचामपीति
च॥ मतभेदेनतद्ग्राह्यं। सूत्रमेतन्नयोन्तरं॥२॥ पितुरेवापत्यमितिपक्षे हिउपगोस्तृतीयेवाच्येऔपगवादिःस्यात्। चतुर्थेत्वजीवद्गपेक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तवंशपेक्षयोपगवेः फक्। इत्यं फगित्रोः परंपरायां मूलाच्छ्रुततमे गोत्रेष्टको नवांतं प्रत्ययाः स्युः। पितामहादीनामपीति मुख्यपक्षे तु तत्रैव वाच्ये उपगोरणादष्टेमिद्वे पिञ्चरांतादित्रिपिस्याद्यनुर्थे ततः फगिति फगित्रोः परंपरायां ज्ञातमे गोत्रेऽष्टनव तेरनिष्टप्रत्ययाः स्युः। अतो नियमार्थमिदं सूत्रं। एवमुत्तरसूत्रेष्वपि। गोत्रादधून्यस्त्रियां। मूलप्रत्ये गोत्रप्रत्ययात्तादेव प्रत्ययः प्राप्तस्त्रियां तु नयुवसंज्ञा। गर्गस्य युवापत्यं गार्ग्यायणः। स्त्रियां गोत्रत्वादेकस्त्वप्रत्ययः। अतइञ्। अदंतयत्यातिपदिकं तत्प्रकृतिकात्षष्ठ्यंतादिञ्स्यादपत्येर्थे। दाक्षिः। वाहादिभ्यश्च। वाहुविः। ओदुलोमिः। आकृतिगणोयं। सुधातुरकङ्। चादिञ्। सुधातुरपत्यं सौधातकिः। व्यासवरुडनिषादचंडालविवानांचेति वक्तव्यं। नद्याभ्यां पदांताभ्यां पूर्वांतुताभ्यामेव। पदांताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वोक्तमादेच आगमोस्तः। वैयासकिः। वारुडकिरित्यादि। गोत्रेकुजादिभ्यश्छञ्। ब्रातच्छञोरस्त्रियां। ब्रातवाचिभ्यश्छञ्छतेभ्यश्चस्वार्थे त्र्यः स्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नतुस्त्रियां। कौंजायन्यः। बहुत्वेतु जत्वाच्चुग्वक्ष्यते। बाध्र्यायन्यः। स्त्रियां। कौंजायनी। गोत्रत्वेन जातित्वान्ङीष्। अनंतरापत्ये। कौंजि
ः। नडादिभ्यः फक्। गोत्रदृष्टेव। नाडायनः। चारायणः। अनंतरो नाडिः। हरितादिभ्योऽञः। एभ्योऽञंतेभ्यो यूनि फक्। हारितायनः। इह गोत्र
धिकारोपि सामर्थ्याद्यून्यपि। नहि गोत्रादपरो गोत्रप्रत्ययः। विदादयस्तु गणो हरितादिः। यञिञोश्च। गोत्रे यो यञिञौ तदंतात्फक् स्यात्
। अनाति सुक्तेरापत्यस्येति यलोपेन। गार्ग्यायणाः। दाक्षायणाः। शारद्वतुनकदर्भाद्भवत्ताग्रायणेषु। गोत्रे फक्। अत्रिञोरपवा
दः। आद्यो विदादी। शारद्वतायनो भार्गवश्चेत्। शारद्वतोन्यः। शौनकायनो वात्स्यश्चेत्। शौनकोन्यः। दार्भायणाः। आग्नायणाश्चेत्।
दर्भिरन्यः। द्रोणापर्वतजीवन्तादन्यतरस्मात्। एभ्यो गोत्रे फक् वा। द्रौणायनः। द्रौणिः। पार्वतायनः। पार्वतिः। जैवंतायनः। जैवंतिः। अना
दिरिह द्रोणः। अश्वत्थाम्न्यनंतरेऽपचारात्। अन्द्र्यानंतर्ये विदादिभ्योऽञ्। एभ्योऽञ्गोत्रे। येत्रान्यपत्यस्तेभ्यो नंतरे सूत्रेस्वार्थेप्यञ्

भारतप्रसिद्धद्रोणाद्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदस्पगोत्रवेदः। अनंतरोवेदिः। वाहादेराकृतिगणत्वादिञ्। पुत्रस्यापत्यंपौत्रः। दौहित्रः। गर्गादिभ्योयञ्। गोत्रइत्येव। गार्ग्यः। वात्स्यः। यञञो
श्च। गोत्रेयद्यञंतमञंतंचतदवयंवयोरेतयोर्लुक्स्यात्। तल्लुक्तेवकुत्वेननुस्त्रियां। गर्गाः। वत्साः। विदाः। उर्वाः। तल्लुक्तेकिं। प्रियगार्ग्याः। स्त्रियां
तुगार्ग्यः स्त्रियः। गोत्रेकिं। हैप्यः। औत्सः। प्रवराध्यायप्रसिद्धमिहगोत्रं। तेनेहन। पौत्राः। दौहित्राः। मधुवश्चौबीत्यणकौशिकयोः। गोत्रेयञ्। मा
धवोब्राह्मणः। माधवोन्यः। वाभ्रव्यः कौशिकः। वाभ्रवोन्यः। वभ्रुशब्दस्यगर्गादिपाठात्सिद्धेनियमार्थमिदं। गर्गादिपाठफलंतुलोहितादि
कार्यं। वाभ्रव्यायणी। कपिवोधादंगिरसे। गोत्रेयञ्स्यात्। काप्यः। वौध्यः। आंगिरसकिं। कापेयः वौधिः। वतंडाच्च। आंगिरसइत्येव। वातंड्यः
। अनांगिरसेतुगर्गादौशिवादौचपाठाद्यञ्नस्यात्। वातंड्यः। वातंडः। लुक्स्त्रियां। वतंडाच्चेतिविहितस्यलुक्स्यात्स्त्रियां। वाहीकरवादित्वान्नीन्
वतंडी। अनांगिरसेतुवातंड्यायनी। लोहितादित्वात्फक्। अणिन्तुवातंडी। आषित्वाद्दृष्टप्रमाणः प्रकृत्य। अश्वादिभ्यःफञ्। गोत्रे। आश्वाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं सम्प्रदायेन सर्वत्र युक्तं तस्माद्धेयं गोत्रसंज्ञायां गोत्राधिकार इति सूत्रनिर्णयात्वात्सर

नः। पुंसि जाते। पुंसीति प्रकृतिविशेषणं। जातस्य गोत्रं जातायनः। पुंसीति किं। जातायाः अपत्यं जातेयः। भर्गाद्वैगर्ते गोत्रे फञ्। भार्गायणः। वैगर्तः। भार्गिरन्यः। शिवादिभ्यः। गोत्रे इति निवृत्तं। शिवस्यापत्यं शैवः। गांगः। पक्षे तिकादित्वात् फिञ्। गांगायनिः। शुभ्रादित्वाद्ढक्। गांगेयः। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः। अवृद्धे भ्यो नदीमानुषीनामभ्योऽण्स्याद्ढकोपवादः। यामुनः। नार्मदः। चितिताया अपत्यं चैतितः। अवृद्धाभ्यः किं। वासवदत्तेयः। नदीत्यादि किं। वैनतेयः। तन्नामिकाभ्यः किं। शोभनायाः अपत्यं शौभनेयः। अन्धकवृष्णिकुरुभ्यश्च। ऋषयो मंत्रदृष्टारः। वासिष्ठः। वैश्वामित्रः। अन्धकेभ्यः। श्वाफल्कः। वृष्णिभ्यः। वासुदेवः। आनिरुद्धः। शौरिरित्यु वाहादित्वात्। कुरुभ्यः। नाकुलः। साहदेवः। इत्र एवायमपवादोऽन्धेपवादन्यायात्। अग्निशर्मादानुपरत्वाद्ढक्। आग्नेयः। मनुकृतसंख्या संभवपूर्वायाः। संख्यादिपूर्वस्य मात्रन्नादस्य उदादेशः स्याद्गोत्रप्रत्ययश्च। षाण्मातुरः। सामातुरः। भ्रातृमातुरः। आदेशार्थं वचनं। प्रत्ययस्तु

+ द्वैमातुरः

अन्येऽपवादा पूर्वाचार्यैर्निर्णीतो भ्रमात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सर्गेणासिद्धः। स्त्रीलिंगनिर्देशोऽर्थापेक्षः। तेन धान्यमातुर्न। संख्येति किं। सौमात्रः। श्रुत्रादित्वाद्दैमात्रेयः। कन्यायाः कनीनच्। ढकोपवादेऽण्
तत्सन्नियोगेन कनीनादेशश्च। कानीनो व्यासः कर्णश्च। अन्तढायाएवापत्यमित्यर्थः। विकर्णशुंगछगलाद्वत्सभरद्वाजात्रिषु। अपत्येऽण्
। वैकर्णिर्वात्स्यः। वैकर्णिरन्यः। शौंगो भारद्वाजः। शौंगिरन्यः। छागलश्चात्रेयः। छागलिरन्यः। केचित्तु शुंगे त्यावंतं पठंति। तेषां ढकि युष्मदा
हरणं। शौंगेयः। पीलायाश्च। तन्नामिकाणां वाधित्वाद्यचइति ढकि प्राप्ते पक्षेऽण् विधीयते। पीलायाश्चापत्ये पैलः। पैलेयः। ढकि चमइकात्।
चादणं। पक्षेऽण्। मांडूकेयः। मांडूकः। मांडूकिः। स्त्रीभ्यो ढक्। स्त्रीप्रत्ययांतेभ्यो ढक्स्यात्। वैनतेयः। वाहादित्वात्सौमित्रिः। शिवादित्वात्साप
त्नः। द्व्यचः। द्व्यचः स्त्रीप्रत्ययांतादपत्ये ढक्। तन्नामिकाणामपवादः। दाक्षेयः। पार्थ इत्यत्र तु तस्येदमित्यणा। इत्यश्वानिनः। इकारांताद्द्व्यचोपत्ये ढ
क्स्यान्नलिजंतात्। दौलेयः। नैषेयः। आत्रेयः। श्रुत्रादिषु श्रुत्रादिषु ढक्स्यात्। श्रुत्रस्यापत्यं श्रौत्रेयः। विकर्णकुषीतकात्काक्षीवतेषु। अपत्ये ढक्। वैक

वैत्पुरुनेः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+ यूस्पतइत्र३

ण२ चान२

रीयः। कौषीतकेयः। अन्योवैकर्णिः। कौषीतकिः। श्रुवेतुकच्चौटकः। औवेयः। प्रवाहणाद्वस्योत्तरपदस्याचामादेरचोवृद्धिः
स्यान्मूर्वपदस्यतुवाढेपरे। प्रवाहेस्यापत्यंप्रावाहणेयः। प्रवाहणेयः। तत्पुत्रयवस्य च। ढांतस्यप्रवाहणस्योत्तरस्यादेरचोवृद्धिः स्यान्मूर्वपदस्यतु
वा। प्रवाहणेयस्यापत्यंप्रावाहणेयिः। प्रवाहणेयिः। वाह्यतद्धितनिमित्तावृद्धिर्ढश्रयेणविकल्पेनवाधितुंनशक्यतइतिसूत्रारम्भः। क
ल्याणपादीनामिनङ्। एषामिनङ्स्याद्वङ्। कल्याणिनेयः। वाधूकिनेयः। कुलटायाः। इनञोत्रविकल्प्यते। ढकतुनित्यःपूर्वेणैव। कौ
लटिनेयः। कौलटेयः। सतीमिक्षुकेत्रकुलटा। यातुव्यभिचारार्थंकुलान्पठतितस्याःक्तादाभोढेतिढक्। कौटेरः। हृद्भगसिंध्वंतेपूर्वपद
स्य च। हृदाद्यंतपूर्वोत्तरपदयोश्चामादेरचोवृद्धिर्वितिणिति कित्त्वे। सुहृदोपत्यंसौहार्दः। सुभगायाअपत्यंसौभागिनेयः। सक्तुप्रधाना
सिंधवःसक्तुसिंधवः। तेषुभवःसाक्तुसैंधवः। चटकायाअपत्यं। चटकस्यतिवाच्यं। लिंगविशिष्टपरिभाषयास्त्रियामपि। चटकस्यचटका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यावाऽपत्यं चाटकेरः। स्त्रियामपत्ये लुग्वक्तव्यः। तयोरेवस्त्र्यपत्यं चटका। ऋजादित्वाट्टाप्। गोधायाढक्। गौधेरः। शुभ्रादित्वात्पक्षे ढक्।
गौधेयः। आरगुदीचां। गौधारः। रका सिद्धे आकारोच्चारणमन्यतो विधानार्थो। जडुस्यापत्यं जाडारः। पेडुस्यापत्यं पाडारः। कुद्राभ्यो वा। अ
गहीनाशीलहीनाश्च कुद्रास्ताभ्यो वा ढक्। पक्षे ढक्। कारोरः कारोयः। दासेरः। दासेयः। पितृष्वसुश्छण्। अणोपवादः। पैतृष्वस्रीयः। ढ
किलोपः। पितृष्वसुरपत्यं लोपस्याढकि। अत एव ढक्। पैतृष्वसेयः। मातृष्वसुश्च। पितृष्वसुर्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः। मातृष्व
सेयः। चतुष्पाद्भ्यो ढञ्। ढलोपाकङ्। कङ्भिन्नस्यावर्णान्तस्य लोपस्याढ्परे। कामंडलेयः। कमंडलुशब्दश्चतुष्पाज्जातिविशेषे। गव्य
दिभ्यश्च। एभ्यो ढञ्स्यात्। अणढकोरपवादः। गार्ग्ये यः। मित्रयोरपत्ये अर्थ्यणपापौ ढञ्। केकयमित्रयुप्रलयानां यादेरियः। एषां यकारा
देरियादेशः स्यान्त्रिति णिति किति च तद्धिते परे। इती यादेशः प्राप्तः। दाक्षिनायनः। दाक्षिनायनाः पर्वणीकं जैह्मणिनेयवाणिनायनिभ्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राहत्यधेवत्पञ्चारवैद्यकमैत्रेयहिरण्मयानि। एतानि निपात्यंते। इतियुलोपः। मैत्रेयः। मैत्रेयौ। यस्कादिभ्यो गोत्रे। एभ्योपत्यप्रत्ययस्य लुक्सान्तलक्षते बहुलेन तु स्त्रियां। मित्रयवः। अत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। एभ्यो गोत्रप्रत्ययस्य लुक्सान्तलक्षते बहुलेन तु स्त्रियां। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अंगिरसः। बहुवचनं प्राच्यभरतेषु। बहुचः परो यदन्नृषाच्यगोत्रे भरतगोत्रे च वर्त्तमानस्तस्य लुक्सात्। पन्नागाराः। युधिष्ठिराः। नगोपवनादिभ्यः। गोत्रप्रत्ययस्य लुग्न स्यात्। विदाद्यंतर्गणोयं। गोपवनाः। शैग्रवाः। तिककितवादिभ्यो द्वन्द्वे। एभ्यो गोत्रप्रत्ययस्य बहुलुक्स्याद्द्वन्द्वे। तैकायनयश्च कैतवायनयश्च। तिकादिभ्यः फिञ्। तस्य लुक्। तिककितवाः। उपकादिभ्यो न्यतरस्यां द्वन्द्वे। एभ्यो गोत्रप्रत्ययस्य बहुलुग्वास्याद्द्वन्द्वे। द्वाष्टकं कपिष्ठलाः। द्वाष्टकिकापिष्ठलयः। लमकाः। लामकायनाः। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्। एतयोरवयवस्य गोत्रप्रत्ययस्य णोयञश्च बहुलुक्स्याद्वक्षिष्टस्य प्रकृतिभागस्य यथासंख्यमगस्तिकुण्डि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

डिनच्। एतावदेशोऽस्तः। अगस्तयः। कुंडिनाः। राजश्वशुराद्यत्। राज्ञोजातावेवेतिवाच्यं। ये चाभावकर्मणः। यादौतद्धितेपरे अन्यकृत्यास्यान्नतु
भावकर्मणः। राजन्यः। श्वशुर्यः। जातिग्रहणाच्छूद्रेवृत्यन्नाराजनः। अन्। अणि अन्यकृत्यास्यादिति ठिलोपोन। अभावकर्मणः किं। रा
ज्ञोभावकर्मवाराज्यं। तयोरिन्द्रे। इन्द्रकृत्यास्यादणि परे। चक्रिणोपत्यं चाक्रिणः। नमपूर्वोपत्यः वर्मणः। मपूर्वान्यकृत्यानसादपत्येति।
भाऽसामः। मपूर्वः किं। सोत्वनः। अपत्ये किं। चर्मणापरिवृतश्चार्मणोरथः। अवर्मणः किं। चक्रवर्मणोऽपत्यं चाक्रवर्मणः। वाहितनाम्न इति
वाच्यं। हितनाम्नोऽपत्यं हैतनामनः। हैतनामः। ब्राह्मोजातौ। योगविभागोत्रकर्तव्यः। ब्राह्म इति निपात्यते अनपत्येणि। ब्राह्मऋषिः। ततो
जातौ। अपत्येजातावणि ब्रह्मणश्छिलोपोनस्यात्। ब्रह्मणोपत्यं ब्राह्मणः। अपत्ये किं। ब्राह्मी ओषधिः। औक्षमनपत्ये। अणि ठिलोपो
निपात्यते। औक्षंपदं। अनपत्ये किं। उक्षणोपत्यमौक्षणः। षपूर्वहन्धृतराज्ञामणि। षपूर्वेभ्योऽनतस्पहनादेश्च भस्यानोलोपोणि। ताक्ष्णः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रोत्रियः। धनगोत्रो पत्यं धार्त्तराष्ट्रः। षेतिकिं। सामनः। अणिकिं। ताक्षरणः। क्षत्राद्गुः। क्षत्रियः। जाताविति वा। क्षात्रिरन्यः। कुलात्वः। कुलीनः। त
द्वतादपि। उत्तरसूत्रे पूर्वपदादिति लिंगात्। आढ्यकुलीनः। अपूर्वपदादन्यतरस्यां ढकञौ। कुलादित्येव। पक्षेरवः। कुल्यः। कौलेयकः। कुली
नः। पदग्रहणं किं। बहुकुल्यः। बाहुकुलेयकः। बहुकुलीनः। महाकुलादञखञौ। अन्यतरस्यामित्यनुवर्त्तते। पक्षेरवः। माहाकुलः। माहाकुलीनः
। दुष्कुलाढ्कः। पूर्ववत्पक्षेरवः। दौष्कुलेयः। दुष्कुलीनः। स्वसुश्छः। स्वस्रीयः। भ्रातुर्व्यच्च। चाच्छः। अणापवादः। भ्रात्रव्यः। भ्रात्रीयः। यन्नपत्ये
। भ्रातुर्व्यन्स्यादपत्ये। प्रकृतिप्रत्ययसमुदायेनात्रोच्यते। भ्रात्रव्यः शत्रुः। पाप्मना भ्रात्रव्येणेति रूपचारात्। वत्सादिभ्यश्छः। ढस्येकः। अंगात्य
स्य ढस्येकादेशः स्यात्। रैवतिकः। गोत्रस्त्रियाः कुत्सने च। गोत्रे यास्त्रीतद्वाचकाच्छ्वस्ढकौ स्तः कुत्साया। सामर्थ्यादिति। गार्गीयः। अपत्यं गा

महाकुलीनः।

रामः
१२०

रस्य ढस्येकादेशः स्यात्। रैवतिकः। गोत्रस्त्रियाः कुत्सने च। गोत्रे यास्त्रीतद्वाचकाच्छ्वस्ढकौ स्तः कुत्साया। सामर्थ्यादिति। गार्गीयः। अपत्यं गा
र्गीगार्गिको वाऽजाल्लः। पुंवद्भावाद्गार्गीशब्दस्ढकौ। यस्येति लोपः। आपत्यस्येति यलोपः। वृद्धाद्ढकसौवीरेषु बहुलं। सुवीरदेशोद्भवः सौवीरः। वृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ठात्सौवीरगोत्राद्यूनि वहुलं ठक्स्यात्कुत्सायां। भागवित्तेर्भागवित्तिकः। पक्षे फक्। भागवित्तायनः। फेश्च। फिञ्नंतात्सौवीरगोत्रादपत्ये छः स्यादृक्
चकुत्सने गम्ये। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादित्वात्फिञ्। तस्यापत्यं यामुंदायनीयः। यामुन्दायनिकः। कुत्सने किं। यामुंदायनिः। जौ
त्सौ किस्यास्मोरापक्षत्रिये तिलुक्। सौवीरेषु किं। नैकायनिः। फांटाहृतिमिमताभ्यां फिञौ सौवीरेषु। नेत्यर्थ्या संख्यं। अत्याचूरस्यपरनि
पाताद्विंगादिति वृत्तिः। भाष्ये तु यथा संख्यमेवस्थितं। फांटाहृतः। फांटाहृतायनिः। मैमतः। मैमतायनिः। कुर्वादिभ्योण्यः। अपत्ये। कौरव्या
ः। ब्राह्मणाः। तावद्वृद्धाः। सम्राजः क्षत्रिये। साम्राज्यः। साम्राज्योन्यः। सेनानलक्षणाकारिभ्यश्च। एयोण्यः। हारिषेण्यः। लाक्षण्यः। कारिः शिल्पि
तस्मात्। तांतुवाय्यः। कौंभकार्यः। नापित्यः। उदीचामित्र। हारिषेणिः। लाक्षणिः। तांतुवायिः। कौंभकारिः। नापितान्तु परत्वात्फिञेव। नापिता
यनिः। तद्धिताणुपसंख्यानं। षपूर्वेति अणि अकारलोपः। नाक्षणः। पक्षे नाक्षण्यः। तिकादिभ्यः फिञ्। नैकायनिः। कौद्राल्यकामीर्याभ्यां च। अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्ये फिञ्। इञोपवादः। परमप्रकृतेरेव यमिष्यते। प्रत्ययसन्नियोगेन प्रकृतिरूपं निपात्यते। कोद्वालस्यापत्यं कौद्वालायनिः। कर्मारस्यापत्यं कार्मार्यायणिः। छागलेयोऽपि। छाग्यायनिः। वार्ष्यायणिः। अपत्ये फिञ्। इञोपवादः। कार्ष्यायणिः। अणगुत्रिकं। दाक्षायणः। द्व्यचः किं। औपगविः। सदारीनां बाफिञ्। आदायनिः। आदिः। इदं चात्र ज्ञेयं। आम्रगुप्तायनिः। प्राचां तु आम्रगुप्तिः। वृद्धाल्किं। दाक्षिः। अगोत्रादिं। औपगविः। वाकिनादीनां कुक्। अपत्ये फिञ्। वाकिनस्यापत्यं वाकिनकायनिः। वाकिनिः। पुत्रादन्यतरस्यां। अस्मादाफिञ्सिद्धस्तस्मिन्परे पुत्रांतस्य वा कुग्विधीयते। गार्गीपुत्रकायणिः। गार्गीपुत्रायणिः। गार्गीपुत्रिः। प्राचामवृद्धात्फिन्बहुलं। ग्लुचुकायनिः। मनोर्जातावञ्यतौ षुक्। समुदायार्थो जातिः। मानुषः। मनुष्यः। जनपदशब्दात्क्षत्रियादञ्। जनपदक्षत्रियो वीचकादञ्। आदपत्ये। दांडिनायनेत्रिमूर्धिनपातनादिलोपः। ऐक्ष्वाकः। ऐक्ष्वाकी। क्षत्रियसमानशब्दाज्जनपदशब्दात्तस्य राजन्यपत्यवत्। तद्राजमात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपाणस्तद्राजरूपन्वर्थसंज्ञासामर्थ्यात्। पंचालानां राजा पांचालः पौरोरवक्तव्यः। पौरवः। पांड्रोड्रीणः। पांड्यः। शैल्वेयगांधारिभ्यां च। आभ्यामपत्येऽञ्। वृद्धेरिति त्र्यञोपवादः। शैल्वेयः। गांधारः। तस्य राजन्यप्येवं। द्व्यञ्मगधकलिंगसूरमसादाणः। अञोपवादः। द्व्यञ्। आंगः। वांगः। सौह्यः। मागधः। कालिंगः। शौरमसः। तस्य राजन्यप्येवम्। वृद्धेल्लोपालाज्जादञ्प्रदः। वृद्धात्। आवंत्यः। सौवीर्यः। रुक्मः। आवंत्यः। कौसल्यः। अजादस्यापत्यमाजाद्यः। कुरुनादिभ्यो ण्यः। कौरव्यः। नैषध्यः। सनैषधस्यार्थपतेरित्यादेर्वौषधेः। ण। माल्वावयवषत्यग्रथ्यकलकूटाश्मकादिञ्। माल्वो जनपदस्तदवयवा उदुंबरादयस्तेभ्यः षत्यग्रथ्यादिभ्यस्त्रिभ्यश्च इञ्स्यादञोपवादः। औदुंबरिः। षात्यग्रथिः। कालकूटिः। आश्मकिः। राजन्यप्येवं। तेतद्राजाः। अजादयस्तत्संज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियाम्। बहुष्वर्थेषु तद्राजस्य लुक्सात्तदर्थे ऋते बहुलं न तु स्त्रियां। इक्ष्वाकवः। पंचालाः इत्यादि। कथं तर्हि कौरव्याः पांड्याः। तस्यामेवरघोः पांड्या इति कौरव्ये पांड्ये चसाध्वव इति समाधेयं। रघूणामन्वयं वक्ष्ये। निरुध्यमाणं यदुभिः कथंचिदिति तु रघुयदुशब्दयोः

उदुंबरास्तिलखलामडुकारयुगंधराः भूलिंगाः द्वारदंडाश्च माल्वावयवसंज्ञिताः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तरपत्सेलक्षणया। कम्बोजाल्लुक्। अस्मान्नद्राजस्यलुक्। कंबोजः। कंबोजौ। कम्बोजादिभ्य इति वक्तव्यं। चोलः। द्राकः। द्यचूलक्षणास्याणो लुक्
केरलः। यवनः। अञो लुक्। कंबोजाः समरेद् इति पाठः सुगमः। दीर्घादिपाठेतु कम्बोजो भिजनो येषामित्यर्थः। सिंधुतरुशिलादिभ्योणञादित्य
रा। स्त्रियामवंतिकुंतिकुरुभ्यः। तद्राजस्य लुक्स्यात्। अवंती। कुंती। कुरुः। आत्र्य। तद्राजस्य कारस्य स्त्रियां लुक्स्यात्। शूरसेनी। मद्री। कथं
तर्हि माद्री सुतावितिह्रस्वस्य पाठ इति हरदत्तः। भर्गादित्वं वाक्लप्यं। नपान्यभर्गादियौधेयादिभ्यः। एभ्यस्तद्राजस्य न लुक्। पांचाली। वैदर्भी। आं
गी। वांगी। मागधी। एतेषाञ्चाः। भार्गी। कारूषी। कैकेयी। कैकयी। यचतुर्जन्यजनकभावलक्षणे पुंयोगे। पांचाल्युधाभुक्ता आभ्यां द्यचश्चतिढक्।
ततः स्वार्थे पाञ्चादियौधेयादिभ्यामराजादित्सन्। शाङ्करवाद्य ञ्तिङ्गीन। जातश्चेतिलुकि तुढगंतत्वाद्। प्रदानानिवृत्तिस्वरः स्यात्। यौधेयी। दौ
कैयी। अणिञोरनार्षयोर्गुरूपोत्तमयोः षड्गोत्रे। आदीनामंत्यमुत्तमं। तस्य सभी एमुपोत्तमं। गोत्रे यावणिञौ विहितावनार्षौ तदंतयोर्गुरूपोत्तमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योः प्रातिपदिकयोः स्त्रियांषष्ठ्यादेशः स्यात्। निर्दिष्टपमानस्यादेशाभवंतीत्यणिञोरेव षष्ठ्यादितो। यष्ठ्याः श्रापू। कुमुद्गंधेरपत्यंस्त्रीकौमुद्गंध्या। वारण्या। अनार्षयोः किं। वासिष्ठी। वैश्वामित्री। गुरूपोत्तमयोः किं। औपगवी। जातिलक्षणोऽपि गोत्रे किं। औद्दालकी जाता आहिछत्री। गोत्रावयवात्। गोत्रावयवा गोत्राभिमताः कुलाख्यास्ततो गोत्रे विहितयोरणिञोः स्त्रियां षष्ठ्यादेशः स्यात्। अगुरूपोत्तमार्षमारंभः। पौणिक्या। भौणिक्या। क्रौड्यादिभ्यश्च। स्त्रियां षष्ठ्यपत्ययः स्यात्। अगुरूपोत्तमार्षो नणिञन्तार्षश्चारम्भः। क्रौड्या। माद्र्या। सूत्र्या युवत्या। सूत्या। भोजक्षत्रियो भोज्या। देवयज्ञियो चिल्लक्षिसात्यमुग्निकांडेविः। पान्यतरस्यां। एभ्यश्चानुर्भ्यः षष्ठ्यादेवा। अगोत्रार्षमिदं गोत्रे परत्वा युवन्तेते। पक्षे इतो मनुष्येतिङीष्। देवयज्ञ्या। देवयज्ञी॥ ॥इत्यपत्याधिकारः॥ ॥तेनरक्तं रागात्। रज्यतेनेनेति रागः। कषायेण रक्तं वस्त्रं काषायं। मांजिष्ठं। रागाल्लिं। देवदत्तेनरक्तं वस्त्रं। लाक्षारोचनादृक्। लाक्षि

कः। रौचनिकः। शाकलकर्दमाभ्यामुपसंख्यानं। शाकलिकः। कार्दमिकः। आ

गरवादि

=शाकलं त्वचिरवंडेस्यादागवस्कनिवल्कले इति विश्वः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्यामरापी तिवृत्तिकारः। द्वाकलः। कार्दमः। नीलया अन्। नीलारक्तं नीलं पीतालक्त्वा पीतकं। हरिद्रा महारजना भामन्। हारिद्रं। माहारजनं। न
क्षत्रेण युक्तः कालः। पुष्येण युक्तं पौषमहः। पौषी रात्रिः। लुप्तविशेषे। पूर्वेण विहितस्य लुप्तात्वाद्दिष्टं तात्मकस्य कालस्यांतरविशेषश्चेन्न ग
म्यते। अद्य पुष्यः। कथं तर्हि पुष्ययुक्ता पौर्णमासी पौषीति। विभाषा फाल्गुनी श्रवणा कार्त्तिकी चैत्री। अ इति निर्देशेन पौर्णमास्या अथ लुप्तेति
ज्ञापितत्वात्। श्रवणाशब्दात्तु अतस्य लुप्। युक्तवद्भावाभावश्च। अबाधकान्यपि निपातनानि श्रावणी। संज्ञायां श्रवणाश्वत्थाभ्यां। विशेषा
र्थं यमारंभः। श्रवणा रात्रिः। अश्वत्थो मुहूर्त्तः। संज्ञायां किं। श्रावणी। आश्वत्थी। दृष्टान्तः। नक्षत्रदृष्टाद्युक्ते काले तस्य हि विशेषसत्यमस्तीति।
तिष्यपुनर्वसवीयमहः। राधालुराधीया रात्रिः। दृष्टं साम। तेनेत्येव। वसिष्ठेन दृष्टं वासिष्ठं साम। अस्मिन्नर्थे अण् इहावक्तव्यः। उद्वानसादृष्ट
मौद्वानसम्। औद्वानसं। कलेर्दृष्टं कालिनादृष्टं कालेयं साम। वामदेवाद्यो। वामदेवेन दृष्टं वामदेव्यं। सिद्धयस्येति लौकिकेन किमर्थं यतोऽसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यहणमातदर्थभूतवामदेव्यस्पनन्ज्वरे॥ परिवृतोरथः। वस्त्रैःपरिवृतोवाश्वोरथः। रथः किं। वस्त्रेणपरिवृतःकायः। समंताद्वेष्टितःपरिवृतउच्यते। तेनेहन। छात्रैःपरिवृतोरथः। पांडुकंबलादिभिः। पांडुकंबलेनपरिवृतःपांडुकंबली। पांडुकंबलशब्दोराजास्तरणावर्णीकंबलस्यवाचकः। मत्वर्थीयेनैसिद्धेवचनमरणोनिवृत्यर्थं॥ द्वैपवेयाघ्रास्त्र। द्वैपिनोविकारोद्वैपंतेनपरिवृतो द्वैपोरथः। एवंवैयाघ्रः। कौमारापूर्ववचने। कौमारेत्यविभक्तिकोनिर्देशः। अपूर्वत्वेनिपातनमिदं। अपूर्वपतिःकुमारीमुपपन्नःकौमारःपतिः। यद्वा अपूर्वपतिःकुमारीपतिमुपपन्नाकौमारीभार्या। तत्रोद्धृतममत्रेभ्यःशरावेउद्धृतःशारावश्चोदनः। उदूरतिरिहाद्धरणापूर्वकोनिधानेवर्त्तते। तेनसप्तमी। उद्धृत्यनिहितइत्यर्थः। स्थंडिलाच्छ्रयितरिवृते। तत्रेत्येवसमुदायेनचेद्धुतंगम्यते। स्थंडिलेशयितुंनियमोस्यस्थांडिलः। संस्कृतंभक्षाः। सप्तम्यन्ताद्गणस्यात्संस्कृतेर्थेयत्संस्कृतंभक्षाश्चेत्तेस्युः। श्राद्धेसंस्कृताश्राद्धाः। अष्टसुकपालेषुसंस्कृतोष्टकपालः पुरोडाशः। शूलोरवाद्यत। अरणापवादः। शूलेसंस्कृतंशूल्यमांस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।उखापात्रविशेषः।तस्यांसंस्कृतमुख्यां।स्थूलकादधिसंस्कृतंदाधिकंउदश्वितोऽन्यतरस्यां।वक्ष्यमाणापद्देशाद्दुसुक्तांनात्क्रः।दुसुउसु
कृतएतदन्तात्परस्यठस्यकःस्यात्।उदकेनश्वयतिवर्द्धतेइत्युदश्वित्।तत्रसंस्कृतःओदश्वित्कः।औदश्वित्कः।दुसुसोःप्रतिपदोक्तयोर्ग्रह
णान्नेह।आशिषाचरतिआशीर्विकः।उषाचरतिऔषिकः।दोषरूपसंख्यानं।दोष्णीचरतिदौष्णिकः।क्षीराद्धन्।अत्रसंस्कृतसेवसंबध्य
ते।ननुभक्षाइति।तेनयवाग्वाभिभवति।हैरेयी।सास्मिन्पौर्णमासीति।इतिशरदादिसंज्ञायामितिलभ्यते।पौषीपौर्णमास्यस्मिन्पौषो
मासः।आग्रहायणश्चत्यादृक्।अग्रेहायनमस्याइत्याग्रहायणी।प्रज्ञादेराकृतिगणत्वात्ष्ण्।पूर्वपदात्संज्ञायामितिणत्वं।आग्र
हायणीपौर्णमासी।अस्मिन्नाग्रहायणिकोमासः।अश्वत्थेनयुक्तापौर्णमासीअश्वत्थः।निपातनात्पौर्णमास्याम्लुप्।आश्व
त्थिकः।विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।एभ्यःस्वष्टग्वापद्देशात्।फाल्गुनिकः।फाल्गुनोमासः।श्रावणिकः।श्रावणः।कार्त्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किकः। कार्त्तिकः। चैत्रिकः। चैत्रः। सास्यदेवता। इन्द्रोदेवतास्य ऐन्द्रं हविः। पशुपतां वाहस्पत्यं। त्पद्यमानद्रव्येऽद्रव्यविशेषोदेवता। मंत्रस्त्वा च। ऐंद्रो मंत्रः। आग्नेयोदेवा ब्राह्मणोदेवतयेति नुत्रो विकेर्थे सर्वत्राग्नौ तिष्ठक। कस्येत्। कशब्दस्य कारादेशः स्यात्तत्पयसन्नियोगेन। यस्येति लोपात्परत्वादिष्टिः। कोब्रह्मादेवतास्य कायं हविः। श्रीर्देवतास्य श्रायं। शुक्राह्वन। शुक्रियं। अपोनप्त्रपांनप्त्रभ्यांघः। अपोनप्त्रियं। अपां नप्त्रियं। अपोनपात्। अपांनपाद्देवतापुत्पयसन्नियोगेन नलुक्तसूत्रं निपात्यते। अतएवापोनपातेः पांनपातेनुबुहीतिद्वैषः कृत्। योगविभागोयथासंख्यनिवृत्त्यर्थः। अपोनप्त्रियं। शतरुद्राहुश्च। चाक्षुः। शतरुद्रादेवतास्य शतरुद्रियम्। शतरुद्रीयं। घछ्यौ विधानसामर्थ्यात्। द्विगोर्लुगनपत्यादितिनलुक्। महेन्द्राच्चारणेच। चाक्षुः। महेन्द्रियं हविः। माहेंद्रं। महेन्द्रियं। सोमाद्वाग। सोम्यं। टिलान्ङीप्। सोमी। अक्। वाय्वनुपित्रुषसोयत्। वायव्यम्। अतव्यं। रीङ्। अतः। अकृद्यकारेऽसार्वधातुकयकारेचोत्वपरेऽदंतांगस्य रीङादेशः स्यात्। यस्येति

+ अपांनप्त्रीयं३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च। पित्र्यं। उषस्यं। द्यावापृथिवी। श्रुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाश्च। चाद्यत्। द्यावापृथिवीयं। द्यावापृथिव्यं। श्रुनासीरीयं। श्रुनासीर्यं। अग्नेर्ढक्। आग्नेयः। कालेभ्योभववत्। मासिकं। पाढषेरण्। महाराजप्रोष्ठपदाद्ञ्। माहाराजिकं। प्रोष्ठपदिकं। देवताद्वंद्वे च। अत्रपूर्वोत्तरयोराद्यचोवृद्धिः स्यात्त्रिति त्रिति कितिचपरे। आग्निमारुतं। नेंद्रस्यपरस्य। सोमेन्द्रं। परस्यकिं। ऐन्द्राग्नः। दीर्घाच्चवरणस्य। दीर्घात्परस्यवरुणस्यनवृद्धिः। ऐंद्रावरुणं। दीर्घात्किं। आग्निवारुणीमनड्वाहीम्। तदस्मिन्वर्त्तनइति नवयज्ञादिभ्य उपसंख्यानं। नावयज्ञिकः कालः। पाकयज्ञिकः। पूर्णमासाद्रावक्तव्यः। पूर्णमासोस्यांपौर्णमासी। तिथिः। पित्व्यमातुलमातामह पितामहः। एते निपात्यन्ते। पितुर्भ्रातरिवान्। पितुर्भ्रातापित्व्यः। मातुर्ल च। मातुर्भ्रातामातुलः। माहपित्व्यांपितरिवामहच्च। मातुः पितामातामहः। पितुः पितापितामहः। मातरिवच्च। मातामही। पितामही। अवेर्दुग्धेसोढ दूसमरीसचोवक्तव्याः। सकारपाढसामर्थ्यान्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षः। अविसोढं। अविदूसं। अविमरीसं। तिलान्निष्फलात्पिंजपेजौ। तिलपिंजः। तिलपेजः। वंध्यातिलइत्यर्थः। पिंडस्य रसिडिच्च। तिलपिंजः। तस्य समूहः। काकानां समूहः काकं। वाकं। भिक्षादिभ्योण। भिक्षाणां समूहो भैक्षं। गर्भिणीनां समूहो गार्भिणं। इहभस्याढइति पुंवद्भावे कृते। इनरपनपत्ये। अनपत्यार्थः णि परे इन्यकृत्यास्यात्। तेन नस्तद्धितइति टिलोपो न। युवतीनां समूहो यौवनं। शत्रन्ताद्स्तुरा त्तादेरत्रियौवतं। गोत्रोक्षोष्ट्रोरभ्रराजपुत्रवत्समनुष्याजाद्वुञ्। एभ्यः समूहे वुञ्स्यात्। लौकिकमिहगोत्रमात्रज्ञापत्यमात्रं। युवोरनाकौ। युवुरतयोरनुनासिकयोः क्रमादन अक एतावादेशौ स्तः। ग्लुचुकायनीनां समूहो ग्लौचुकायनकं। औक्षुकं। मित्यादि। आपत्यस्येति यलोपेप्राप्ते। प्रकृत्याऽकेराजन्यमनुष्ययुवानः। राजन्यकं। मानुष्यकं। वृद्धाच्चेतिवक्तव्यं। वार्द्धकं। केदाराद्यञ्च। केदार्यं। केदारकं। गणि कायायञिति वक्तव्यं। गाणिकं। हञ्कवचिनश्च। चात्केदारादपि। कवचिनां समूहः कावचिकं। केदारिकं। ब्राह्मणमाणववाडवाद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाबालरणं। माराण्यं। बाडवं। एष्णादुपसंख्यानं। एष्यः। ग्रामजनबंधुभ्यस्तल्। ग्रामता। जनता। बंधुता। गड्डासहायाभ्यां चेति वक्तव्यं। गड्डता। सहायता। अहः खः ऋतौ। अहीनः। अहर्गणसाध्यमुत्पाकः ऋतुरित्यर्थः। ऋतौ किं। आहः। इह खंडिकादित्वादञ्। अहूष्वोरेवेति नियमाद्दिलोपो न। पर्श्वाणसवक्तव्यः। सिति च। सिति परे पूर्वपदस्यात्। अभवादौ गुणो न। पर्श्वानां समूहः पार्श्वम्। अनुदात्तादेरञ्। कापोतं मायूरं। खंडिकादिभ्यश्च। अञ्स्यात्। खंडिकानां समूहः खांडिकं। तत्रोपोधर्मवत्। काठकं। कालापं। अचित्तहस्तिधेनोष्ठक्। सात्रुकं। हास्तिकं। धैनुकं। केशाश्वाभ्यां यञ्छावन्यतरस्यां। पक्षे ठगणौ। कैश्यं। कैशिकं। अश्वीयं। आश्वं। पाशादिभ्यो यः। पाश्यं। तृष्यं। धृष्यं। वन्यं। वात्यं। खलगोरथात्। खल्यं। गव्यं। रथ्यं। इति निपातनाच्च। खलादिभ्यः क्रमात्स्युः॥ खलिनी। गोत्रं। रथ्यकट्या। खलादिभ्य इनिर्वक्तव्यः। डाकिनी। कुटुंबिनी। आकृतिगणोऽयं। विषयादेः। षष्ठ्यन्तादणादयः स्युस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तपरिशीलितेर्थेदेशश्चेत्। शिवानां विषयोदेशः शैवः। देशे किं। देवदत्तस्य विषयोनुवाकः। राजन्यादिभ्योवुञ्। राजन्यकं। भौरिकाद्येषु
कार्यादिभ्योविधल्भक्तलौ। भौरिकीणां विषयोदेशः भौरिकिविधं। भौलिकिविधं। ऐषुकारिभक्तं। सारसायनभक्तं। सोस्यादिरिति छ्ढ
सः प्रगाथेषु। पंक्तिरादिरस्येति पांक्तः। प्रगाथः। स्वार्थे उपसंख्यानं। त्रिष्टुब्वेवत्रे छ्भं। संग्रामे प्रयोजनयोद्धृभ्यः। सास्यत्पनुवर्त्तते। सुभट्टा
प्रयोजनमस्य संग्रामस्येति सौभट्टः। भरतायोद्धारोस्य संग्रामस्य भारतः। तैरस्यापहरणमिति क्रीडायां णः। दंडः प्रहरणमस्य क्रीडायां दांड
। मौष्टः। घञः सास्य क्रियेति ञः। घञंताक्रियावाचिनः प्रथमातस्यामिति सप्तम्यर्थे स्त्रीलिंगे ञप्रत्ययः स्यात्। घञ इति कृद्ग्रहणाद्ग
तिकारकपूर्वस्यापि ग्रहणं। ऐपनतिलस्य पातेत्रे। ऐपनतिलस्तनयोर्मुमागमः स्यात्ञप्रत्यये परे पातशब्दे उत्तरपदे। ऐपनपातोस्यावर्त्त
तेऽपेनं पातामगया। तिलपातोस्यावर्त्ततेतैलं पातास्वधा। ऐपनतिलस्य पातिकं। दंडपातोस्यातिथेर्वर्त्ततेदांडपाता। तदर्थीतेतद्धि। व्याकर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामधीते वेदवावेयाकरणः। ऋक्कयारिसूत्रांताद्वुक्। ऋतुविशेषवाचिनामेवेग्रहणं। तेभ्योमुख्यार्थेभ्योवेदितरितत्प्रतिपादकग्रंथपरेभ्य
स्त्वध्येतरि। आग्निष्टोमिकः। वाजपेयिकः। उक्थ्यसामविशेषः। तल्लक्षणपरोग्रंथविशेषोलक्षणाथोक्तः। तदधीते वेदवाओक्थिकः। मु
ख्यार्थात्तूक्थ्यशब्दादुगणोनेष्यते। न्यायं नैयायिकः। वृत्तिं वार्त्तिकः। लोकायतं लोकायतिकः। इत्यादि। सूत्रांतात्तु अकल्पादेरेवे
ष्यते। सांग्रहसूत्रिकः। अकल्पादेः किं। काल्पसूत्रः। विद्यालक्षणकल्पांताच्चेतिवक्तव्यं। वायसविधिकः। गौलक्षणिकः। आश्व
लक्षणिकः। पाराशरकल्पिकः। आंगसूत्रधर्मत्रिपूर्वादिद्यांतान्नेतिवक्तव्यं। आंगविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रिधाविद्यात्रि
विद्यातामधीते वेत्ति वात्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणभ्यश्च। यवक्रीतमधिकृत्यकृतमाख्यानमुपचाराद्यवक्री
तं तदधीते वेत्ति वायावक्रीतिकः। वासवदत्तामधिकृत्यकृतानाख्यायिकावासवदत्ता। अधिकृत्यकृते ग्रंथेइत्यर्थेवक्ष्यामः। तस्यलु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

=अव्ययीभावेचेति२

वाख्यायिकाभ्योबहुलमितिलुशाततोनेनठक्।वासवदत्तिकः।ऐतिहासिकः।पौराणिकः।सर्वादेःसादेश्चलुग्वक्तव्यः।सर्ववेदानधीतेसर्ववेदः।सर्वतंत्रः।सर्वार्त्तिकं।द्विगोर्लुगिनिलुक्।द्वितंत्रः।एकन्यदोत्तरपदात्शतषष्ठेःषिकन्पथः।पदत्रादौत्तरपदंयस्यतस्मादिकंस्यात्शतवादात्षष्टिशब्दाच्चपरोयःपथिन्शब्दस्तस्मात्षिकन्स्यात्।पूर्वपदिकः।उत्तरपदिकः।शतपथिकः।शतपथिकी।षष्टिपथिकः।षष्टिपथिकी।ऋमादिभ्योवुन्।ऋमकः।ऋमपदवीक्षामीमांसाऋमादिः।अनुब्राह्मणादिनिः।तदधीतेतद्वेदेर्थेब्राह्मणसदृशोग्रंथोऽनुब्राह्मणं।तदधीतेऽनुब्राह्मणी।मत्वर्थेनिनेवसिद्धेऽएवाधनार्थमिदम्।वसन्तादिभ्यष्ठक्।वासन्तिकः।अथर्वणामधीतेआथर्वणिकः।यांडिनायनसूत्रेनिपातनादिलोपोन।योक्तात्लुक्।योक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्यलुक्स्यात्।पणानंपणः।घञर्थकविधानमित्तिकः।सोस्यास्तीतिपणी।तस्यगोत्रापत्यंपाणिनः।गाथिविदथिकेशिगाणिपाणिनश्च।एतःशिष्यकृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यास्पुः। इति दिलोपोन। ततो यूनि इञ्। ऋष्यन्धकवृष्णिकुरुभ्यो भरतप्रत्ययांतात्क्षत्रियगोत्रप्रत्ययांतादृष्यभिधायि
नो गोत्रप्रत्ययांताच्चैतेभ्यः परयोर्युवाभिधायिनोरणञोर्लुक्स्यात्। कौरव्यः पिता कौरव्यः पुत्रः। श्वाफल्कः पिता श्वाफल्कः
पुत्रः। वासिष्ठः पिता वासिष्ठः पुत्रः। तैकायनिः पिता तैकायनिः पुत्रः। एभ्यः किं। शैवाद्यण्। कौहडः। ततः इञ्। कौहडिः पुत्रः। यूनि
किं। वामरथ्यस्य छात्रा वामरथ्याः। इतीञो लुक्न भवति। आर्षग्रहणं प्रतिपदोक्तस्य अस्य अण्ग्रहणात्। पाणिनिना प्रोक्तं पा
णिनीयम्। वृद्धाकुः। इञश्चेत्यण् लुप्। गोत्रे यदिञन्तं तदादिति वृद्धमात्रात्। ततो ध्यन्त्वे स्त्रियां लुक्। स्वरे स्त्रियां च विशेषः।
पाणिनीयः। पाणिनीया। स्त्रियाः ङीपधात्। सूत्रवाचिनः ककारोपधाद्ध्यन्त्वे इत्प्रत्ययस्य लुक्स्यात्। अप्रोक्तार्थ आरंभः। अ
ष्टावध्यायाः परिमाणमस्याष्टकं पाणिनेः सूत्रम्। तदधीयते विदंति वा अष्टकाः। कुंडेबाराणा निचतद्विषयाणि। कुंडं सिद्धाग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निचयोक्तप्रत्ययांतानितद्विषयाणिस्युः। अध्येत्वेदित्प्रत्ययंविनानप्रयोगपानीत्य र्थः। कठेनप्रोक्तमधीयतेकठाः। वैशंपायनांतेवा
सिलाक्षिनिः। तस्यकठचरकादिनिलुक्। ततोण्। तस्यप्रोक्ताध्युक्। तस्मिन्नस्तीतिदेशेतन्नाम्नि। उदुंबराःसन्त्यस्मिन्देशेऽौदुंबरो
देशः। तेननिर्वृत्तम्। कुशांबेननिर्वृत्ताकौशांबीनगरी। तस्यनिवासः। शिबीनांनिवासोदेशःशैबः। अरूरभवश्च। तद्दिशायाअरूरभवंन
गरंवेदिशं। चकारेणपायुक्तास्त्रयोर्थाःसन्निधाप्यंते। तेनवक्ष्यमाणप्रत्ययानांचानुरर्थिकत्वंसिध्यति। औरस्। अरोपवारः। कस
तु। काष्ठतवं। नद्यांतुपरत्वान्मतुप्। इक्षुमती। मतोश्चबहुजंगात्। बहुजंगंयस्यमतुपरस्तस्मादस्त्रनारायसेधुकावतं। बहुंतिकिं। आ
मतं। अंगग्रहणंबहुजितितद्विशेषणंयथास्यान्मत्वन्तस्यविशेषणाभाभूत्। बहुचःकूपेषु। अरोपवारः। दीर्घवरत्रेणनिर्वृत्तः दी
र्घवरत्रःकूपः। उदकूविपाशाः। विपासंउत्तरेकूलेयेकूपास्तेषुजः। बहुजर्थमारंभः। दत्तेननिर्वृत्तःकूपोदत्तः। उदक्कि। दक्षिणातःकू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पचरोव। संकलादिभ्यश्च। कपेर्घातिनिवृत्तं। संकलेन निर्वृत्तं सांकलं। पौष्कलं। स्त्रीषु सौवीरसाल्वयोः। स्त्रीलिंगेषु एषु देशेषु जाये
षु अञ्। सौवीरे। दत्तामित्रेण निर्वृत्तादत्तामित्री नगरी। साल्वे। वैधुमाग्नी। प्राचि। माकंदी। सुवास्तादिभ्यो रा। अत्रोपवाहः। सुवा
स्तोर्हरभवं सौवास्तवं। वर्ण। वार्णवं। अरण्यहरणनद्यामनुपादाधनोर्थ्यं। सौवास्तवी। रोणी। रोणीरा दत्तदत्ता चारण। कूपाद्योपवा
हः। रोणाः। आजकरोणाः। कोपधात्। अरणा। अत्रोपवाहः। कर्णकिड्कः। कार्णकिड्कं कूपः। कार्कवाकवमात्रेशं कवं। वुञ्छ
राकठजिलसेनिरटञ्रण्यफकफिञ्अकक्ठकोऽरीहणात्तथाघ्रपकुमुदकाशतरापेक्षाद्यमसविसंकाशव
लपद्मकर्णसुतंगमपगदिभ्यः। सपद्दशाभ्यः सपद्दशा पत्यया क्रमान्मुश्च नुरर्थाम। अरीहणादिभ्यो वुन्।
अरीहणनिर्वृत्तमारीहणकं। कशाभ्यादिभ्यः स्फुरः। कार्शाभ्वीयं। अश्वपादिभ्यः कः। अश्वपकं। कुमुदादिभ्यश्च। कुमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टिकं। काशादिभ्यइलः। काशिलः। तृणादिभ्यः सः। तृणसं। प्रेक्षादिभ्यइनिः। प्रेक्षी। अश्मादिभ्योरः। अश्मरः। सख्यादिभ्योटच्। सारवेयम्। संकाशादिभ्यो
रपः। सांकाश्यं। वल्लादिभ्योयः। वल्ल्यं। पक्षादिभ्यः फक्। पाक्षायणः। पथ्यपंथ्यपथ्यपांथायनः। कर्णादिभ्यः फिञ्। कार्णायनिः। सुतंगमादिभ्यइञ्। सौतंग
मिः। प्रगदादिभ्योञ्यः। प्रगाद्यः। वराहादिभ्यः कक्। वाराहकः। कुमुदादिभ्यष्ठक्। कौमुदिकः। जनपदेलुप्। जनपदे वाच्ये चातुरर्थिक
स्य लुप्स्यात्। लुपि युक्तवद्व्यक्तिवचने। लुपि सति प्रकृतिवल्लिंगवचने स्तः। पञ्चालानां निवासो जनपदः पंचालाः। कुरवः। अंगाः। वंगाः। कलिङ्गाः। तद
शिष्यं संज्ञाप्रमाणत्वात्। युक्तवद्वचनं कर्त्तव्यम्। संज्ञानां प्रमाणत्वात्। लुब्योगाप्र ख्यानात्। लुबपि न कर्त्तव्यः। वयवार्थस्य लुप्रतीतेः। योगप्रमा
णं चेत्तद्भावे दर्शनं स्यात्। यदि हि योगस्यावयवार्थस्य बोधकं स्यात्तदा तद्भावे न दृश्येत। प्रधानप्रत्ययार्थवचनमर्थस्यानप्रमाणत्वात्। प्रत्य
यार्थप्रधानमित्येकं वचनमप्यशिष्यम्। अर्थस्य लोकतएव सिद्धेः। कालोपसर्जनेचतुल्यं। जतीतायारात्रेः पश्चाद्दिनागामिन्याः पूर्वाह्णेनचस
वं २ कुतः २

२ लोकव्यवहारणमिवतत्रप्रमाणत्वंतद्वोशास्त्रव्यापारोनकर्त्तव्यइत्यर्थः ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हितोऽद्यतनः। विशेषणमुपसर्जनमित्यादिपूर्वाचार्यैः परिभावितं तत्राप्यशिष्यत्वं समानं। लोकप्रसिद्धेः। विशेषणानां चाजातेः। लुबर्थस्य
विशेषणानामपि तद्वद्लिंगवचनैस्तोजातिं वर्जयित्वा। पंचालारमणीयाः। गोदोरमणीयौ। अजातेः किं। पंचालाजनपदः। गोदोग्रामः। ह
रीतक्यादिषु व्यक्तिः। हरीतक्याः फलानि हरीतक्यः। खलतिकादिषु वचनं। खलतिकस्य पर्वतस्यादूरभवानि खलतिकवनानि। मनुष्य
लुपि प्रतिषेधः। मनुष्यलक्षणो लुबर्थे विशेषणानां न। लुबन्तस्य तु भवतीत्यर्थः। चंचाप्रभृतिभ्यः। वरणादिभ्यश्च। अजनपदार्थ आरम्भः।
वरणानामदूरभवनगरं वरणाः। शर्करायाः। अस्माच्चातुरर्थिकस्य वा लुप्यात्। ठक्छौ। शर्करायास्तौ स्तः। कुमुदादौ वरणादौ च
पाठसामर्थ्यात्पक्षे ठञ्छकौ। वाग्रहणसामर्थ्यात्पक्षे ञौ त्साभिकौ। तस्य लुबिकल्पः। षड्पाणि। शर्करा। शाकरा। शाकरिकं। शाकरी
यं। शाकरिकं। शाकरकम्। नञ्भ्यां तु। चातुरर्थिकः। इक्षुमती। मत्वादिभ्यश्च। मनुष्याच्चातुरर्थिकः। अनद्यर्थ आरम्भः। मधुमान्। कु

+ एभ्यश्चातुरर्थिकस्य लुप्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपधाया-

नुदनदवेतसेभ्योघ्नुप्। कुमुद्वान्। नड्वान्। वेतस्वान्। आद्ययोर्मयट्। अंतेभ्य इति वक्तव्यं। महिषाद्वेति वक्तव्यं। महिष्मान्नामदेशः। न
डशादाड्वलच्। नड्वलः। शादेर्जंबालघासयोः। शाड्वलः। शिखायावलच्। शिखावलः। उलराद्भ्यश्छः। उलरीयः। नडादीनां कुक्च। नडकी
यम्। कुंचाद्वलंच। कुंचकीयः। तस्य लोपश्च। तस्य कीयः। बिल्वकादिभ्यश्छ स्पलुक्। नडाद्यंतर्गता बिल्वका द यस्तेभ्यश्छ स्प
लुक् तद्धिते परे। बिल्वाय स्यात्। संतिसा बिल्वकीया। तस्य भवावेल्वकाः। वेत्रकीया। वैत्रकाः। कुस्पकिं। कुमात्रस्य लुक् यथा स्यात् कुकोनि
वृत्तिर्माभूत्। अन्यथा सन्नियोगशिष्टानामिति कुरपि निवर्त्तेत। ढेलोपोकद्वाइत्यनुवर्त्तमाने लुग्ग्रहणं सर्वलोपार्थं। लोपोहि यमात्र
स्य स्यात्॥ ॥इति चतुरर्थिकाः॥ ॥शेषे। अपत्यादिभ्य चतुरर्थ्यन्तादन्येषार्थे शेषस्तत्रार्थादयः स्युः। च कुषाग्रहृते चाकुषरूपा। आवट
णः शाकः। औपनिषदः पुरुषः। दधदिपिष्टादर्थेष्टाः सक्तवः। उलूखलेकुसमओलूखलो यावकः। अग्नेरुहृते आग्नेयः। चतुर्भिरुहृ

-लोपयुक्तो उपधायाइत्यनुवर्त्तते २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ने चानुरंशकटं। चतुर्द्रव्यंपदस्पते चतुर्द्रव्यंरक्षः। शेषइतिलक्षणंचाधिकारश्च। तस्यविकारइत्यतःप्राक्शेषाधिकारः। रा प्रावारपा
एछत्रे। आम्पांक्रमाद्रुद्रवोस्तःशेषे। राष्ट्रियः। अवारपारीणः। अवारपारहिरहीतादपिवियरीताद्वेतिवक्तव्यं। अवारीणः। पारीण
ः। पारावारीणः। इत्यपकृतिविशेषाद्घाद्यष्ठ्युलंतउच्यन्ते। तेषांजातादयोपिविशेषाःसमपीविभक्तयश्चवक्ष्यन्ते। ग्रामाद्य
रवञौ। ग्राम्यः। ग्रामीणः। कत्रादिभ्योढक्। कात्सनात्रयः कत्रयः। तत्रजाताहि। काद्रेयकः। नागरेयकः। ग्रामादित्यनुवृत्तेर्ग्रामे
यकः। कुलकुक्षिग्रीवाभ्यःश्वाश्वलंकारेषु। कौलेयकःश्वा। कौलीन्यः। कौक्षेयकोसिः। कौक्षीन्यः। ग्रैवेयकोलंकारः। ग्रैवीन्यः। नद्या
दिभ्योढक्। नादेयम्। माहेयं। वाराणसेयम्। दक्षिणापश्चात्पुरसस्त्यक्। दक्षिणेतिजाजंतमव्ययं। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः
। कापिशयःष्फक्। कापिशयंजातादि। कापिशायनंमधु। कापिशायनीद्राक्षा। एकोरमनुष्येरत्वा। चात्ष्फक्। एकवागोः। एकवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

को

यणः।अमनुष्येतिकिं।रांकवोमनुष्यः।द्युषागपगुदकप्रतीचोयत।प्रेप्राच्यं।अपाच्यं।उदीच्यं।प्रतीच्यं।कंषायाष्टुक।कांथिकः।वर्षौवुक
।वर्षुनदीसमीपोदेशोवर्षुः।तद्विषयार्थवाचिकंषाशब्दाद्वुक।यथाहिजातंहिमवत्सुकांथकं।अव्ययात्पप्।अमेहकृतासित्रेभ्य
एव।अमांतिकसलार्थयोः।अमात्यः।इहत्यः।कृत्यः।ततस्त्यः।तत्रत्यः।परिगणनंकिं।उपरिष्टाद्वओपरिष्ट्यः।अव्ययानां
भमात्रेटिलोपः।अनित्योयंवहिषछिलोपविधानात्।तेनेह।आरातीयः।सारस्वतीयः।त्यब्नेर्ध्वेदूतिवक्तव्यं।नित्यः।नि
सोगते।ह्रस्वान्तादौनाङ्गिते।ह्रस्वादिणःपरस्यसस्यषःस्यात्तादौनाङ्गिते।निर्गतोवर्णाश्रमेभ्योनिर्वर्णश्चंडालादिः।अरण्यास
ः।आरण्याःसुमनसः।दूरादेत्यः।दूरेत्यः।उत्तरादाहत्रा।ओत्तराहः।ऐषमोह्यश्वसोम्यतरस्या।एभ्यस्त्यब्वा।पक्षेवस्यमाणो
द्युद्युलो।ऐषमस्त्यः।ऐषमस्तनं।ह्यस्त्यः।ह्यस्तनं।श्वस्त्यः।श्वस्तनमा।पक्षेशौवस्तिकमवस्यते।तीरस्योत्तरपदाद्रौ य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यासंख्येनाकाकतीरं। पाल्वलतीरं। शैवरूप्यं तीररूप्यात्तादितिनोक्तं। बहुचूर्वीन्माभूत्। बाहुरूप्यं। किंपूर्वपदसंज्ञायां
ज्ञः अणोपवादः। पौर्वशालः। असंज्ञायां किं। संज्ञाभूतायां कृतेर्माभूत्। पूर्वेषु कामशम्यां भवः पूर्वेषु कामवासः। प्राचां
मगधानामित्युत्तरपदवृद्धिः। मद्रेभ्यो। दिक्पूर्वपदात्तिलेवादिशोमद्राणामितिमद्रपर्युदासादादिवृद्धिः। पौर्वमद्रः
आपरमद्रः। उदीच्यग्रामाच्चबहुचोन्नोरसात्। अञ्स्यात्। शैवपुरं। प्रस्थोत्तरपदपलद्यादिकोपधारणं। माहिकिप्रस्थः।
पालदः। नैलीनकः। कण्वादिभ्योगोत्रे। इञ्योगोत्रप्रत्ययांतेभ्योणस्यात्। कण्वागर्गादिः। काण्वस्य कृत्वाचाः कारवाः। इञ्
श्च गोत्रे यञ्ञतस्नात्। दाक्षाः। गोत्रे किं। सौतंगमेरिदं सौतंगमीयं गोत्रमिहशास्त्रीयं न तु लौकिकं। तेनेह
न। पाणिनीयं। न ह्यत्रः प्राच्यभरतेषु। इञश्चेत्यणोपवादः। पाष्टीयाः। काशीयाः। भरतानां प्राच्यत्वेपि पृथगुपादानमन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रपाद्यग्रहणे भरतानामयुरुस्पलिंगं। वृद्धिर्यस्याचामादिस्तद्वृद्धं। यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्।
तदादीनि च। वृद्धसंज्ञानि स्युः। वृद्धाच्छः। शालीयः। मालीयः। तदीयः। एङ्यवाचां देशे। एङ्यस्याचामादिस्तद्वृद्धसंज्ञं वा स्यात् देशे
भिधाने। एणीपचनीयः। ऐणीपचनः। गोनर्दीयः। गौनर्दः। भोजकटीयः। भौजकटः। एङ् किं। आहिच्छत्रः। कान्यकुब्जः। वा
नामधेयस्येति वाच्यं। देवदत्तीयः। देवदत्तः। भवतष्ठक्छसौ। वृद्धाद्भवतएतौ स्तः। भावलः। जीवलः। भवदीयः। वृद्धादित्यनुवृत्तेः
रात्रन्ताद्वा। भावतः। काश्यादिभ्यष्ठञ्ठिठौ। इकारउच्चारणार्थः। काशिकी। काशिका। वैदिकी। वैदिका। आपदादिपूर्वप
दात्कालान्तात्। आपदादिराकृतिगणः। आपत्कालिकी। आपत्कालिका। वाहीकग्रामेभ्यश्च। वाहीकग्रामवाचिभ्यो वृद्धे
भ्यष्ठञ्ठिठौ स्तः। कुत्सापवादः। कास्तीरं नामवाहीकग्रामः। कास्तीरिकी। कास्तीरिका। विभाषोशीनरेषु। एषु ये ग्रामास्तद्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आस्यानाद्देशोग्रहणे ३

वा

चिम्योवृद्धेम्यष्ठञ्त्रिठौस्तःसौस्थानिकी।सौदर्शानिकासौदर्शनीयः।ओदौठञ्।उवर्णान्ताद्देशवाचिनष्ठञ्।निषादकर्षूनैषादकर्षुकः।कणादितिह्रस्वःदेशेकिं।पटोश्छात्राःपाटवाः।त्रिठंव्यावर्त्तयितुंठञ्ग्रहणं।वृद्धाच्छःपरत्वादयंबाधते।दाक्षिकर्षुकः।वृद्धात्प्राचांपाग्देशवाचिनोवृद्धादेवेतिनियमार्थमिदंसूत्रं।आढकजंबुकः।शाकजंबुकः।नेहामध्वंवास्तकः।माध्वंवास्तकः।धन्वयोपधाद्वुञ्।धन्वविशेषवाचिनोयकारोपधाच्चदेशवाचिनोवृद्धाद्वुञ्स्यात्।ऐरावतंधन्वऐरावतकः।सांकाश्यकापिल्पशादीवुञ्छणादिसूत्रेणाप्यन्तौ।सांकाश्यकः।कापिल्पकः।पस्त्यपुरवतांतञ्।एतदंताद्वृद्धाद्देशवाचिनोवुञ्स्यात्।छस्यापवादः।मालाप्रस्थकः।नान्दीपुरकः।पैलुवहकः।पुरान्तग्रहणमप्रागर्थं।प्राग्देशोत्तरेणसिद्धः।रोपधेतःप्राचां।रोपधादीकारांताच्चप्राग्देशवाचिनोवृद्धाद्वुञ्स्यात्।पाटलिपुत्रकः।इतः।काकंदकः।जनपदतदवधेश्च।जनपदवाचिनस्तदवधिवाचिनश्चवृद्धाद्वुञ्स्यात्।आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शकः। त्रैगर्त्तकः। अवृद्धादपि कुवचनविषयात्। अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो वुञ्वचनविषयात्प्रातिपदिकाद्वुञ्
स्यात्। अवृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्। आगकः। अवृद्धाज्जनपदावधेः। आजमीढकः। वृद्धाज्जनपदात्। दा
र्वकः। वृद्धाज्जनपदावधेः। कालञ्जरकः। विषयेग्रहणं किं। एकशेषस्य कुलेमाभूत्। वर्त्तनी च वर्त्तन्यः। तासु भवो वार्त्तनिः। क
ङ्कणिवक्रवर्त्तेति रपरात्। देशवाचिनो वृद्धाद्वृद्धाच्च वुञ्स्यात्। दारुकच्छकः। काडारनकः। सैन्धवक्रकः। वाहुवर्त्तकः। धूमा
दिभ्यश्च। देशवाचिभ्यो वुञ्। धौमकः। तैर्थकः। नगरात्कुत्सनप्रावीण्ययोः। नगरशब्दाद्वुञ्स्यात्कुत्सनप्रावीण्ये गम्ये। नाग
रकश्चोरः शिल्पी वा। कुत्सनेति किं। नागराः ब्राह्मणाः। अरण्यान्मनुष्ये वुञ्स्यात्। अरण्यात्समदत्यस्यापवादः। पथ्यध्याय
न्यायविहारमनुष्यहस्तिषु चेति वाच्यं। आरण्यकः पथः। अध्यायो न्यायो विहारो मनुष्यो हस्ती वा। वेगोमध्येषु। आरण्यात्आ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+ अपरावेवेति ४ + वुञ्स्यान्मनुष्यतत्स्थयोः २

रपकावागोमयाः। विभाषाकुरुयुगंधराभ्यां। वुञ्। कौरवकः। कौरवः। यौगंधरकः। यौगंधरः। मडुकस्योकल। जनपदवुञोपवादः। मडुषुजातोमडुकः।
वृजिकः। कोपधादण्। माहिषिकः। कच्छाद्भिष्यञ्। देशवाचिभ्योण्। वुञादेरपवादः। काच्छः। सैन्धवः। मनुष्यतत्स्थयोर्वुञ्। कच्छाद्भिष्यो अ
णोपवादः। कच्छजातादिः काच्छकोमनुष्यः। काच्छकंहसितं। एतयोः किं। काच्छोगौः। अपदातौसाल्वात्। साल्वशब्दस्यकच्छा
दिवाकुञ्सिद्धे नियमार्थमिदं। साल्वकोमनुष्यः। साल्वकंहसितं। अपदातावेवेति किं। साल्वःपदातिर्व्रजति। गोयवाग्वो
श्च। साल्वाद्वुञ्। कच्छद्यणोपवादः। साल्वकोगौः। साल्विकायवाग्वः। साल्वमन्यत्। नक्षत्रेरपदाच्छः। देशे। अणोपवादः। वृ
कगर्त्तीयं। उत्तरपदस्यग्रहणंवुञ्पूर्वनिरासार्थम्। गहादिभ्यश्च। छः। गहीयः। मुखपार्श्वनसोलोपश्च। मुखतीयं। पार्श्वतीयं
। अव्ययानामभमात्रेटिलोपस्यानित्यतोज्ञापयितुमिदं। कंकजनस्यपरस्यच। जनकीयं। परकीयं। देवस्यच। देवकीयं। स्वस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा॰ स्वीयं॰

च। स्वकीयं। वैणुकादिभ्यश्छण्वाच्यः। वैणुकीयं। वैत्रकीयं। औत्तरपथकीयं। प्राचां कटादेः। प्राग्देशवाचिनः कटादेश्छः स्यात्
णोपवादः। कटनगरीयं। कटघोषीयं। कटपल्वलीयं। राज्ञः कच। वृद्धत्वाच्छेसिद्धे तत्सन्नियोगेन कादेशमात्रं विधीयते। ए
जकीयं। वृद्धात्के कान्तखोपधात्। अकइकएवमंतात्खोपधाच्च वृद्धाद्देशवाचिनश्छः स्यात्। ब्राह्मणको नाम जनपदः। य
त्र ब्राह्मणा आयुधजीविनस्तत्र जातो ब्राह्मणकीयः। शाल्मलिकीयः। अयोमुखीयं। कथापलस्तनगरयाम्रहस्तोत्तरपथात्। क
थादिपञ्चोत्तरपथाद्देशवाचिनो वृद्धाच्छः स्यात्। ठञ्ञिठादेरपवादः। दाक्षिकंथीयं। दाक्षिपलदीयं। दाक्षिनगरीयं। दाक्षिग्रा
मीयं। दाक्षिरुद्रीयं। पर्वताच्च। पर्वतीयः। विभाषा मनुष्ये। मनुष्यभिन्नेर्थे पर्वताच्छो वा स्यात्। पक्षे रण्। पर्वतीयानि पार्वतानि
वा फलानि। अमनुष्ये किं। पर्वतीयो मनुष्यः। कृकणपर्णाद्भरद्वाजे। भरद्वाजदेशवाचिभ्यामाभ्यां छः स्यात्। कृकणीयं। प

ति॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रीयं। भारद्वाजेतिकिं काकर्णा पार्णे युष्मदस्मदोरन्वादेशेस्त्वत्रि अशि च। वाक्ः। पक्षे रा। युवयोर्युष्माकं वायं युष्मदीयः। अ
स्मदीयः। तस्मिन्नाणि च युष्माकास्माकौ। युष्मदस्मदोरनादेशेस्तः त्वत्रि अशि च। यो युष्माकीणः। आ स्माकीनः। यो युष्मा
कः। आस्माकः। तवकममकावेकवचने। एकार्थवाचिनोर्युष्मदस्मदोरन्तवकममकौ स्तः त्वत्रि अशि च। तावकीनः। माम
कीनः। तावकः। मामकः। क्ते तु पत्ययोत्तरपदयोश्च। समर्थयोरेकार्थयोस्त्वमौ स्तः पत्यये उत्तरपदे च। त्वदीयः। मदीयः
त्वत्पुत्रः। मत्पुत्रः। सर्वादीनि। अर्द्धः। परावराधमोत्तमपूर्वाः। पराऽर्द्धमा अवराऽर्द्धा। अधमार्द्धा। उत्तमार्द्धा। दिक्पूर्वप
राधरात्राणि। पौर्वार्धिकं। पूर्वार्द्धः। ग्रामजनपदैकदेशादन्ठञौ। ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दि
क्पूर्वपरार्धरात्रान्तादन्ठञौ स्तः। इमे अस्माकं ग्रामस्य जनपदस्य वा पौर्वार्द्धिकाः। ग्रामस्य पूर्वस्मिन्नर्द्धे भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाइतितद्धितार्थेसमासः।ठञ्ग्रहणंस्पष्टार्थं।अत्रेत्युक्तोयतोप्यनुकर्षःसंभाव्येत।मध्यान्मः।मध्यमः।असांषतिके।मध्य शारा
दकारप्रत्ययःस्यात्सांषतिकेर्थे।उत्कर्षापकर्षहीनोमध्योवेयाकरणः।मध्यदासानातिह्रस्वनादीर्घमित्यर्थः।द्वीपादनुसमुद्रंय
ञ्।समुद्रसमीपे ये द्वीपास्तद्विषयाद्द्वीपशब्दाद्यञ्स्यात्।द्वैप्याद्वैप्या।कालाट्ठञ्।कालवाचिभ्यष्ठञ्स्यात्।मासिकम्।सांवत्स
रिकम्।सायंप्रातिकःपौनःपुनिकः।कथंतर्हि।शार्वरस्यतमसोनिबिङ्गयेइतिकालिदासः।अनुदितोषसरागेइतिभारविः
।समानकालीनंप्राक्कालीनमित्यादिच।अपत्रशारएवतेइतिप्रामाणिकाः।तत्रजातइतियावत्कालाधिकारः।आद्येशारदः
।ठञ्त्रत्वणोपवादः।शारदिकौ।विभाषारोगातपयोः।शारदिकः।शारदोवारोगश्चातपोवा।एतयोःकिशारदर्धि।निवाप
दोषाभ्यांच।वाठञ्स्यात्।नैशिकंनैशं।प्रादोषिकं।प्रादोषं।श्वसस्तट्ठञ्।श्वश्शब्दाट्ठञ्वासात्तस्यनुडागमश्च।द्वारादीनांच।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वारः। स्वरः। वल्कशः। स्वाक्तिः। स्वरः। श्वनः। श्वसः। स्फ्यकृतः। स्वादुः। मृदुः। स्वादुः। षांनवृद्धिरेजागमश्च। शोवस्तिकं। संधिवेलाद्यु
तुनक्षत्रेभ्यः। संधिवेलादिभ्यस्तुनक्षत्रेभ्यश्च कालवृत्तिभ्यः। संधिवेलायां भवं सांधिवेलं। ग्रैष्मं। तेषां। संधिवे
ला। संध्या। अमावास्या। त्रयोदशी। चतुर्दशी। पंचदशी। पौर्णमासी। प्रतिपत्। संवत्सरात्फलपर्वणोः। सांवत्सरफल
पर्वणा। सांवत्सरिकमन्यत्। प्रावृषेण्यः। प्रावृषेण्यः। वर्षाभ्यः। वर्षासु साधुवार्षिकं वासः। कालात्साधुपुष्पात्फल्ग
मानेषितिसाच्चर्थे सर्वत्रारण्यतलोपश्च। हिमन्तादारण्यान्तलोपश्च वेदलोकयोः। चकारात्पदेत्रत्वरा। हैमनं। हैमंतं। सा
यंचिरंप्राह्णे प्रगेभ्यः पर्यायेभ्यः पर्युषुलोतुट्च। सायमित्यादिभ्यश्चतुर्भ्यः। त्र्यये भ्यश्च कालवाचिभ्यः पर्युषुलोस्तस्तयो स्तुट्च
तुट्। प्रागनादेशः। अनद्यतनइत्यादिनिर्देशात्। सायंतनं। चिरंतनं। प्राह्णप्रगयोरेतत्वं निपात्यते। प्राह्णेतनं। प्रगेतनं। दोषातनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिवातनं। चिरपरुत्प रारिम्पस्तनोवाऽ। चिरत्नं। एकत्नं। परारित्नं। अग्रादिपश्चादिभ्यः। अग्रिमं। आदिमं। पश्चिमं। अंतात्ष्ठ। अंतिमं। विभाषापूर्वाह्णापराह्णाभ्यां। आभ्यांयुद्धुलोस्तस्तयोस्तत्र। पक्षेठञ्। पूर्वाह्णतनं। अपराह्णतनं। घकालतनेषु। तत्लुक्। पूर्वाह्णः सोढोस्येति विग्रहे तु पूर्वाह्णतनम्। अपराह्णतनं। पौर्वाह्णिकं। आपराह्णिकम्। तत्र जातः। सप्तमीसमर्थाज्जातदृत्पर्यंतस्यो घारस्यश्चस्युः। स्तुघ्रे जातः स्तोघ्नः। ओत्सः। राष्ट्रियः। अवारपारीणदृत्यादि। प्रावृष्ठ्य। एरणपापवादः। प्रावृषिजातः प्रावृषिकः। संज्ञायां शारदो बुद्ध। अत्लणोपवादः। शारदकाः। दर्भादिशेषामुद्भविशेषाश्च। उत्तरपदस्य। अधिकारोयं। हनस्तदस्मात्प्राक्। अवयवादृतोः। अवयववाचिनः पूर्वपरादृतुवाचिनोऽचामादेरचोवृद्धिर्ञिति णिति किति च तद्धिते परे। पूर्ववार्षिकः। अपरहैमनः। अवयवात्किं। पूर्वसुवर्षासुभवः पौर्ववार्षिकः। अतोवृद्धिमाहुर्द्विधावयवानामितितद्दृतविधिः पूर्वत्र। इहतु। अवयवत्वाभावात्। सुसर्वा

= कालाष्टक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्द्धजनपदस्य ।उत्तरपदस्यवृद्धिः।सुपांचालकः।सर्वपांचालकः।अर्द्धपांचालकः।जनपदतद्वध्यो [illegible] रितिवु
ञ्।सुसर्वार्द्धदिक्शब्देभ्योजनपदस्यातिदेशविधिः।दिग्योमद्रराज्ञ्।दिग्वाचकाज्जनपदवाचिनोवृद्धिःपूर्वपाञ्चालकः
।दिशःकिं।पूर्वपञ्चालानामयंपौर्वपञ्चालः।अमद्रराज्ञ्।किंपौर्वमद्रः।योगविभागउत्तरार्थः।पाञ्चगामनगराणाम्।दि
शःपरेषांनगरवाचिनांगामवाचिनांचवृद्धिः।पूर्वेषुकामशम्याम्भवःपूर्वेषुकामशमः।नगरे।पूर्वपाटलिपुत्रकः।पूर्वाह्णापराह्णार्द्धमूलप्रदो
षावस्करादुन्।पूर्वाह्णकः।अपराह्णकः।आर्द्धकः।मूलकः।प्रदोषकः।अवस्करकः।पथःपन्थच्च।पथिजातःपन्थकः।अमावास्याया
वा।अमावास्यकः।आमावास्यः।अच।अमावास्यः।निचयपकराभ्याकन्।सिन्धुकः।कक्ष्याद्यणिमनुष्यवृत्तिचयाप्ते।अपकरकः।औ
त्सर्गिकेणिपाप्ते।अणञौच।ऋमात्तः।सैंधवः।आपकरः।अविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाच्छु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क। एभ्योनक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक्। लुक्तद्धितलुकि। तद्धितलुकि उपसर्जनस्त्रीप्रत्ययस्य लुक्। अविष्ठासु जातः अ
विष्ठः। फल्गुनइत्यादि। चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानं। चित्रायां जाता चित्रा। रेवती। रोहिणी। आभ्यां लुक्तद्धितलुकी तिल
किकृते पिप्पल्यादेराकृतिगणत्वात्पुनर्ङीष्। फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ। स्त्रियामित्येव। फल्गुनी। अषाढा। अविष्ठाषाढाभ्यां
छण्वक्तव्यः। अस्त्रियामपि। आविष्ठीयः। आषाढीयः। जेः प्रोष्ठपदानां। प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिर्जातार्थे त्रितिणिति
कितिच। प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः। जेरिति किं। प्रोष्ठपदासु भवः प्रोष्ठपदः। बहुवचननिर्देशात्पर्यायो पिगृह्यते। भद्र
पादः। स्थानांतगोशालखरशालाच्च। एभ्यो जातार्थस्य लुक्स्यात्। गोस्थानेषु जातः गोस्थानः। गोशालः। खरशालः। विभाषासेने
तिनपुंसकत्वेह्रस्वत्वं। वत्सशाला भिक्षिदण्ड्यायुक्तशातभिषजो वा। एभ्यो जातार्थस्य लुग्वास्यात्। वत्सशालेजातो वत्सशालः। वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मशालः। इत्यादि। जातार्थे प्रतिप्रसूतोरण्डिहावक्तव्यः। शातभिषः। शातभिषजः। शातभिषक। नक्षत्रेभ्योबहुलं। जातार्थप्रत्य
यस्य बहुलं लुक् स्यात्। रोहिणः। रोहिणः। [illegible] तत्रेत्येव। स्रुघ्नेकृतोलब्धः क्रीतः कुशलोवा स्रौघ्नः। पाय
भवः। तत्रेत्येव। स्रुघ्नपायेणावा कल्पेन भवति स्रौघ्नः। उपजानूकः। औपजानुकः। औपकर्णिकः। औपनीविक
ः। संभृते। स्रुघ्नेसंभवति स्रौघ्नः। कौशाम्बः। कौशेयं वस्त्रं। कालाद्वा पुष्पफलानां। हेमन्तेसाधुः हैमन्तः प्राकारः। वसंतेपु
ष्यंति वासन्तः कुसुमलताः। शरदि पच्यंते शारदाः शालयः। उप्तेवा हेमन्तउप्यंते हैमंतायवाः। आश्वयुज्यामावुत्र। तत्रोपवासः। आ
श्वयुज्यामुषा आश्वयुजकामाषाः। ग्रीष्मवसन्तात्परस्यां पक्षे ऋतवण्णे ग्रैष्मकं। वासंतकं। ग्रैष्मं। वासन्तं। ग्रैष्मः। वा
कालादित्येव। मासेदेयमृणं मासिकं। कलापिनोभवति सउपचाराल्कला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पी। तत्रदेयम्रणंकलापकं। अश्वत्थस्यफलमश्वत्थं। तद्युक्तःकालोप्यश्वत्थं। यस्मिन्कालेऽश्वत्थाःफलंतितत्रदेयम्रणमश्वत्थकम्
यस्मिन्यववुसमुत्पद्यतेतत्रदेयंयववुसकं। ग्रीष्मावरसमाहुज्ञ। ग्रीष्मेदेयम्रणंग्रैष्मकं। आवरसमकं। संवत्सराग्रहायणी
भ्यांठञ्। चाहुज्ञ। सांवत्सरिकं। सांवत्सरकं। आग्रहायणिकम्। आग्रहायणकं। व्याहरतिमृगः। कालवाचिनःसप्तम्यंताच्छ्रा
यतेऽत्पर्थेप्रत्ययाःस्युर्यो व्याहरतिसमृगश्चेत्। निशायांव्याहरतिनैशोमृगः। नैशिकः। तदस्यसोढं। कालादित्येव। निशासह
चरितमध्ययनंनिशातत्सोढमस्यनैशः। नैशिकः। तत्रभवः। लघ्वेभवःलोघ्रः। राष्ट्रियः। दिगादिभ्योयत्। दिक्पावर्गो। शारीरावय

अमरसंह
कर्णेर

वाच्च। दृत्यौ। प्राचांनगरांते। प्राचांदेशेनगरांतेगोपूर्वपदस्योत्तरपदस्यचादेरचोवृद्धिर्भवति। तिलतिकितिच। सुह्मनगरेभवःसौह्म
नागरः। पौन्दुनागरः। प्राचांकिं। मनगरमुरुकुत्रभवोमानगरः। जंगलधेनुवलजांतस्यविभाषितमुत्तरं। जंगलाद्यंतस्यांगस्यपू

सत्तार

= अध्यर्धांनात्सोढोवाधिकात्सद्यर्धेणावयवः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्वपदस्याचामादेरचोवृद्धिरुत्तरपदस्यवाञ्जितिणितिकितिच। कुरुजंगलेभवं कौरुजंगलं। कौरुजांगलं। वैश्वधनेवं। वैश्वधैनवं। सौ
वर्णवलजं। सौवर्णवालजं। इतिकुक्षिकलशिवस्तपस्तपहेञ्। एत्तेयं। कौक्षेयं। कलशिर्घटः। तत्रभवंकालशेयं। ग्रीवाभ्योण
च। चाद्ढञ्। ग्रैवेयं। ग्रैवं। गंभीरान्ञः। गम्भीरेभवंगांभीर्यं। पञ्चजनादुपसंख्यानं। पांचजन्यं। अव्ययीभावाच्च। परिमुखंभवंपारि
मुख्यं। परिमुखादिष्यएवेष्यते। नेह। औपकूलः। अंतःपूर्वपदाद्ढञ्। अव्ययीभावादित्येवविशमतिअंतःअंतर्वेश्मंतत्रभवंआं
तर्वेश्मिकं। आंतर्गणिकं। अध्यात्मादेष्ठञिष्यते। अध्यात्मंभवमाध्यात्मिकं। अनुवातिकादीनांचाएषामुभयपदवृद्धिर्ञ्णि
णितिकितिच। आधिदैविकं। आधिभौतिकं। ऐहलौकिकं। पारलौकिकं। अध्यात्मादिराकृतिगणः। दैविकादिशंशपादित्यवाद्
दीर्घसत्रश्रेयसामात्। एषांपंचानांवृद्धिं प्राप्तावादेरचआत्ञितिणितिकितिचादाविकं। दैविकाकूलेभवादाविका कूलाः शाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः। शिंशपायाविकारः शांशपश्च मसः। पलाशादिभ्योवेत्यत्र। दित्योहृदंदात्यौहं। दीर्घसत्रेभवं दार्घसत्रं। श्रेयसिभवं श्रायसं। ग्रामात्पर्यनुपूर्वात्
। ठञ्स्यात्। अव्ययीभावादित्येव। पारियामिकः। आनुग्रामिकः। जिह्वामूलांगुलेभ्यः। जिह्वामूलीयं। अंगुलीयं। वर्गान्ताच्च। कवर्गीयं। अशब्देय
त्वावन्यतरस्यां। पक्षे पूर्वेण ङः। मद्गुर्पः। मद्गुर्णः। मद्गुर्णीयः। अशब्देकिं। चवर्गीयो वर्णः। कर्णललाटालकनलंकारे। कर्णिका। ललाटि
का। तस्यव्याख्यानइति चव्याख्यानवनाम्नः। सुपांव्याख्यानः सोपोग्रंथः। तेइः। कार्त्तः। सुभुभवं सोपं। वहुचोन्तोदात्ताद्ठञ्। षत्वणत्वयोर्वि
धायकंशास्त्रंषत्वणत्वं। तस्यव्याख्यानस्तत्रभवोवाषात्वणत्विकः। क्रतुयज्ञेभ्यश्च। सोमसाध्येषुयागेष्वेतोप्रसिद्धौ। तत्रान्यतरोपादाने
नसिद्धेउभयोपादानसामर्थ्यादसोमकाअपिगृह्यंते। अग्निष्टोमस्यव्याख्यानस्तत्रभवोवाआग्निष्टोमिकः। वाजपेयिकः। पाकयज्ञिक
ः। नावयज्ञिकः। वहुवचनंस्वरूपविनिरासार्थमे। अनंतोदात्तार्थआरंभः। अध्यायेष्वेवर्षेः। आषिशब्देभ्योलक्षणयाव्याख्येयंयथादृष्टि

षि-

= तस्येति। चात्तत्रभवइत्यस्यग्रहणं। षष्ठीसमर्थाद्व्याख्यानतद्वत्त्वेनप्रसिद्धंयद्यस्तिपादकाद्व्याख्यानकारणार्थे। सप्तमीसमर्थान्नुतत्रभवइत्यर्थेप्रत्ययाइत्यर्थः। इतीतिकिं। तत्रभावेहिअर्थसनि
धानेसप्तमाणश्चकारोर्थमेवसमुच्चिनुयान्नतुसमर्थविभक्तिभावितेनभवेपिषष्ठ्यंतादेवस्यात्। इतिसुवाक्यार्थपरामर्थार्थकइतिनदोषः४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+ठञादेरपवादः। आर्गयनः। औपनिषदः। वैयाकरणः। ततआगतः। खुघ्रादागतः। औघ्नः। ठगायस्थानेभ्यः। ४

भ्योभवेव्याख्यानेचाध्यायेठञ्स्यात्। वसिष्ठेनदृष्टोमंत्रोवसिष्ठः। तस्यवर्णव्याख्यानस्तत्रभवोवावासिष्ठिकोध्यायः। अध्यायेषुकिं। वासिष्ठीत्रक। पौरोडाशपुरोडाशात्ष्ठन्। पुरोडाशसरुचरितोमंत्रः पुरोडाशः। सएवपौरोडाशः। ततष्ठन्। पौरोडाशिकः। पुरोडाशिकः। छंदस्यायदणो। छंदस्यः। छान्दसः। ह्यज्ज्ञालगार्कपृथमाध्वरपुरश्चरणानामारण्यानाङ्क। ह्यचः। ऐष्टिकः। पाशुकः। अतः। चातुर्होत्रकः। ब्राह्मणिकः। आर्चिकः। इत्यादि। अरण्यगयनादिभ्यः। शुल्कशालायाआगतः शौल्कशालिकः। शुंडिकाभ्योरा। आयस्थानठकछादीनांचापवादः। शुंडिकाद्यागतः शौंडिकः। कार्कणः। तैर्थः। विद्यायोनिसंबंधेभ्योवुञ्। औपाध्यायकः। पैतामहकः। अतष्ठञ्। वुञोपवादः। होत्रकः। भ्रात्रकः। पितुर्यच्च। चाद्वुञ्। रीढतः। यस्येतिलोपः। पित्र्यः। पैत्रकं। गोनादंकवत्। विदेभ्यआगतंवेदं। गार्गं। दार्भं। औपगवकं। नत्रः शुचीश्वरक्षेत्रकुशलनिपुणानां। नत्रः परेषांशुचादिपंचानामादेरचोवृद्धिः पूर्वपदस्यवान्निदादौ। आशौचं। अशौचं। आनैश्वर्यं। अनैश्वर्यं। आक्षेत्रज्ञं। अक्षेत्रज्ञं। आकौशलं। अकौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शलं। अनेपुणं। अनेपुणं। हेतुमनुष्येभ्योन्यत्तरस्यारूपः। समाहागतंसमरूपं। पहेगहादिलाच्छः। समीयं। विषमीयं। देवदत्तरूपं। देवदत्तं। मयट्च। स
ममयं। विषममयं। देवदत्तमयं। प्रभवति। ततइत्येव। हिमवतःप्रभवतिहैमवती। गङ्गा। विदूरात्ञ्यः। विदूरात्प्रभवतिवैदूर्यीमणिः। तस्मात्तिपथिकृत
यो। स्रुघ्नंगच्छतिस्रौघ्नः पंपादूतोवा। अभिनिष्क्रामतिहारं। तदित्येव। स्रुघ्नमभिनिष्क्रामतिस्रौघ्नं कन्यकुब्जाहारम्। अधिकृत्यकृतेग्रंथे। त
दित्येव। शारीरकमधिकृत्यकृतोग्रंथः शारीरकीयः। शारीरकंभाष्यमितित्वभदोपचारात्। शिश्नुक्रंदस्य मसमहन्द्रेन्दुजननादिभ्यश्छः। शिश्नुनं
क्रंदनं शिश्नुक्रंदः। तमधिकृत्यकृतोग्रंथः शिश्नुक्रंदीयः। यमसस्यसभायमसभं। क्लीबत्वंनिपातनात्। यमसभीयः। किरातार्जुनीयं। इन्द्रजननादि
राकृतिगणः। इन्द्रजननीयं। विरुद्धभोजनीयं। तोस्यनिवासः। स्रुघ्नोनिवासोस्यस्रौघ्नः। अभिजनश्च। सुघ्नोभिजनोस्यस्रौघ्नः। यत्रस्वयंवसति
सनिवासः। यत्रपूर्वैरुषितंसोभिजनइति विवेकः। आयुधजीविभ्यश्छः पर्वते। पर्वतवाचिनः प्रथमांतादभिजनशब्दादस्यत्यर्थेछः स्यात्। हृद्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लं पर्वतो भिजनएषांआयुधजीविनांतेहृतोलीयाः। आयुधेतिकिं। अहोदः पर्वतोभिजनो येषांतेआहीयाः द्विजाः। शौंडिकादिभ्योञ्यः। शौंडिको भि
जनोस्यशौंडिक्यः। सिंधुतरुशिलादिभ्योणानौ। सिंध्वादिभ्योणतरुशिलादिभ्योञ्स्यादुक्तेर्थे। सैन्धवः। तरुशिलानगरी अभिजनोस्यतारु
शिलः। तरीशलातुरवर्मतीकूचवाराद्धकक्षणाद्ठञ्यकः। तरी अभिजनोस्यतौरेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः। भक्तिः। सोस्येत्यनुवर्त्तते
भज्यतेसेव्यतेइतिभक्तिः। स्रुघ्नोभक्तिरस्यसौघ्नः। अचित्तादेशकालाद्ठक्। अपूपाभक्तिरस्यापूपिकः। पायसिकः। आचित्तात्किं। देवदत्तः। अदेशा
त्किं। स्रौघ्नः। अकालात्किं। ग्रैष्मः। महाराजाद्ठञ्। माहाराजिकः। वासुदेवार्जुनाभ्यांवुन्। वासुदेवकः। अर्जुनकः। गोत्रक्षत्रियाख्येभ्योबहुलंवुञ्। अ
णोपवादः। परलाद्दाञ्छ्वाघते। ग्लुचुकायनिर्भक्तिरस्यग्लौचुकायनकः। नाकुलकः। बहुलग्रहणान्नेह। पाणिनोभक्तिरस्यपाणिनीयः। जनपदिनां
जनपदवत्सर्वजनपदेनसमानशब्दानांबहुवचने। जनपदस्वामिवाचिनांबहुवचनेजनपदवाचिनासमानश्रुतीनांजनपदवत्सर्वस्मात्प्रत्ययःप्रकृति

= संज्ञेषाभमवतः अतोनोत्तरेणसिद्धिरितिभाष्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्च। जनपदतत्वध्योश्चेति प्रकरणे येषत्पयाउक्तास्तेत्रातिदिश्यन्ते। अंगाज्जनपदोभक्तिरस्यांगकः। अंगांक्षत्रियाभक्तिरस्यांगकः। जनपदिनांकिमु
पंचालाब्राह्मणाभक्तिरस्यपांचालः। जनपदेनेतिकिं। पौरवोराज्ञाभक्तिरस्यपौरवीयः॥ तेनप्रोक्तं। पाणिनिनाप्रोक्तं पाणिनीयं। तित्तिरिवरतंतुखंडिको
खाद्धरणा। कुन्दोब्राह्मणानिश्रितानिद्विषयता। तित्तिरिणाप्रोक्तमधीयतेतैत्तिरीयाः। काश्यपकोशिकाभ्यांणिनिः। काश्यपेनप्रोक्तमधीय
तेकाश्यपिनः। कलापिवैशंपायनांतेवासिभ्यश्च। कलापिनातेवासिभ्यः। हरिदुणाप्रोक्तमधीयते हारिद्रविणाः। वैशंपायनांतेवासिभ्यः। आलंबिनः। पुराण
प्रोक्तेषुब्राह्मणाकल्पेषु। तृतीयांतात्प्रोक्तार्थेणिनिः स्याद्यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणाकल्पास्तेभवन्ति। पुराणोनाचिरंतनेनमुनिनाप्रोक्ताः भल्लु
भाध्वविनः। शाद्यायनः शाद्यायनिनकल्पे। पिंगपैङ्गी कल्पः। पुरेतिकिं। याज्ञवल्क्यानिब्राह्मणानि। आश्मरथ्यः कल्पः। अणिआपत्यस्पत्तेतियलोपः
। कठचरकाद्धुक्। आभ्यांप्रोक्तप्रत्ययस्लुक्स्यात्। कठेनप्रोक्तमधीयतेकठाः। चरकाः। कलापिनोराः। कलापिनाप्रोक्तमधीयतेकलापाः। नातस्पठिलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिनिःस्यात्२

पे सवस्त्रचारिपीग्सर्पिकलापिकौषुमितेत्तिलिजाजलिजांगलिलांगलिशिलालिशिरखंडिसूकरसमसुपर्वणासुपसंख्यानं। इत्युपसंख्यानाद्विलोपः॥
छगलिनोदिनुक्। छगलिनाप्रोक्तमधीयते छागलेयिनः। पाराशर्यशिलालिभ्यांभिक्षुनटसूत्रयोः। पाराशर्येणप्रोक्तंभिक्षुसूत्रमधीयतेपारा
शरिणोभिक्षवः। शैलालिनोनटाः। कर्मन्दकृशाश्वादिनिः। भिक्षुनटसूत्रयोरित्येव। कर्मन्देनप्रोक्तमधीयतेकर्मन्दिनोभिक्षवः। कृशाश्विनोनटा
॥ तेनैकदिक्। सुदाम्नाअद्रिणाएकदिक्सौदामनी। तत्रिश्चस्वरादिपाठादव्ययत्वं। पीलुमूलेनएकदिक्पीलुमूलतः। उरसोयच्च। चात्तसिः॥
अणोपवादः। उरसाएकदिक्उरस्यः। उरस्तः। उपज्ञाते। तेनेत्येवपाणिनिनाउपज्ञातंपाणिनीयम्। कृतग्रंथे। वररुचिनाकृतेग्रंथेवाररुचः। संज्ञा
यां। तेनेत्येव। अग्रंपाणिभिः। माहिकाभिःकृतंमाहिकंमधुकुलालिभिःपुत्रः। तेनकृतेसंज्ञायां। कुलालेनकृतकोलालकोकुड्याअमस्यवटरपा
दपाश्चातेनकृतेसंज्ञायां। कुड्याभिःकृतंकौड्यं। श्रामरं। वाटरम्। पादपातस्येदं। उपगोरिदमोपगवम्। वहेस्तरणिद्वासंवोढुः स्वा। सांवहित्रं। अग्नी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धःशारणोरणभंच। अग्निमिन्धेअग्नीत्। तस्यस्थानमाग्नीध्रं। तात्स्थ्यात्तोपाग्नीध्रः। समिधामाधाने वेरुपरा। सामिधेन्योमंत्रः। सामिधेनीऋक्। रथा
द्यत्। रथ्यंचक्रं। पत्रश्चर्वीदृज्। पत्रंवाहनं। अश्वरथस्येदमाश्वरथ्यं। पत्राध्वर्युपरिषदश्च। अत्र। पत्राद्वाह्ये। अश्वस्येदंवाहनीयमाश्वं। आध्वर्यवं। पारि
षदं। हलसीरादृक्। हलिकं। सैरिकम्। इन्द्राद्वन्द्वैरमैथुनिकयोः। काकोलूकिका। कुत्सकुशिकिका। इंद्रदेवासुरादिभ्यःप्रतिषेधः। देवासुरं। गो
त्रचरणाद्वुञ्। औपगवकं। चरणाद्धर्मान्नायथोरितिवक्तव्यं। काठकं। संघांकलक्षणेष्वञ्यञिञामणः। घोषग्रहणमपिकर्त्तव्यं। अत्र। वेदः। सं
घोंकोघोषोवा। वेदं। लक्षणं। यत्र। गार्गी। गार्गं। इत्र। दाक्षः। दाक्षं। परम्परासंबंधोंकः। साक्षात्तुलक्षणं। शाकलाद्वा। अरवोऋर्थे। पदे चरणाद्वुञ्
। शाकलेनप्रोक्तमधीयतेशाकलाः। तेषांसंघोंकोघोषोवाशाकलः। शाकलकः। लक्षणेस्त्रीवत्। छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञः। छंदोगा
नांधर्मआम्नायोवाछंदोग्यं। याज्ञिकीऔक्थिकीवा। बह्वृच्यं। नाट्यं। चरणाद्धर्मान्नायथोरित्युक्तं। तत्साहचर्यान्नटशब्दादपितयोरेवानटउमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्यायं हास्तिपदः ३
ल २

यामांतेवासिषु। दंडप्रधानामात्यावास्तेषु शिष्येषु च वृत्तस्यात्। दाक्षाः। दंडमाणवाः शिष्याः। रैवतिकादिभ्यश्छः। तस्येदमित्यर्थे वुञोपवादः। रैवतिकीयः। वैजवापीयः। कौपिंजलहास्तिपदादण्वक्तव्यः। कुपिंजलस्यापत्यं इत्येवं निपातनादण्। तदंतात्पुनरण् कौपिंजलः। गोत्रादुञोपवादः। हस्तिपदस्यापत्यं हास्तिपदः। चरणादुञोपवादः। आथर्वणिकस्येकलोपश्च। अण्स्यात्। आथर्वणिकस्यायं आथर्वणोधर्मआम्नायो वा। चरणाद्दुञोपवादः॥ ॥ इतिहोषिकाः॥ ॥तस्य विकारः। अश्मनो विकारे इलोपो वक्तव्यः। अश्मनो विकारआश्मः। भाश्मनः। मार्त्तिकः। अवयवे च प्राण्योषधिवृक्षेभ्यः। चाहिकारे। मयूरस्यावयवो विकारो वा मायूरः। मौर्वकांडमश्मवा। पैप्पलं। बिल्वादिभ्योण्। वैल्वः। कोपधाच्च। अण्। अञोपवादः। तर्कनार्कवं तैन्तिडिकम्। त्रपुजतुनोः षुक्। आभ्यामण्स्याहिकारे एतयोः षुकागमश्च। त्रापुषं। जातुषं। औरभ्रं। दैवदारवं। भद्रदारवं। अनुदात्तादेश्च। दाधित्थं। कापित्थं। पलाशादिभ्यो वा। पालाशं। कारीरं। खादिरं। शम्याः ष्लञ्। शामीलं भश्म। बिल्वान्ष्ठ। शामीलीसुक्। मयडैतयोर्भाषायामभक्ष्याच्छादनयोः। प्रकृतिमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मयड्वास्याद्विकारावयवयोः। अश्ममयं। आश्मनं। अभक्षेत्यादिकं। मौद्गस्रूपः। कार्षसमाच्छादनं। नित्यवृद्धेरारिभ्यः। आम्रमयं। शरमयं। एका
चोनित्यं। लङ्गुयं। वाङ्मयं। कथंतर्हि। आप्यमन्मयमिति। तस्येदमित्यणन्तात्स्वार्थेष्यञ्। गोश्चपुरीषे। गोःपुरीषंगोमयं। पिष्टाच्च। मयट्स्यात्
विकारे। पिष्टमयंभक्ष्यं। कथंपैष्टीसुरेति। सामान्यविवक्षायांतस्येदमित्यणः। संज्ञायांकन्। पिष्टादित्येव। पिष्टस्यविकारविशेषःपिष्टकः। पूपो
पूपःपिष्टकःस्यात्। व्रीहेःपुरोडाशोमयट्। बिल्वाद्यणोपवादः। व्रीहिमयःपुरोडाशः। व्रीहेमन्यत्। असंज्ञायां तिलयवाभ्यां। तिलमयं। यवमयम्। स
ज्ञायां तु तैलं। यावकः। तालादिभ्योरः। अन्मयटोरपवादः। तालाद्धनुषः। तालंधनुः। अन्यत्तालमयं। ऐन्द्रायुधं। जातरूपेभ्यःपरिमाणे। अरार
वहुवचनात्पर्यायग्रहणम्। हाटकः। तापनीयः। सौवर्णोवानिष्कः। परिमाणेकिं। हाटकमयीयष्टिः। पाणिरजतादिभ्योञ्। शौक्लं। वाकं। राजतम्
त्रितश्चतत्प्रत्ययात्। त्रिधोविकारावयवप्रत्ययस्तदन्तादन्त्यस्तयोरेवार्थयोः। मयटोपवादः। शामीलस्यशामीलं। दाधित्थं। त्रितःकिं। वैल्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मयं। क्रीतवत्परिमाणात्। प्राग्वते छ इत्यारभ्य क्रीतार्थे येषु प्रत्ययेनोपाधिना परिमाणाद्धिता स्तेतयैव विकारे तिद्धिर्वपते। अरणादीनामपवादः। निष्केण क्रीतं नैष्किकं। एवं निष्कस्य विकारोपि नैष्किकः। शतस्य विकारः शत्यः। द्वात्रिंशिकः। उदुम्बरः। पाण्पत्रोपवादः। औडुम्बरः। उमोर्णयोर्वा। औमं। औमकं। ओर्णं। ओर्णिकं। वुञ्भावे यथाक्रमं सरा त्रौ। एष्पाद्वा। ऐरोयं। एरास्त्वेतु। ऐरं। गोपयसोर्यत्। गव्यं। पयस्यं। द्रोण्य। द्रुद्रुः। तस्य विकारो वयवो वाद्रव्यं। मानेवयः। द्रोरित्येव। द्रव्यं। यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयं। फलेलुक्। विकारावयवप्रत्ययस्य लुक्स्यात्फले। आमलक्याः फलमामलकं। प्लक्षादिभ्यो विधानसामर्थ्यान्नलुक्। प्लाक्षं। न्यग्रोधस्य च केवलस्य। अस्य न वृद्धिरैजागमश्च। नैयग्रोधं। जंबूवा। जंबूशाखात्फलेऽरस्यात्। जांबवं। पक्षे औरञ्। तस्य लुक्। जंबु। लुप्। जंबूः फलप्रत्ययस्य लुप्स्यात्। लुपि युक्तवत्। जंबूः फलं जम्बू। फलपाकप्रुषामुपसंख्यानं। व्रीहयः प्रुडाः। पुष्पमूलेषु बहुलं। मल्लिकायाः पुष्पं मल्लिका। जात्याः पुष्पं जाती। विदार्यामूले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदारी। बहुलग्रहणान्नेह। पाटलानि पुष्पाणि। साल्वानि मूलानि। बहुलकात्क्वचिच्छुक्। अशोकं। करवीरं। हरितक्यादिभ्यो फलप्रत्ययस्य लुप्स्यात्। हरीतक्यादीनां लिंगमेव प्रकृतिवत्। हरीतक्याः फलानि हरीतक्यः। कंसीयपरश्वाद्यौ यजतो लुक्। कंसीयपरश्वाद्यौ यजतो लुक्। कंसीयपरश्वाद्यौ यजतो लुक्। कंसीयं तस्य विकारः कांस्यं। परश्वो हितं परश्व्यं। तस्य विकारः पारश्वः॥ ॥इति शाब्दिकतीयाः॥ ॥प्राग्वहतेष्ठक्। तद्वहतीत्यतः प्राक्ठगधिक्रियते। तद्वहतिमात्रादिभ्य उपसंख्यानं। मात्रादिः कारीतिय आह समात्रादिकः। स्वागतादीनां च। ऐच्स्यात्। स्वागतमित्याह स्वागतिकः। साध्वारिकः। स्वंगस्यापत्यं स्वाङ्गिः। व्याङ्गिः। व्यङ्गस्यापत्यं व्याङ्गिः। व्यवहारे राचरति व्यावहारिकः स्वपतोः साधुस्वापतेयं। आहौपभृतादिभ्यः। पभृतमाह प्राभृतिकः। पार्यायिकः। पृच्छतोः सुस्नातादिभ्यः। सुस्नातं पृच्छति सौस्नातिकः। सौखशायनिकः। अनुशातिकादिः। गच्छतोः परदारादिभ्यः। पारदारिकः। गौरुत्तल्पिकः। तेन दीव्यति खनति जयति जितं। अक्षैर्दीव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिआक्षिकः। अभ्यारवनतिआधिकः। अक्षैर्जयतिआक्षिकः। अक्षैर्डतिमाक्षिकं। संस्कृतं। दध्नासंस्कृतंदाधिकं। मारिचिकं। कुलत्थ
कोपधादण्। ठकोपवादः। कुलत्थैः संस्कृतंकौलत्थं। तैलिकं। तरतिउडुपेनतरतिऔडुपिकः। गोपुच्छात्तञ्। गोपुच्छिकः। नौ ह्यच्छ
न्। नाविकः। घटिकः। बाहुभ्यांतरतिबाहुकारुणी। चरति। दृतीयान्ताद्ध्रुतिभक्षयतीत्यर्थयोष्ठकस्मात्। हस्तिनाचरतिहास्तिकः। शा
कटिकः। दध्नाचरतिदाधिकः। आकर्षात्ष्ठल्। आकर्षोनिकषोपलः। आकर्षादितिपाठांतरं। तेनचरतिआकर्षिकः। षित्वान्ङीष्। आक
र्षिकी। पर्पादिभ्यःष्ठन्। पर्परांचरतिपार्पिकः। पार्पिकी। येनपीतेनपंगवश्चरतिसपर्पः। अश्विकः। रथिकः। अगणात्ष्ठ्न्। चात्ष्ठन्। श्वादेरिनि
। ऐन्। श्वभस्त्रस्यापत्यंश्वाभस्त्रिः। श्वादंष्ट्रिः। तदादिविधौचेतदेवज्ञापकं। इकारादाविति वाच्यं। श्वगणेनचरतिश्वागणिकः। श्वागणि
की। श्वगणिकः। श्वगणिकी। पदांतस्यान्यतरस्यां। श्वादेरङ्गस्यपदस्यान्तेज्ञा। श्वापदस्येदंश्वापदं। शौवापदं। वेतनादिभ्योजीवति। वेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेनजीवतिवेतनिकः। धानुष्कः। वरेनक्रयविक्रयाट्ठन्। वरेनेनमूल्येनजीवतिवलिकः। क्रयविक्रयग्रहणसंघातविग्रहीतार्थे। क्रयविक्रयिकः। क्रयिकः। विक्रयिकः। आयुधाच्छ च। चाट्ठन्। आयुधेनजीवतिआयुधीयः। आयुधिकः। हरत्युत्संगादिभ्यः। उत्संगेनहरतिऔत्सङ्गिकः। भस्त्रादिभ्यः ष्ठन्। भस्त्रयाहरतिभस्त्रिकः। विलाद्वस्त्रिकी। विभाषाविवधात्। विवधेनहरतिविवधिकः। पक्षेठक्। वैवधिकः। एकदेशविकृतस्यानन्यत्वाद्वीवधात्षिष्ठन्। वीवधिकः। वीवधिकी। विवधवीवधवारौउभयतोवहंशिक्येस्कंधवाह्येकाष्ठेवर्त्तते। अंगाकुटिलिकायाः। कुटिलिकाव्याधानांगतिविशेषः। कर्मारोपकरणाभृतंलोहंच। कुटिलिकयाहरतिमृगान् अंगारान्कोटिलिकोव्याधः कर्मारश्च। निर्वृत्तेअक्षद्यूतादिभ्यः। अक्षद्यूतेननिर्वृत्तमाक्षद्यूतिकंवैरं। ञ्मिन्नित्यौ। त्रिप्रत्ययांतप्रकृतिकात्तृतीयांतान्निर्वृत्तेर्थेमप्णान्नित्यौ। कृत्यानिर्वृत्तंकृत्रिमम्। पाक्रिमं। भावप्रत्ययांतादिमवक्तव्यः। पाकेननिर्वृत्तंपाकिमं। त्यागिमं। अपमित्ययाचितान्पाकक्रीतौ। अपमित्येतिल्पवनौ। अपमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्य निर्वृत्तमापमित्यकं। याचितेन निर्वृत्तं याचितकं। संसृष्टे। दध्नासंसृष्टं दाधिकं। चूर्णादिभिः। चूर्णैः संसृष्टश्चूर्णिनो षूणः। लवणाच्छुक। लवणेन संसृष्टो
लवणः सूपः। लवणशाकं। मुद्गादयः। मौद्गओदनः। व्यंजनैरुपसिक्ते। दध्नाउपसिक्तं दाधिकं। ओजस्सर्तेभसावर्त्तते। ओजसिकः शूरः। साहस
सिकश्चोरः। आभासिको मत्स्यः। तत्रयथानुपूर्वमीपलोमकूलम्। द्वितीयान्तादस्माद्वर्त्ततेदृत्पसिन्नर्थेठकस्यात्। क्रियाविशेषणात्वाद्द्वितीया।
प्रतीपंवर्त्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। आनुकूलिकः। परिमुखंच। परिमुखंवर्त्ततेपारिमुखि
कः। चात्पारिपार्श्विकः। प्रयच्छतिगर्ह्ये। द्विगुणार्थे द्विगुणं। तत्प्रयच्छति द्वैगुणिकः। त्रैगुणिकः। वृद्धेर्द्विषभावोवक्तव्यः। वार्द्धुषिकः। कुसीदद
शैकादशात्षष्ठ्यन्तात्। गद्यापद्याभ्यामाभ्यामेतौ स्तः प्रयच्छत्यर्थे। कुसीदं द्वादशस्तदर्थं द्रव्यं कुसीदं तत्प्रयच्छति कुसीदिकः। कुसीदिकी। एत
कादशार्थत्वादेकादशा। ते चैते वक्ष्यतोदशाचेति विग्रहे कारः समासान्तः इहैवसूत्रे निपात्यते। दशैकादशिकः। दशैकादशिकी। द्वादशैकादशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्प्रयच्छतीत्युत्तमर्णस्य वेरुपितद्धितार्थः। उंछतीति वदरणपुंछतिवादरिकः। रक्षतीति सामाजंरक्षतिसामाजिकः। शाट्टर्दुरकरोति। शाट्टंकरोतिशाट्टिकः। दार्दुरिकः। पक्षिमत्स्यमृगान्हंति। स्वरूपस्यपर्यायाणां विद्योपाणांचग्रहणं। मत्स्यपर्यायेषुमीनस्येव। पक्षिणोहनिपाक्षिकः। शाकुनिकः। मायूरिकः। मात्स्यिकः। मैनिकः। शाकुलिकः। मार्गिकः। हारिणिकः। सारंगिकः। परिपंथंचतिष्ठति। अस्माद्द्वितीयांतात्तिष्ठतिहंतिचेत्यर्थेठक्स्यात्। पंथानं वर्जयित्वाव्याप्यवातिष्ठतिपारिपंथिकश्चोरः। परिपंथहनिपारिपंथिकः। माथोत्तरपदस्यनुपदधावति। दंडाकारोमाथः पथाः दंडमाथः। दंडमाथं धावतिदांडमाथिकः। पादविकः। आनुपदिकः। आक्रंदादृच्च। अस्मादृच्साच्चादृकधातीत्यर्थे। आक्रंदद्दुःखिनोरोदनस्थानंधावति आक्रंदिकः। पदोत्तरपदंगच्छति। पूर्वपदंगच्छतिपौर्वपदिकः। औत्तरपदिकः। प्रतिकंठमर्थलालामंच। एभ्योगच्छत्यर्थेठक्स्यात्। प्रतिकंठंगच्छतिप्रातिकंठिकः। आर्थिकः। लालामिकः। धर्मंचरति। धार्मिकः। अधर्माज्जेतिवक्तव्यः। आधर्मिकः। प्रतिपथमेतिठञ्च। प्रतिपथमेतिप्रातिपथिकः। समवायान्समवैति।

प्रातिपथिकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामवायिकः। सामूहिकः। परिषदेण्यः। परिषदं समवैति पारिषद्यः। सेनायां वा। रापः स्यात्। पक्षेठक। सैन्याः। सैनिकाः। संज्ञायां ललाटकुक्कुट्योपपतिलाटपशपतिलाटिकस्तेवकः। कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशोलक्ष्यते। कौक्कुटिकोभिक्षुः। तस्य धर्म्यं आपणस्य धर्म्यमापणिकं। अरण्यमहिष्यादिभ्यः। महिष्याधर्म्यं माहिषं। याजमाने। ऋतोञ्। यातुर्धर्म्यं यात्रं। नरात्रैतिवक्तव्यं। नरस्य धर्म्यं नारी। विशासितुरिडलोपश्चाञ्चवक्तव्यः। विशासितुर्धर्म्यं वैशाखं। विभाजयितुर्णिलोपश्चाञ्चवक्तव्यः। विभाजयितुर्धर्म्यं वैभाजित्रं। अवक्रयः षष्ठ्यन्ताद्वक्रयोरवक्रयेर्थे आपणस्यावक्रयञ्आपणिकः। राजग्राह्यद्रव्यमवक्रयः। तस्य पण्यं। अभूषाः पण्यमस्याभूषिकः। लवणाद्वञ्। लावणिकः। किसरादिभ्यः छन्। किसरं पण्यमस्य किसरिकः। वित्वान्डीषि। किसरिकी। किसरा उत्तीर। नलद इत्यादि। किसरादयः सर्वे सुगंधिद्रव्यविशेषवाचिनः। शालालुनो न्यतरस्यां। छन्नापक्षेठक। शालालुकः। शालालुकी। शालालुकः। शालालुकी। शालालुसुगंधिद्रव्यविशेषः। शिल्पं। म्रदंगवास्त्रं शिल्पमस्य मार्दंगिकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+अस्तिः पुरुषाणामस्यास्तिकः। धानुष्कः। पण्यवाहः। पारम्पर्यिकः। शक्तियष्ट्यौ। ऐकक। शाक्तीकः। याष्टीकः। अस्तिना अस्तिः। छंमतिः। तदस्येव।

मृदुकार्ष्टरारणान्यतरस्यां। मृदुकवास्त्रं शिल्पमस्य मार्दुकः। मार्दुकिकः। कार्ष्टिकः। कार्ष्टिकः। प्रत्ययः। तदस्येव। अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः। नास्ति मतिर्यस्य स नास्तिकः। दिष्टं मतिर्यस्य स दैष्टिकः। शीलं। अभूषभक्षणं शीलमस्य भूषिकः। छत्रादिभ्योणः। गुरोर्दीयाणामावरणं छत्रं तच्छीलमस्य छात्रः। कार्मस्ताच्छील्ये। कार्म इति ताच्छील्ये णो टिलोपो निपात्यते। कर्म शीलः कार्मः। नस्तद्धित इत्येव सिद्धे एकार्यं ताच्छीलिकेणापि। तेन चोरी तापसी तिसिद्धं। ताच्छील्ये किं। कार्मणः। कर्माध्ययने वृत्तं। पथ्यमातात्वष्ट्यर्थं ठक्स्यात्। अध्ययने वृत्ताया क्रियासा चेत्पथ्यमातस्यार्थः। ऐकान्तिकः। यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणस्फुरणं स्खलितमेकं जातं सः। बहुभूर्वपराह्णे। प्राग्विषये। द्वादशान्यानिकर्माणि अध्ययने वृत्तान्यस्य स द्वादशान्यिकः। द्वादशापाठा अस्य जाता इत्यर्थः। तिभक्षाः। अभूषभक्षणं तिभक्षमस्मै अभूषिकः। तदस्मै दीयते नियुक्तं। अग्रभोजनं नियतं दीयते स्मै आग्रभोजनिकः। आराणामासेदनाद्ठन्। आराणि नियुक्तं दीयते स्मै आराणिकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आशिकी। मांसोदनग्रहणसंघातविग्रहे। तार्थे। मांसोदनिकः। मांसिकः। ओदनिकः। भक्तादणान्तरस्यां। पक्षेठक्। भक्तमस्मै नियुक्तं दीयते भा
क्तः। भाक्तिकः। तत्र नियुक्तः। आकरे नियुक्त आकरिकः। अगारं तादृन्। देवागारे नियुक्तो देवागारिकः। अध्वायिन्यदेशकालात्। निषिद्ध
देशकालवाचकाद्ठक्स्यादध्वेतरि। श्मशानेऽधीते श्मशानिकः। चतुर्दश्यामधीते चातुर्दशिकः। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। तत्रे
त्यव। वंशकठिनेव्यवहरति वांशकठिनिकः। वंशावेशावः कठिनाप्यस्मिन्देशे सवंशकठिनः। तस्मिन्देशे याक्रियाथथानुष्ठेयातांतथैवानुतिष्ठ
तीत्यर्थः। प्रास्तारिकः। सांस्थानिकः। निकटे वसति। नैकटिको भिक्षुः। आवसथान्छल। आवसथे वसति आवसथिकः। षिलाद्ठ। ष। आ
वसथिकी। आकर्षात्पर्षदो भस्त्राहिभ्यः कुसीदस्य च॥ आवसथात्किसरादेः षितः षडेते ठगधिकारे॥ ७॥ षडिति सूत्रे षड्भिर्विहिताद्
त्यर्थः। षत्पयाक्तसप्त॥ ॥ठकोवधिस्समाप्तः॥ ॥ प्राग्घिताद्यत्। तस्मै हितमित्यतः प्राक् यदधिक्रियते। तद्धृतिरव्ययुगप्रासंगं। रूपं वहति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनोवर्वक्षत्रातिप्रियमस्यहितेभुचइतिविष्कः =२ [illegible] जननीशब्दाद्यतजनिं [illegible] =२

रथ्यः। युगपः। वत्सानांदमनकाले स्कंधेकाष्ठमास्तज्यतेसपासंगः। तंवहतिपासंग्यः। धुरोवहको। हलिचेतिदीर्घपाप्ते। नमकुर्धुरे श्रोपधायादी
घोनस्यात्। धुर्यः। धोरेयः। खः सर्वधुरंवहति सर्वधुरीणः। एकधुराध्युक्तः। एकधुरीणः। एकधुरः। शाकटारणः। शाकटंवहतिशाकटोगोः। हलसीरा
ढ्कः। हलंवहतिहालिकः। सैरिकः। संज्ञायांजन्योजनीवधूः तांवहतिप्रापयतिजन्या। विध्यत्यनुषा। हन्तीयोताहिध्यतीत्यर्थयत्स्यान्नचेत्तत्र धनुषःकरण
त्वं। पादौविध्यतिपद्याः दार्करः। धनगणलब्धा। तन्नंतमेतत्। धनंलब्धाधन्यः। गणलब्धागण्यः। अन्नास्तः। अन्नंलब्धाआन्नः। वर्गगतः। वद्यपः। परे
छानुचारी। परमस्मिन्नृप्यः। पद्यःकर्दमः। नातिशुष्कदृत्यर्थः। मूलमस्यावर्हि। आवर्हणमावर्हः। उत्पाटनं। तदस्यास्ती। तावर्हिमूलमावर्हियेषांतेमूल्याः। मु
द्गाः। संज्ञायां धेनुष्या। धेनुशब्दस्यषुकागमोयस्यपयश्चस्वार्थेनिपात्यतेसंज्ञायां। धेनुष्यावंधकेस्थिता। गृहपतिनासंयुक्तोत्र्यः। गृहपतिर्यजमानः। तेनसंयुक्तो
गार्हपत्योनिः। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु। नावातार्यनाव्यं। वयसातुल्योवयस्यः। धर्मेणप्राप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्म्यं। विषेणानध्योविष्यः। मूलेनजानाम्यंमूल्यं। मूलेनसमोमूल्यः। सीतयासमितंसीत्यंक्षेत्रं। तुलयासमितंतुल्यं। धर्मपथ्यर्थन्यायादनपेते। धर्मादनपेतंध
र्म्यं। पथ्यं। अर्थ्यं। न्याय्यं। कुंदस्योनिर्मितं। कुंदसानिर्मितंकुंदस्यं। कुंदयाकृतमित्यर्थः। उरसोगात्रं। वाद्यत्र। उरसानिर्मितः पुत्रओरसः। उरस्यः। हृदयस्यप्रि
यः। हृद्योहृद्यः। हृदयस्यहृद्ये रवयरणलासि। इति हृदादेशः। बंधनेचर्षौ। हृदयशरात्खल्ताहृद्बंधनेयत्स्याद्देहेभिधेये। हृदयस्यबंधनोहृद्योवशीकर
णमंत्रः। मनजनहलाकरणजल्पकर्षेषु। मनंज्ञाने। तस्यकरणाभावःसाधनंवामत्यं। जनस्यजल्पोजन्यः। हलस्यकर्षो हल्यः। नत्रसाधुः। अग्र्यः। सामसु
साधुःसामन्यः। येचाभावकर्मणोरितिप्रकृतिभावः। कर्मणयः। शरणयः। प्रतिजनादिभ्यःखञ्। प्रतिजनंसाधुःप्रातिजनीनः। सांयुगीनः। सार्वजनीनः। वै
श्वजनीनः। भक्तासः। भक्तेसाधवोभाक्ताः। शालयः। परिषदोण्यः। पारिषद्यः। परिषदइतियोगविभागात्सोपि। पारिषदः। कथादिभ्यष्ठक्। कथायांसा
धुःकाथिकः। गुडादिभ्यष्ठञ्। गुडेसाधुर्गौडिकइक्षुः। सांकुकोयवः। पथ्यतिथिवसतिस्वपतेर्ढञ्। पथिसाधुः पाथेयं। आतिथेयः। वसतेवसतिस्तत्रसा

योगविभागादिति-सर्वदेशपरिखदेहिदेशसंदृतिभाष्यत्रयोगादितिभावः-रास्साधुरिनेस्तृतीयौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृ वीसतेर्यीरात्रिः।स्वप्नतोसाधुस्वापतेर्यंधनं।सभायायः।सभ्यः।समानतीर्थेवासी।साकृरिति निवृत्तं।वसती तिवासीसमानेतीर्थेगुरौवसती तिसतीर्थ्यः।समा
नोदरेशयितस्त्रोचोदात्तः।समानेउदरेशयितः स्थितःसमानोदर्योभ्राता।सोदराद्यः।सोदर्यः।अर्थःप्राग्वत्॥ ॥इतिषाग्घितीयाः॥ ॥प्राक्रीताच्छः।तेनक्रीतमि
त्यतःप्राक्छोधिक्रियते।उगवादिभ्योयत्।प्राक्रीता दित्येव।उवर्णांता द्गवादिभ्यश्चयत्स्यात्।छःस्यापवादः।नाभिनभंच।नभ्योहः।नभ्यमंजनं।रूपनाभावेवे
दं।श्रुनःसंप्रसारणंवाचदीर्घत्वं।श्रून्यं।श्रुन्यं।ऊधसोनङ्।ऊधन्यः।कंवलाच्चसंज्ञायां।यत्स्यात्।कंवल्यमूर्णापलशतं।संज्ञायांकिं।कम्बलीयाऊर्णा।विभाषा
हविरपूपादिभ्यः।आमिक्षंदधि।आमिक्षीयं।पुरोडाशयास्तंडुलाः।पुरोडाशीयाः।अपूप्यं।अपूपीयं।तस्मैहितं।वत्सेभ्योहितोवत्सीयोगोधुक्।शंकव्यंदारु॥
गव्यं।हविष्यं।शरीरावयवाद्यत्।दंत्यं।कंठ्यं।नस्नासिकायायत्तसरूडेषु।नस्यं।नाभ्यं।येचतद्धिते।यादौतद्धितेपरेशिरःशब्दस्यशीर्षन्नादेशःस्यात्।शीर्ष
ण्यः।तद्धितेकिं।शिरइदं।शिरस्पति।वाकेशेषु।शीर्षण्याः।शिरस्याः।केशाः।अचिशीर्षइतिवाच्यं।अजादौतद्धितेशिरसःशीर्षादेशः।स्थूलशिरसइदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थौलशीर्षमारवलयवमाषतिलवृषवह्यगाश्च। खलायहितंखल्यं। यव्यं। माष्यं। तिल्यं। वृष्यं। वह्यरथ्यं। चादृष्या। अजाविभ्यांष्यन्। अजथायूथिः। अविष्या
। आत्मन्विश्वजनभोगोत्तरपदात्खः। आत्माध्यात्मौ। स्तोरवेप्रकृत्यान्तः। आत्मनेहितमात्मनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद्
हुवीहेश्वकृष्वा। विश्वजनीयं। पंचजनादुपसंख्यानं। पञ्चजनीनं। सर्वजनाद्दुग्वश्च। सार्वजनिकः। सर्वजनीनः। महाजनाद्दुञ्। माहाजनिकः। मातृभो
गीणः। पितृभोगीणः। राजभोगीणः। आचार्यादणत्वं च। आचार्यभोगीनः। सर्वपुरुषाभ्यां णढञौ। सर्वस्मै हितं सार्वं। सर्वीयं।
पुरुषाद्यविकारसमूहतेनकृतेषु। भाष्यकारप्रयोगात्तेनेत्यस्य द्वन्द्वमध्ये निवेशः। पुरुषस्य वयः पौरुषेयः। तस्येदमित्यणप्राप्ते। पुरुषस्य विकारः
पौरुषेयः। षाणिरजनादिभ्योञिप्राप्ते। समूहेप्यणिप्राप्ते। एकाकिनोपि परितः पौरुषेयवृत्ताद्वेति माघः। तेन कृतं ग्रंथे णिप्राप्ते। अग्रंथे तु प्रासादादौ
अप्राप्त एवेति विवेकः। माणवचरकाभ्यां खञ्। माणवाय हितं माणवीनं। चारकीणं। तदर्थे विकृतेः प्रकृतौ। विकृतिवाचकाच्चतुर्थ्यंतात्तदर्थायां प्रकृ

=६६:४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोवाच्यायंप्रत्ययःस्यात्। अंगारेभ्यस्तानिअंगारीयाणिकाष्ठानि। प्राकारीयाइष्टकाः। शंकव्यंदारु। छदिरुपधिवल्लेढञ्। छादिषेयाणितृणानि। वालेयास्तंडुलाः।
उपधिश्चात्रस्वार्थेदृष्यते। उपधीयतइत्युपधिःरथांगं। तदेवऔपधेयं। अतएवभोपानहोर्न्यः। छत्रस्यापवादः। आर्षभ्यौवत्सः। औपानह्यो मुंजः। चर्मण्यप्यंयमेव
पूर्वविप्रतिषेधेन। औपानह्यं। चर्मणोञ्। चर्मणोयाविकृतिस्तद्वाचकादञ्स्यात्। वध्रेइदंवाध्रं। वारत्रंचर्म। तदस्यतस्मिन्स्यादिति। प्राकारआसामिष्टकानांस्या
त्प्राकारीयाइष्टकाः। प्रासादीयंदारु। प्राकारोस्मिन्प्राकारीयोदेशः। इतिनादीलो। किंकोम्विवक्षामनुसारयति। तेनेत्न। प्रासादोदेवदत्तस्यस्यादिति। परि
खायाढञ्। पारिखेयीभूमिः॥ ॥छ्यतोःपूरणेविधिः॥ ॥प्राग्वतेष्ठञ्। तेनतुल्यमितिवतिवक्ष्यतितेनतःप्राक्ठञ्विधिक्रियते। आर्हादिगोपुच्छसंख्यापरिमा
णाट्ठक्। तदर्हतीत्येभिर्व्याप्यष्ठञ्विधिकारमध्येष्ठञोपवादष्ठगधिक्रियतेगोपुच्छादीन्वर्जयित्वा। असमासेनिष्कादिभ्यः। आर्हादित्यतस्तेनक्रीतमि
तियावत्सम्पदवासूत्रमनुवर्त्तते। निष्कादिभ्योसमासेठगर्हीयेचर्थेषुनेष्कादिकं। समासेतुठञ्। परिमाणान्तस्यासंज्ञाशाणयोः। उत्तरपदस्यवृद्धि

तद२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिदादौ। परमनैष्किकं। असमासगुहणाद्वापकंभवतिइतःप्राक्तदंतविधिरिति। तेनसुगव्यंयवापूप्यमिति। इतऊईनुसंख्यापूर्वपदानांतदंतग्रहणंप्रा
ग्वतेरिष्यते। तच्चालुकि। पारायणिकः। हैपारायणिकः। अलुकीतिकिं। द्वाभ्यांमूर्षीभ्यांक्रीतंद्विमूर्षम्। द्विमूर्षेणक्रीतंमूर्षीदम्भाभृतकिंतुठञ्। द्विसौ
र्पिकं। अर्द्धात्परिमाणात्स्वपूर्वस्यतुवा। अर्द्धात्परिमाणवाचकस्योत्तरपदस्या ० देरचोवृद्धिःपूर्वपदस्यतुवाञितिणितिकितिच। अर्द्धद्रोणेनक्री
तमर्द्धद्रौणिकं। आर्द्धद्रौणिकं। नातःपरस्य। अर्द्धात्परस्यपरिमाणाकारस्यनवृद्धिःपूर्वपदस्यतुवाञितिदादौ। अर्द्धप्रस्थिकं। आर्द्धप्रस्थिकं। अतः
किं। आर्द्धकोडविकं। तेपरः किं। अर्द्धखार्याम्भवाः। अर्द्धखारी। अर्द्धखारीभार्यादत्यत्रवृद्धिनिमित्तस्येतिपुंवद्भावनिषेधोनस्यात्। शताच्चठन्यता
वपरात्। शतेनक्रीतंशतिकं। शत्यं। अशतइतिकिं। शतेपरिमाणमस्यशद्धसंघः। इत्यप्रत्ययार्थोवस्तुतःप्रकृत्यर्थान्नभिद्यते। तेनठन्यतोन।।
किंतु ० कनेव। असमासइत्येव। द्विशतेनक्रीतंद्विशतकं। संख्यायाअतिशदंतायाःकन्। संख्यायाःकन्स्यादार्हीयेर्थेनतुत्यंशदंतायाः। पं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चभिः क्रीतः पंचकः। बहुकः। त्यंतायास्तः। साप्तनिकः। शतंतायाः चत्वारिंशत्कः। बतोरिद्वा। बलंतात्कन इडुस्यात्। तावतिकः। तावत्कः। विंशतित्रिंशद्भ्यां डुन्नसंज्ञायां। योगविभागः कर्त्तव्यः। आभ्यां कन् स्यात्। असंज्ञायां तु डुन्स्यात्कनोपवादः। विंशकः। त्रिंशकः। संज्ञायां तु विंशतिकः। त्रिंशत्कः। कंसाद्दिठन्। दोः। वर्षः। इकारश्चारणार्थः। कंसिकः। कंसिकी। अर्द्धाच्चेति वक्तव्यं। अर्द्धिकः। अर्द्धिकी। कार्षापणाद्दिठन्वक्तव्यः। प्रतिगदेशाच्च वा। कार्षापणिकः। कार्षापणिकी। प्रतिकः। प्रतिकी। मूर्णादन्यतरस्यां। शोर्पः। शोर्पिकं। शतमानविंशतिकसहस्रवसनादण्। एभ्योऽण्स्याद्दुन्ठक्कनामपवादः। शतमानेन क्रीतं शतमानं। विंशतिकं। साहस्रं। वासने। अध्यर्द्धपूर्वाद्द्विगोर्लुगसंज्ञायां। अध्यर्द्धपूर्वाद्द्विगोश्च परस्यार्थीयस्य लुक्स्यात्। अध्यर्द्धकंसं। द्विकंसं। संज्ञायां तु पांचकलायिकं। विभाषा कार्षापणसहस्राभ्यां। लुग्वास्यात्। अध्यर्द्धकार्षापणम्। अध्यर्द्धकार्षापणिकं। द्विकार्षापणं। द्विकार्षापणिकं। औपसंख्यानिकस्य ठनो लुक्। पक्षे अध्यर्द्धप्रतिकं। द्विप्रतिकं। अध्यर्द्धसहस्रं। अध्यर्द्धसाहस्रं। द्विसहस्रं। द्विसाहस्रं। द्वित्रिपूर्वान्निष्कात्। लुग्वास्यात्। द्विनिष्कं। द्विनैष्किकं। त्रिनिष्कं। त्रिनैष्किकं। बहुपूर्वाच्चेति वक्तव्यं। बहुनिष्कं। बहुनैष्किकं। वि

=संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्लाच्च। द्वित्रिवहुपूर्वाद्विस्लादारीयस्लुग्वास्यात्। द्विवस्तं। द्वैस्तिकमित्यादि। विंशतिकान्वयः। अध्यर्द्धपूर्वाद्विगोरित्येव। अध्यर्द्धविंशतिकीनं। द्विविंशतिकीनं। खार्यीकन्। अध्यर्द्धखारीकं। द्विखारीकं। केवलायाश्चेतिवक्तव्यं। खारीकं। पणपादमाषशताद्यत्। अध्यर्द्धपणं। अध्यर्द्धपाद्यं। द्विपाद्यं। इह पादः पदिति नाय स्पतिलोपस्यस्थानिवद्भावात्। पद्यत्यतदर्थेदस्यपि। पारणं गार्घस्येवतन्नग्रहणात्। शाणाद्वा। यत्स्यात्। पक्षे ठञ्। तस्लुकि। अध्यर्द्धशाणं। अध्यर्द्धशाणं। द्वित्रिपूर्वादणच्। शाणाद्दित्येव। चाद्यत्। तेनत्रैरूप्यं। परिमाणांतस्यासंज्ञाशाणयोरितिपर्युदासात् आदिवृद्धिरेव। द्विशाणं। द्विशाणं। द्विशाणं। इह ठञ्नादयस्त्रयोऽशाप्रत्ययाः प्रकृतास्तेषांसमर्थविभक्तयोर्यौगपद्यं कांक्षितास्तेइदानीमुच्यंते। तेनक्रीतं ठञ्। गोपुच्छेनक्रीतं गोपुच्छिकं। सांप्रतिकं। षाण्मासिकं। ठक्। नैष्किकं। इङ्गोरणाः। गोरणाइत्यत्रनद्वितलुकि। लुकोपवादः। पंचभिर्गोरणैः क्रीतः पंचगोरणिः। तत्पनिमित्तंसंयोगोत्पातौ। संयोगः संबंधः। उत्पातः शुभाशुभसूचकः। शातिकः। शत्योधनपतिसंयोगः। शातिकं। शत्यंदक्षिणाद्विस्पंदनं। शातस्पनिमित्तमित्यर्थः। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं। वातस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+ तत्रविदितइतिच४

रामनंकोपनंवावातिकंपैत्तिकंश्लैष्मिकंसन्निपाताच्चेतिवक्तव्यं।सान्निपातिकंगोद्यचौसंख्यापरिमाणाच्चास्यैत्तागोनिमित्तंसंयोगउत्पातोवाग
व्यःद्यचःधन्यःयशस्यःस्वर्ग्यःगोद्यचःकिं।विजयस्यवेजायकःअसंख्येत्यादिकिं।पंचानांपंचकंसप्तकंप्रास्थिकंखारीकंअश्वादिआश्विकंब्र
ह्मवर्चसादुपसंख्यानं।ब्रह्मवर्चस्यंपुत्राद्यच।चाद्यत।पुत्रीयःपुत्र्यःसर्वभूमिपृथिवीभ्यामणञौ।सर्वभूमेर्निमित्तंसंयोगउत्पातोवासार्वभौमःपा
र्थिवःसर्वभूमिशब्दोनुशतिकादिषुपठ्यते।तस्येश्वरःसर्वभूमेरीश्वरःसर्वभूमौविदितोवासार्वभौमःपार्थिवःलोकसर्वलोकाट्ठञ्।तत्रविदितइत्य
र्थे।लौकिकःअनुशतिकादिलादुभयपदवृद्धिःसार्वलौकिकःतस्यवापःउप्यतेस्मिन्निति।वापःक्षेत्रं।प्रस्थस्यवापःप्रास्थिकंद्रौणिकंखारीकंपात्राच्छ
न्नंपात्रस्यवापःपात्रिकंपात्रिकाक्षेत्रभक्तिः।तदस्मिन्नृद्ध्यायलाभशुल्कोपदादीयते।वृद्धिर्दीयतइत्यादिक्रमेणप्रत्येकंसंबंधादेकवचनम्।पंचास्मि
न्वृद्धिःआयःलाभःशुल्कंउपदावादीयतेपंचकःशतिकःशतंसाहस्रःउत्तमर्णेनमूलातिरिक्तंयाह्यंवृद्धिःयामादिषुस्वामिग्राह्योभागआयः।वि

आश्विकं२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षेत्रामूल्यादधिकंग्राह्यंताभ्यः रक्षानिर्देशोराजभागः शुल्कं। उत्कोचउपदा। चतुर्थ्यर्थउपसंख्यानं। पंचाभ्यामेवृद्धादिभ्यतेपंचकोदेवदत्तः। समभ्रात्मणोदान
मितिनदधिकरणविवक्षा ॥ वा। पूरणार्द्धहुन्। यथाक्रमंठक्ठिठनोरपवादः। द्वितीयोवृद्धादिरस्मिन्द्वीयतेद्वितीयिकः। तृतीयिकः। अर्द्धिकः। अर्द्धशब्दो
रूपकस्यार्द्धरूपः। भागाद्यञ्। चादुन्। भागशब्दोपिरूपकस्यार्द्धे। भागोवृद्धादिरस्मिन्भागिकम्। भाग्यंशतम्। भाग्या। भागिकाविंशतिः। तद्धरतिवह
त्यावहतिभारादृवादिभ्यः। वंशादिभ्यःपरोयोभारशब्दस्तदंतंयत्प्रातिपदिकंतत्पुरुषातिकाद्वितीयांतादित्यर्थः। वंशभारंहरतिवहतिआवहतिवा
वांशभारिकः। ऐक्षुभारिकः। भाराद्वंशादिभ्यइत्यस्यप्रत्यव्याख्यातरं। भारभूतेभ्योवंशादिभ्यइतिभारभूतान्वंशान्हरतिवांशिकः। ऐक्षुकः। वस्त्रेड
वाम्पांठञ्कनौ। यथासंख्यं स्तः। वस्त्रंहरतिवहतिआवहतिवावास्त्रिकः। दुव्यकः। संभवत्यवहरतिपचति। प्रस्थंसंभवतिपास्थिकः कटारुः प्र
स्थं स्वस्मिन्समावेशयतीत्यर्थः। पास्थिकीब्राह्मणी। प्रस्थमुपसंहरतिपचतिवेत्यर्थः। तत्पचतिद्रोणादण्च। चादुन्। द्रोणंपचतिद्रोणी। द्रोणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

की। आढकाचितपात्रात्वेन्यतरस्यां। पक्षेठञ्। आढकंसंभवतिअवहरतिपचतिवाआढकीना। आढकी। आचितीना। आचितिकी। पात्रीणा। पात्रिकी। द्विगोःछं
ञ्च। आढकाचितपात्राद्दित्येव। आढकोनाद्विगोसंभवत्यादिष्वर्थेषुछञ्। खोवास्तः। पक्षेठञ्। तस्यौदनं तिलुकाषिखान्डीष। द्याढकिकी। द्याढकीना। द्विगोरितिउ
प्। द्याढकी। द्याचितिकी। द्याचितीना। अपरिमाणोतिङ्पूर्वनिषेधः। द्याचिता। द्विपात्रिकी। द्विपात्रीणा। द्विपात्री। कुलिजाच्चुकवोच। कुलिजांताद्विगोःसं
भवत्यादिष्वर्थेषुलुग्वोवास्तः। चात्छञ्च। लुगभावेठञ्। अवरणम्। द्विकुलिजी। द्विकुलिजीना। द्विकुलिजिकी। द्विकुलिजिकी। सास्यांद्यावस्न भ्रतयः। अंशोभा
गः। वस्नमूल्यं। भ्रतिर्वेतनं। पंचअंशोवस्नो भ्रतिर्वास्यपंचकः। तदस्यपरिमाणम्। प्रस्थंपरिमाणमस्यप्रास्थिकोराशिः। संख्यायाःसंज्ञासंघसूत्राध्ययनेषु। पू
र्वसूत्रमनुवर्त्तते। तत्रसंज्ञायांस्वार्थेप्रत्ययोवाच्यः। यद्वाद्वेकयोरितिवत्संख्यामात्रवृत्तेःपरिमाणेनिप्रत्ययःस्यात्। पंचैवपंचकाः। शाकुनयः। पंचपरिमाणा
मेषामितिवा। संघे। पंचकाः। सूत्रे। अष्टकंपाणिनीयं। संघेनाध्यस्यपाणिसमूहरूढत्वात्सूत्रंपठ्यगुपन्यस्तं। पंचकमध्ययनं। स्तोमइविधिः। पंचदशमंत्राःपरिमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णामस्यपंचदशः। सप्तदशः। एकविंशः। सोमयागेषु छंदोगैः क्रियमाणाष्टाहिसंज्ञिकास्तुतिस्तोमः। पंक्तिविंशतिर्त्रिंशत्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीति
नवतिशतं। एतेषु दृष्टिवाचानि पातंते। पंचदशतोवर्गेवा। पंचपरिमाणमस्यपंचदशी। दशत्। पक्षेपंचकः। दशकः। त्रिंशाच्चत्वारिंशतोर्ह्रस्वोसंज्ञायांडराट्
त्रिंशदध्यायः परिमाणमेषां ब्राह्मणानां त्रैंशानि। चत्वारिंशानि। तदर्हति। लब्धुं योग्योभवतीत्यर्थे द्वितीयान्ताद्वुन्नाद्यः स्युः। श्वेतछत्रमर्हति श्वेतछत्रि
कः। छेदादिभ्योनित्यं। नित्यमाभीक्ष्ण्यं। छेदं नित्यमर्हति छेदिकोवेतसः। छिन्नप्रकृतत्वात्। विरागविरंगंच। विरागं नित्यमर्हति वैरंगिकः। शीर्षच्छेद्य
च। शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः। शीर्षच्छेदिकः। यद्वुकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते। दंडादिभ्यः। एभ्योयत्स्यात्। दंडमर्हति दंड्यः
अर्घ्यः। वध्यः। पात्रार्हुंश्च। चाद्यत्। तदर्हतीत्यर्थे। पात्रियः। पात्र्यः। कडंकरदक्षिणाच्छ च। चाद्यत्। कडंकरोतीति विग्रहे अतएव निपातनात्छच्।
कडंकरं माषमुद्गादिकाष्ठमर्हतीति कडंकरीयोगः। कडंकर्यः। दक्षिणामर्हतीति दक्षिणीयः। दक्षिण्यः। स्थाली विलात्। स्थाली विलमर्ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिस्थाली विलीयास्तंडुलाः। स्थाली। विल्पाः। पाकयोग्याइत्यर्थः। यज्ञर्लिग्पांपात्रत्रो। यथासंख्यंस्तः। यज्ञम्प्लिज्ञं वार्हतियज्ञियः आ
र्लिजीनोयज्ञमानः। यज्ञर्लिग्पांतत्कर्मार्हतीत्युपसंख्यानं। यज्ञियोदेशः। आर्लिजीनत्रालिकः॥ ॥आरीयाणांठगादीनांद्वादशा
नांपूरणोविधिः॥ ॥अतःपरंउत्रैव। पारायणतुरायणचांद्रायणंवर्त्तयति। पारायणंवर्त्तयतिपारायणिकश्छात्रः। तुरायणोयज्ञवि
शेषः। तंवर्त्तयतितौरायणिकोयज्ञमानः। चांद्रायणिकः। संशायमापन्नः। संशायविषयीभूतोर्थः सांशयिकः। योजनंगच्छति। योजन
निकः। क्रोशशतयोजनशतयोरुपसंख्यानं। क्रोशशतंगच्छतिक्रोशशतिकः। योजनशतिकः। ततोभिगमनमर्हतीतिचवक्तव्यं।
क्रोशशताद्भिगमनमर्हतिक्रोशशतिकोभिक्षुः। योजनशतिकआचार्यः। पथः ष्कन्। वित्वान्डीष्। पंथानंगच्छतिपुरःपथकः। पाथिकी
। पथोरानित्यं। पंथानंनित्यंगच्छतिपांथः। पांथा। उत्तरपथेनाहृतंच। उत्तरपथेनाहृतमौत्तरपथिकं। उत्तरपथेनगच्छतिऔत्तरपथिकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आहृतप्रकरणेवारिजंगलस्थलकांतारपूर्वादुपसंख्यानम्। वारिपथिकं। कालात्। व्युष्टादिभ्योणित्यतः प्रागधिकारेयं। तेन निर्वृत्तं। अह्नानिर्वृत्तमाह्निकं। तमधीष्टोभृतोभृतोभावी। अधीष्टः सत्कृत्य व्यापारितः। भृतो वेतनेन क्रीतः। भृतः स्वसत्तया व्याप्तकालः। भावी ताद्धर्म्यवानागतः। मासमधीष्टो मासिको ध्यापकः। मासंभृतो मासिकः कर्मकरः। मासंभृतो मासिको व्याधिः। मासंभावी मासिक उत्सवः। मासाद्वयसि यत्खञौ। मासंभृतो मास्यः। मासीनः। द्विगोर्यप्। मासाद्वयसीत्यनुवृत्तेः। द्वौ मासौ भृतो द्विमास्यः। षण्मासास्यच्च। वयसीत्येव। यवप्यनुवर्त्तते। चोढ्रः। षाण्मास्यः। षाण्मासिकः। अवयसि ठंच्च। चास्यत्। षाण्मासिको वधिः। षाण्मास्यः। समायाः खः। समामधीष्टो भृतो भावी वा समीनः। द्विगोर्वा। समायाः खदित्येव। तेन परिजय्येत्यतः प्रागनिर्वृत्तादिषु पंचस्वर्थेषु प्रत्ययाः। द्विसमीनः। द्वैसामिकः। राज्यहःसंवत्सराच्च। द्विगोरित्येव। द्विरात्रीणः। द्वैरात्रिकः। ह्यो ही

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नः। द्वैयाहिकः। समासांतविधेरनित्यत्वान्नटच्। द्विसंवत्सरीणः। संख्यायाः संवत्सरसंख्यस्य च। संख्यायाउत्तरपदस्य वृद्धिर्नादौ। द्विसांवत्सरिकः। द्वेषष्टीभृतो द्विषाष्टिकः। परिमाणांतस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्य ग्रहणार्थं। तेन द्वेसमिकरत्युत्तरपदवृद्धिर्न। वर्षाभुक्। वर्षाशब्दांताद्भुगो वीखः। पक्षेठञ्। वाचलुक्। त्रीणि रूपाणि। द्विवर्षीणो व्याधिः। द्विवर्षः। वर्षस्याभविष्यति उत्तरपदस्य वृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवार्षिकः। त्रीणि वर्षाणि भावी त्रैवार्षिकः। अधीष्टभृतयोर्भविष्यतीति निषेधो न। गम्यते हि तत्र भविष्यत्त्वान्नतु ताद्वितार्थः। द्वेवर्षे अधीष्टो भृतो वा कर्मकरिष्यति द्विवार्षिको मनुष्यः। चित्तवति नित्यं। वर्षशब्दांताद्भुगो प्रत्ययस्य नित्यं लुक्स्याच्चेतनेप्रत्ययार्थे। द्विवर्षोदारकः। षष्टिकाः षष्टिरात्रेणपच्यंते। बहुवचनमनन्त्रम्। षष्टिको धान्यविशेषः। तृतीयांतात्कर्त्रात्रशब्दलोपश्च निपात्यते। तेन परिजय्यलभ्यकार्यसुकरं। मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः मासेन लभ्यं कार्यं सुकरं वा मासिकं। तस्य ब्रह्मचर्यं। द्वितीयांतात्कालवाचिनोस्येत्यर्थे प्रत्ययः स्यात्। अत्यंतसंयोगे द्वितीया। मासं ब्रह्मचर्यमस्य

परिमाणांतस्यासंज्ञात्रयाणां द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकं। असंज्ञेति किं पंचकलायाः परिमाणमस्य पांचकलायिकः। तद्धितानां संज्ञा द्वैत्राणां कुलिजशब्दमपि किं चित्यगनि द्वैकुलिजिकः ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रभवइत्यर्थे३

मासिकोब्रह्मचारी। आर्द्धमासिकः। यद्वा प्रथमांतादस्येत्यर्थे प्रत्ययः। मासोस्येतिमासिकंब्रह्मचर्यं। महानाम्न्यादिभ्यः षष्ठ्यंतेभ्य उपसंख्यानं। महानाम्न्यो नाम विद्या भगवन्नित्याद्या ऋचः। तासांब्रह्मचर्यमस्य महानाम्निकः। हरदत्तस्तु भस्याढ इति पुंवद्भावान्महानामिक इत्याह। चतुर्मासात्स्ष्यायज्ञे। चतुर्षुमासेषु भवंति चातुर्मास्यानि यज्ञोः। संज्ञायामण्वक्तव्यः। चतुर्षुमासेषु भवति चातुर्मासी। अर्धांतत्वान्ङीष्। पौर्णमासी। आषाढी। तस्य दक्षिणायज्ञाख्येभ्यः। हादशाहस्य दक्षिणाद्वादशाहिकी। आख्याग्रहणादकालाऽपि। आग्निष्टोमिकी। वाजपेयिकी। तत्र च दीयते कार्यं भववत्। यो ह्यदीयते कार्यं वा षो ह्यषेरेष्यं शारदं॥ ॥कालाधिकारस्य पूर्णो विधिः॥ ॥युष्मादिभ्यो रा। युष्मदीयते कार्यं दावेयुष्मं। युष्मन्तीर्थसंग्रामप्रवासइत्यादि। तेन यथाकथाचहस्ताभ्यां रायतो। यथाकथाचित्पव्ययसंघातात्तृतीयाताद्धस्तद्वारा द्व्यथासंख्यं रायतोस्तः। अर्थाभ्यां तु यथासंख्यं नेष्यते। यथाकथाचदीयते कार्यं वा यथाकथाचं। अनादरेण देयं कार्यं वेत्यर्थः। हस्तेन दीयते कार्यं वा हस्तांसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पादिनि। तेनेत्येव। कर्णवेष्टकाभ्यां संपादिकारणवेष्टकिकं मुखं। कर्णालंकारेणाभ्यां भवरूपं शोभनं इत्यर्थः। कर्मवेषाद्यात्। कर्मणा संपादिकर्मरूपं
शौर्यं। वेषेण संपादी वेष्टोनटः। वेषः कृत्रिमआकारः। तस्मै प्रभवति संतापादिभ्यः। संतापाय प्रभवति सांतापिकः। सांग्रामिकः। योगाद्य
च्च। चाटुञ्। योगाय प्रभवति योग्यः। योगिकः। कर्मणाऽकञ्। कर्मणे प्रभवति कार्मुकं। समयस्तदस्य प्राप्तं। समयः प्राप्तोऽस्य सामयि
कः। अतोरण्। अतुः प्राप्तोऽस्य आर्तवं। कालाद्यत्। कालः प्राप्तोऽस्य कालं शीतं। प्रकृष्टेठञ्। कालादित्येव। तदस्येति च। प्रकृष्टोदीर्घः का
लोऽस्येति कालिकं वैरं। प्रयोजनं। तदस्येत्येव। इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकं। प्रयोजनं फलं कारणं च। विशाखाषाढाद्रासंघदंड
योः। आभ्यामण्स्यात् प्रयोजनमित्यर्थे। ऋमान्यन्यदंडयोरर्थयोः। विशाखे प्रयोजनमस्य वैशाखो मंथः। आषाढो दंडः। चूडादिभ्यः
उपसंख्यानं। चूडा चौडम्। श्रद्धा श्राद्धं। अनुप्रवचनादिभ्यश्छः। अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयं। समापनात्सपूर्वपदात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याकरणसमापनंप्रयोजनमस्यव्याकरणसमापनीयं।ऐकागारिकश्चौरे।एकमसहायमगारंप्रयोजनमस्यमुमुषिषोःसऐकागारिकश्चोरः।आकालिकउद्यंनवचने।समानकालावाद्यंतौयस्येत्याकालिकः।समानकालस्याकालआदेशः।आशुविनाशीत्यर्थः।पूर्वस्मिन्समध्याह्नाद्युत्पद्यस्मिन्नंतरेतत्रैवनश्यतइतिवा।आकालाद्वृंश्च।आकालिकाविद्युत्॥ ॥ढञःपूरणावधिः॥ ॥तेनतुल्यंक्रियाचेद्वतिः।ब्राह्मणेनतुल्यंब्राह्मणवदधीते।क्रियाचेत्किं।गुणतुल्येमाभूत।पुत्रेणतुल्यःस्थूलः।तत्रतस्येव।मथुरायामिवमथुरायांवसुघ्नेप्राकारः।चैत्रस्येवचैत्रवन्मैत्रस्यगावः।तद्दर्हतिविधिमर्हतिविधिवत्सज्यते।क्रियाग्रहणमंडूकप्लुत्यानुवर्त्तते।तेनेहन।राजानमर्हतिछत्रमातस्यभावस्त्वतलौ।प्रकृतिजन्यबोधेप्रकारोभावः।गोर्भावोगोत्वं।गोता।लांतंक्लीबंतलंतंस्त्रियाम्।आचलात्।ब्रह्मणस्त्वइत्येतःप्राक्त्वतलावधिःक्रियेते।अपवादैःसहसमावेशार्थंगुणवचनाश्चिप्रकर्मणिविधानार्थंचैतैः।चकारोनञ्स्नञ्भ्यामपिसमावेशार्थः।स्त्रियाभावःस्त्रैणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रीत्वं। स्त्रीता। पौंस्नं। पुंस्त्वं। पुंस्ता। ननञ्पूर्वोत्तरपुरुषादश्चतुरसंगतलवणावदयुधकतरसलसेभ्यः। इतः परं येभावपुरुषास्तेनञ्तत्पुरुषात्नस्युश्चतुरादी
न्वर्जयित्वा। अपतित्वम्। अपटुत्वं। नञ्पूर्वोत्तिः। बाहुस्पत्यं। तत्पुरुषात्किं। नास्यपटवः सन्तीत्यपटुस्तस्यभावआपटवं। अश्चतुरेतिकिं। आश्चतुर्यम्। आ
संगत्यं। आलवण्यं। आवद्यं। आयुध्यं। आकत्यं। आरस्यं। आलस्यं। दृथ्वादिभ्यइमनिज्वा। वावचनमरणादिसमावेशार्थमारभ्यतोहलादेर्लघोः। इष्ठे
मेयस्सु। दृढः। दृढ्ढीपः स्यादिष्ठेमेयस्सु। दृथोर्भावः पृथिमा। पार्थवं। मृदिमा। मार्दवं। वर्णादृढादिभ्यः ष्यञ्च। चादिमनिच्। शौक्ल्यं। शुक्लिमा। दार्ढ्यं।
पृथुमृदुभ्यां कृच्छ्रादृढपरिवृढेभ्यो वरत्वं। दृढिमा। षोडशवर्षः। औचिती। याथाकामी। गुणवचनब्राह्मणादिभ्यः कर्मणिच। चाटुत्वं। जडस्यभावः क
र्मवा जाड्यं। मौर्ख्यं। ब्राह्मण्यं। अर्हतोनुम्। अर्हतोभावः कर्मवा आर्हन्त्यं। आर्हन्ती। ब्राह्मणादिराकृतिगणः। यथातथयथापुरयोः पर्यायेण। न
ञ्परयोरनयोः पूर्वोत्तरपदयोः पर्यायेणादेश्चोवृद्धिर्निपात्यते। अयथातथाभावः आयथातथ्यं। अयाथातथ्यं। आयथापुर्यम्। अयाथापुर्यम्। आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पादसमाप्तेर्भावकर्माधिकारः। चतुर्वर्णादीनां स्वार्थउपसंख्यानं। चत्वारोवर्णाश्चातुर्वर्ण्यं। चातुराश्रम्यं। त्रैविद्यं षाड्गुण्यं। सैन्यं। सांनिध्यं। सामीप्यं। औपम्यं। त्रैलोक्यमित्यादि। सर्ववेदाः सर्ववेदास्तानधीते सर्ववेदः। सर्वादेरिति लुक्। सर्वसार्ववेद्यः। चतुर्वेदस्योभयपदवृद्धिश्च। चतुरोवेदानधीते चतुर्वेदः सएव चातुर्वैद्यः। चतुर्विद्यस्येति पाठान्तरं। चतुर्विद्यएव चातुर्विद्यः। स्तेनाद्यन्नलोपश्च। नेति संघातग्रहणं। स्तेनचौर्यं पचाद्यच्। स्तेनस्य भावः कर्म वा स्तेयम्। स्तेनादिति योगविभज्यस्तेन्यमिति षष्ठ्यन्तमपि केचिदिच्छन्ति। सख्युर्यः। सख्युर्भावः कर्म वा सख्यं। दूतवणिग्भ्यां च। दूतस्य भावः कर्म वा दूत्यम्। वणिज्यमिति कात्यायनः। माधवस्तु वणिज्यात्राद्यः स्वभावात्स्त्रीलिंगः। भावेएवात्र प्रत्ययो न तु कर्मणीत्याह। भाष्ये तु दूतवणिग्भ्यां चेति नास्त्येव। ब्राह्मणादित्वाद्वाणिज्यमपि। कपिज्ञात्योर्ढक्। कापेयं। ज्ञातेयं। पत्यन्तपुरोहितादिभ्योयक्। सैनापत्यं। पौरोहित्यं। राजासे। राजन्वाद्योऽसमासे यकं लभते इत्यर्थः। राज्ञो भावः कर्म वा राज्यं। समासे तु ब्राह्मणादित्वात्ष्यञ्। आधिराज्यं। प्राणिभ्यो ज्ञातिवयोवचनोद्गात्रादिभ्योञ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणाभ्ज्जाति। आश्वं। औष्ट्रं। वयोवचनं। कौमारं। कैशोरं। औङ्गात्रं। औन्नेत्रं। सौष्ठवं। दौष्ठवं। हायनांतयुवादिभ्योण। द्वैहायनं। यौवनं। स्थाविरं। श्रो
त्रियस्यलोपश्च। श्रोत्रं। कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञायुवादिषुवृत्तिणादिषुचपठ्यंते। कौशलं। कौशल्यमित्यादि। इगन्ता
च्चलघुपूर्वात्। मुचेर्भावः कर्मवाशौचं। मौनं। कृष्णकाव्यं। कविदारुस्यत्राह्मणादिलात्यन्न। यौपधादुरुपोत्तमाहुन्न। रामणीयकं। आभिधानी
यकं। सहायाद्वा। साहाय्यं। साहायकं। इन्द्रमनोज्ञादिभ्यश्च। ईष्योपाध्यायिका। मानोज्ञकं। गोत्रचरणाच्छाघात्याकारतदवेतेषु। अत्याकारोधि
क्षेपः। तदवेतः तेगोत्रचरणायोर्भावकर्मणी प्राप्तः। अवगतवान्वा। गार्गिकयाश्लाघते। गार्गित्वेनविकत्थ्यतइत्यर्थः। गार्गिकयात्याकुरुते। गा
र्गित्वेनपरानाक्षिपतीत्यर्थः। गार्गिकामन्ववेतः। होत्राभ्यश्छः। होत्राद्वाद्रात्रिवाचीस्त्रीलिंगः। बहुवचनाद्दोषग्रहणं। अछावाक
स्यभावः कर्मवा आछावाकीयं। मैत्रावरुणीयं। ब्रह्मणस्त्वः। होत्रावाचिनोब्रह्मशब्दात्त्वः स्यात्। कुसाप्रवारः। ब्रह्मत्वं। नेतिवाच्येत्ववचनंतत्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाधनार्थम्। ब्राह्मणपर्यायाद्ब्रह्मशब्दात्तुत्वतलौ। ब्रह्मत्वं। ब्रह्मता॥ ॥नञ्जनोरधिकारःसमाप्तः॥ ॥धान्यानांभवनेक्षेत्रेखञ्। भवन्त्यस्मिन्निति
भवनं। मुद्गानांभवनंक्षेत्रंमौद्गीनं। व्रीहिशाल्योर्ढक्। व्रैहेयं। शालेयं। यवयवकषष्टिकाद्यत्। यवानांभवनंक्षेत्रंयव्यं। यवक्यं। षष्टिक्यं। नि
भाषातिलमाषोमाभंगाणुभ्यः यत्स्यात्। पक्षेखञ्। तिल्यं। तैलीनं। माष्यं। माषीणं। उम्प्यं। औमीनं। भंग्यं। भांगीनं। अणव्यं। आणवीनं। सर्व
चर्मणःकृतःखखञौ। असामर्थ्येपिनिपातनात्समासः। सर्वश्चर्मणाकृतःसर्वचर्मीणः। सार्वचर्मीणः। यथामुखसम्मुखस्पर्शानःखः। मु
खस्यसदृशंयथामुखं। प्रतिविंबं। निपातनात्सादृश्येऽव्ययीभावः। समंसर्वंमुखंसंमुखं। समदाहस्यातलोपोनिपात्यते। यथामुखंदर्शनः
यथामुखीनः। सर्वस्यमुखस्यदर्शीनःसंमुखीनः। तत्सर्वादेःपथ्यंगकर्मपत्रपात्रंव्याप्नोति। सर्वादेःपथ्याद्यन्ताद्द्वितीयांतात्खः स्यात्। सर्वप
थान्व्याप्नोतिसर्वपथीनः। सर्वांगीणः। सर्वकर्मीणः। सर्वपत्रीणः। सर्वपात्रीणः। आप्रपदंप्राप्नोति। पादस्याग्रंप्रपदं। तन्मर्यादीकृत्यप्रपदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदः

आपपदीनः। अनुपदं सर्वान्नयानयं यद्वा भक्षयति नेयेषु। अनुरायामे साहचर्ये वाऽनुपदं वद्वाऽनुपदीनाऽउपानत्। सर्वान्नानि भक्षयति सर्वान्नी
नोभिक्षुः। अयानयः स्थलविशेषः। तन्नेयः अयानयीनः द्वारः। परोवरपरंपरपुत्रपौत्रमनुभवति। परांश्चावरांश्चानुभवति परोवरीणः। अव
रस्योत्वं निपात्यते। परांश्चपरतरांश्चानुभवति परंपरीणः। पृक्कृतेः परंपरभावो निपात्यते। पुत्रपौत्रानुभवति पुत्रपौत्रीणः। परम्पराशब्दस्तु अ
व्युत्पन्नं शब्दान्तरं स्त्रीलिंगं। तस्माद्देवस्वार्थेष्वञि पारंपर्यं। कथं पारोवर्यवदिति। असाधुरेवायं खप्रत्ययसन्नियोगेनैव परोवरे तिनिपा
तनात्। अवारपारात्यंतानुकामंगामी। अवारपारगामी। अवारपारीणः। अवारीणः। पारीणः। पारावारीणः। अत्यंतगामी अत्यन्तीनः। भृशंगन्तेत्य
र्थः। अनुकामंगामी अनुकामीनः। यथेष्टगन्ता। समासमा विजायते। यलोपोऽव्ययस्य विभक्तेरलुक्पूर्वपदे निपात्यते। समासमीनागोः। समा
समीनासायेव प्रतिवर्षं प्रसूयते। खप्रत्ययानुत्पत्तौ यलोपो वाक्तव्यः। समासमां विजायते। समायां समायां वा। अद्यश्वीनावश्वे। अद्यश्वो

=सामान्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा विजायते अद्यश्वीनावडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायतइति नानुवर्त्तयंति। अद्यश्वीनं मरणं। आसन्नमित्यर्थः। आगवीनः। आ
ङ्पूर्वाद्गोवाद्दात्कर्मकरे खप्रत्ययो निपात्यते। गोः प्रस्थापणं पर्यनं यः कर्मकरोति स आगवीनः। अनुर्वलंगामी। अनुर्गोः पश्चात्पर्यीङ्गच्छति
अनुगवीनो गोपालः। अध्वनो यत्खौ। अध्वानमलंगच्छति अध्वन्यः। अध्वनीनः। ये चाभावकर्मणोः। आत्माध्वानौ खे इति प्रकृतिभावः। अभ्य
मित्रा च। चाद्यत्खौ। अभ्यमित्री यः। अभ्यमित्रीं। अभ्यमित्रीणः। अमित्राभिमुखं सुङ्गच्छतीत्यर्थः। गोष्णात्खभूतपूर्वे। गोष्णो भूतपूर्वो गोष्ठी
नो देवाः। अश्वस्येकाहगमः। एकाहेन गम्यते इत्येकाहगमः। आश्वीनो ध्वा। द्वालीनकोपीनं अश्वर्ष्कार्थयोः। द्वालो पुवेशमर्हति द्वालीनः
अश्वर्ष्कः। कूपपतनमर्हति कोपीनं पापं। तत्साधनलाञ्छनं हस्तोप्यत्वाद्वा पुरुषलिंगमपि तत्संबंधात्तदाच्छादनमपि। व्रातेन जीवति। व्रातेन श
रीरयासेन जीवति न तु बुद्धिवैभवेन सः व्रातीनः। साप्तपदीनं सख्यं। सप्तभिः पदैरवाप्यते साप्तपदीनं। हैयंगवीनं संज्ञायां। ह्योगोदोहस्य हियंगुरादे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शो विकारार्थे खच्च निपात्यते। दुह्यन्तइति दोहः क्षीरं। द्योगो दोहस्य विकारो हैयंगवीनं नवनीतं। तस्य पाकमूले पीलुकादिकरणादिभ्यः कुणः ड्राच्चो। पीलूनां पाकः पीलुकुणः। करीरस्य मूलमकरीरजाहम्। पक्षाद्भिः। मूलमात्रमनुवर्त्तते। पक्षस्य मूलं पक्षाद्भिः। तेन वित्तश्चुंचुपचरापो। यकारः प्रत्ययो रदोलुप्तनिर्द्दिष्टः तेन चस्य नेत्संज्ञा। विद्यया वित्तः विद्याचुंचुः। विद्याचरणः। विनभ्यां नानाञौ नसह। असहार्थे पृथग्भावे वर्त्तमानाभ्यां स्वार्थे प्रत्ययो ॥ विना। नाना। चेः शालचशंकटचौ। क्रियाविशिष्टसाधनवाचकात्स्वार्थे विरक्तं। विशालं। विशंकटं। संप्रोदश्चकटच्च। संकटं। प्रकटं। उत्कटं। चालिकटं। अलाबूतिलोमाभंगाभ्योरजसुपसंख्यानं। अलाबूनां रजः अलाबूकटं। तिलकटं। गोछजादयः स्थानादिषु पशुनामभ्यः। गवां स्थानं गोगोष्ठं। अश्वगोष्ठं। संघातेकटच्च। अवीनां संघातः अविकटः। विस्तारेपटच्च। अविपटः। द्वित्वे गोयुगच्च। द्वावुष्ट्राणां युगो युगं। षट्त्वे षड्गवच्च। अश्वानां षट्अश्वषड्वं। स्नेहे तैलच्च। तिलतैलं। सर्षपतैलं। भवने क्षेत्रे शाकटचाकिनौ। इक्षुशाकटं। इक्षुशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किनं। अवाक्कुटारश्च। चात्कटच्। अवाचीनः। अवकुटारः। अवकटः। नतेनासिकायाः संज्ञायां टीटन्नाटञ्भुटच्। अवादित्येव। नतंनमनं। नासिकायानतं अवटीटं। अवनाटं। अवभ्रटं। तद्योगान्नासिकाऽवटीटः। पुरुषोऽवटीटः। नेर्विटुञ्विरी सचौ। निविटुं। निविरीसं। इमचिटञ्चिकचिच। नेरित्येव। नासिकायानतेऽभिधेये इनचपिटचौ प्रत्ययौ प्रकृते चिकचिदित्यादेशौ च। कप्रत्ययचिकादेशौ च वक्तव्यौ। चिकिनं। चिपिटं। चिक्कं। क्लिन्नस्य चिलपिच्चच्चास्य चसुबौ। क्लिन्नेचक्षुषी अस्य चिच्चः। पिच्चः। चुल्। क्लिन्नस्य चुलादेशो लप्रत्ययसन्नियोगेन। चुच्चः। उपाधिभ्यां त्यकन्नासन्नारूढयोः। संज्ञायामित्यनुवर्त्तते। पर्वतस्यासन्नं स्थलमुपत्यका। आरूढं स्थलं मत्पीठिका। कर्मणि घटोऽच्। घटतइति घटः। पचाद्यच्। कर्मणि घटते कर्मऽपुरुषः। तस्य संज्ञातं तारकादिभ्यइतच्। तारकाः संज्ञाता अस्य तारकितं नभः। आकृतिगणोयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। तस्येत्यनुवर्त्तते। ऊरुप्रमाणमस्य ऊरुद्वयसं। ऊरुदघ्नं। ऊरुमात्रं। प्रमाणे लः। द्रामः। द्विः। वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्त ४

तस्तिः। द्विगोर्नित्यं। द्वौ द्रामौ प्रमाणमस्य द्विद्रामं। प्रमाणापरिमाणाभ्यां संख्यायाश्च संसंयेमात्रञ्चक्तव्यः। द्रामं मात्रं। प्रस्थमात्रं। पंचमात्रं। वृत्तेतात्स्वार्थे द्वयसञ्मात्रचौ। तावदेवतावद्द्वयसं। तावन्मात्रं। पुरुषहस्तिभ्यामण्च। पुरुषः प्रमाणमस्य पौरुषं। पुरुषद्वयसं। यत्तदेतेभ्यः परिमाणे वतुप्। यत्परिमाणमस्य यावान्। तावान्। एतावान्। किमिदंभ्यां वोघः। आभ्यां वतुप्स्याद्वस्य चघः। कियान्। इयान्। किमः संख्यापरिमाणे डतिच। चाद्वतुप्स्य चघः स्यात्। कासंख्यायेषां ते केति। कियन्तः संख्याया अवयवा तयप्। पंचावयवा अस्य पंचतयं। द्वित्रिभ्यां तयस्यायज्वा। द्वयं। द्वितयं। त्रयं। त्रितयं। उभादुदात्तो नित्यं। उभयं। तदस्मिन्नधिकमिति दशान्ताड्डः। एकादश अधिका अस्मिन्नेकादशं। शतसहस्रयोरेव ष्यते। नेह। एकादशा अधिका अस्यां विंशत्यां। प्रकृतिप्रत्ययार्थयोः समानजातीयत्वे एवेष्यते। नेह। एकादशामाषा अधिकाश्च्रु स्मिन्सुवर्णशते। शादंतविंशतेश्च। डस्यादुक्तेर्थे। त्रिंशादधिका अस्मिन्त्रिंशं शतं। विंशं। संख्यायागुणास्य निमाने मयट्। भागस्य मूल्ये वर्त्तमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नात्पथमांतात्संख्यावाचिनःषष्ठ्यर्थेमयट्स्यात्। यवानांद्वौभागौनिमानमस्योदश्चिद्भागस्यद्विमयमुदश्चिद्यवानां। गुणेतिकिं। द्वौद्वौहियवौनिमानमस्योदश्चितः। निमानेकिं। द्वौगुणौक्षीरस्यएकस्तैलस्यद्विगुणांतैलंपचतेक्षीरेण। तस्यपूरणेडट्। षष्ठीसमर्थात्संख्यावाचिनःपूरणइत्यर्थेडट्स्यात्। एकादशानांपूरणएकादशः। नांतात्संख्यादेर्मट्। डटोमडागमःस्यात्। पंचानांपूरणःपंचमः। नांतात्किं। विंशः। असंख्यादेःकिं। एकादशः। षट्कतिकतिपयचतुरांथुक्। एषांथुकागमःस्याड्डटि। षष्ठ्यांपूरणःषष्ठः। कतिपयः। कतिपयशब्दस्यासंख्यात्वेपिअतएवज्ञापकाड्डट्। कतिपयथः। चतुर्थः। चतुरश्चयतावाद्यक्षरलोपश्चानुरीयः। तुर्यः। बहुपूगगणसंघस्यतिथुक्। डटीत्येव। पूगसंघयोरसंख्यात्वेपतएवडट्। बहुतिथइत्यादिवत्तोथुक्। डटीत्येव। यावतिथः। द्वितीयः। डटोपवादः। द्वयोःपूरणोद्वितीयः। त्रेःसंघसारणंच। तृतीयः। विंशत्यादिभ्यस्तमडन्यतरस्याम्। एभ्योडटस्तमडागमःस्याद्वा। विंशतितमः। विंशः। एकविंशतितमः। एकविंशः। निस्पंशत्तादिमासाईमाससंवत्सराच्च। शतस्यपूरणःशततमः। एकशततमः। मासादेरतएवडट्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासतमः। षष्ट्यादेश्चासंख्यादेः। षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव। एकषष्ठः। एकषष्टितमः। मतौ छः सूक्तसाम्नोः। मत्वर्थे छस्स्यात्। अच्छावाक
